vf[kyHkkjrh;&ikP;fo|klEeyue

'kro"kegkRloxUFkekyk&69

{kekn0;k% dFkkfo'oe

¼iFke% Hkkx%½

ik- uUnk ijh

i/kku l iknd%

vkpk;% Jhfuokl% oj[kMh

dyx#

l iknd%

vkpk;% e/klnu% iUuk

lpkyd% l'kk/ku&idk'kufoHkkx%



dfodyx#&dkfynkl&lLÑr&fo'ofo|ky;%

jkeVde] ft- ukxije ¼egkjk"Ve½

,o

U;; Hkkjrh; cd dkjikj'ku] fnYyh

'kh"kde & {kekn0;k% dFkkfo'oe

ldyue & ik- uUnk ijh

i/kku likd% & vkpk;% Jhfuokl% oj[kMh
dyx#] d-dk-l-fo-] jkeVde

likd% & vkpk;% e/klnu% iUuk
lpkyd% l'kk/ku&idk'kufoHkkx%
d-dk-l-fo-] jkeVde

likde.Mye & Mk- fnudj ejkB] d-dk-l-fo-] jkeVd
Mk- ohuk xk.k] ukxij-

idk'kuo"ke & 2020

vkofRr% & iFkek

eY;e & 260-00

vk;-,l-ch-,u- & 978&81&8315&440&6

e[ki"Be & Jh- me'k ikVhy] d-dk-l-fo-]

idk'kd% & dylfpo%]
dfodyx#&dkfynkl&lLdr&fo'ofo|ky;%]
i'kkldh;Hkoue] eknkekxL;] jkeVde-

,o

U; Hkkjrh; cd dkjikj'ku
208] f}rh; ry] idk'knhi fcfYMx]
4735@22] vlkjh jkM] nfj;k xt]
ub fnYyh & 110002
Qku u- % 23280214] 23280209

,l- d- vkQlV] fnYyh

PREFACE

It is indeed a matter of great pleasure and pride for Kavikulaguru Kalidas Sanskrit University, Ramtek to have this rarest opportunity of hosting the 50th session of All India Oriental Conference at Nagpur. This AIOC-50th session at Nagpur will be forever remembered by all as the year 2019 also happens to be the year of Centenary Celebration of AIOC. The premier objective with which the great scholars of yester years had contemplated and established this national academic event called All India Oriental Conference has been achieved through these years with scores of young scholars contributing significantly to the treasure house of knowledge through their valuable research work.

The research of yore and of the present should be properly recorded so as to make it easily available to all lovers of knowledge and wisdom in the years to come. With this objective, we have contemplated to commemorate the 100th year of this grand event of 50th session of AIOC by way of publishing 100 monographs on different subjects in four languages viz., Sanskrit, Hindi, Marathi and English. It is no doubt a herculean task but still worth of it, for the reason that these 100 monographs will inspire many young scholars to take upon a fresh study and research of the oriental subjects with more vigour and zeal.

The AIOC Centenary Publication Series includes wide variety of subjects like Literature, Language, Veda, Indian Philosophy, Sanskrit Grammar, Law, Children Literature, Yoga, Astronomy and Astrology, Ayurveda, Pali, Prakrit, Jain, Buddhism, Education, Library Science, Poetics, Aesthetics, and Indology. It also includes reprint of some rare texts of academic importance which have gone out of print are not easily available. We wish to mark this centenary celebrations with this series that connects the glory of the past and aspirations of future. I place on record my sincere gratitude to all the authors of these monographs who have kindly contributed to the richness of this

series.

I am confident that the books published in these series will definitely inspire the lovers of Oriental Learning in general and of Sanskrit Language and Literature in particular.

On this occasion, we have published a memorable book of all the speeches of Section-Presidents of all previous sessions of AIOC. It is indeed a very capacious addition to any collection. I with all respect thank two eminent scholars of our times - Prof. Gautam Patel, President and Prof. Saroja Bhate, General Secretary, the torch bearers of AIOC who have not only encouraged us in this venture but also made all efforts to provide these valuable historical speeches for us. I thank all executive members of AIOC and my colleagues of the varsity for making this event a grand success.

My words fall short in describing the painstaking efforts and scholarly commitment of my esteemed colleague Prof. Madhusudan Penna, local secretary of this session in bringing out this series.

I also take this opportunity to profusely thank Shri. Subhash Jain and Shri Dipak Jain, the proprietors of New Bharatiya Book Corporation, New Delhi for their enthusiastic approach and timely work with all precision and grace.

Let us all sanctify ourselves in the eternal flow of wisdom by reading these books and recommending these to others also!

IjLorh Jfregrh egh;rke

Ramtek   Prof. Shrinivasa Varakhedi
10th January 2020   Vice Chancellor, KKSU

Kavikulaguru Kalidas Sanskrit University
All India Oriental Conference

100th Year 50th Session
10th-12th January, 2020

Chief Patron
Hon'ble Nitin Gadkari
Minister of Road, Transport & Highways of India

Patron
Prof. Shrinivasa Varakhedi
Vice Chancellor, KKSU, Ramtek

AIOC President
Prof. Gautam Patel
Chairman, Sanskrit Seva Samiti, Ahmedabad.

AIOC General Secretary
Prof. Saroja Bhate
Professor of Sanskrit (Retd.), Pune University, Pune

AIOC Local Secretary
Prof. Penna Madhusudan
Dean, KKSU, Ramtek

Additional Local Secretary
Dr. Harekrishna Agasti   Dr. Dinakar Marathe
Dr. Kalapini Agasti   Dr. Parag Joshi

Organising Committee
Prof. C.G. Vijayakumar, Registrar (I/c) & Dean, KKSU, Ramtek
Prof. Nanda Puri, Dean, KKSU, Ramtek
Prof. Krishnakumar Pandey, Dean, KKSU, Ramtek
Prof. Laita Chandratre, Dean, KKSU, Ramtek
Dr. Ramachandra Joshi, Finance Officer, KKSU, Ramtek
Dr. Umesh Shivahare, Controller of Examination, KKSU, Ramtek
Dr. Dipak Kapade, Librarian, KKSU, Ramtek
Dr. Renuka Bokare, PRO, KKSU, Ramtek
Shri. Rajivranjan Mishra, Technical Head, KKSU, Ramtek
Shri. Pravin Kalambe, Security Officer, KKSU, Ramtek

Reception Committee

Prof. Shrinivasa Varakhedi, Chairperson Reception Committee & VC, KKSU
Parampujya Govindagiri Swamiji, Rishikesh
Prof. P.T. Chande, Former VC, KKSU
Prof. Uma Vaidya, Former VC, KKSU
Prof. Vijendra Kumar, VC, National Law University, Nagpur
Prof. Rajnish Shukla, VC, National Hindi University, Wardha
Prof. Vinayak Kane, VC, RTM Nagpur University, Nagpur
Shri. Krupal Tumane, Member of Parliament
Shri. Girishji Vyas, Member of Legislative Council
Shri. Chandrashekhar Bawankule, Guardian Minister, Nagpur
Prof. Vishram Jamdar, Director, VNIT, Nagpur
Dr. Bhushankumar Upadhyay, Commissioner of Police, Nagpur
Shri. Vijay Phanshikar, Editor, The Hitavada, Nagpur
Shri. Rajkumar Tirpude, Tirpude Group of Insitutions, Nagpur
Shri. Mohabbat Singh, Tuli International, Nagpur.
Shri. Chandragupta Varnekar, Principal Retd., Nagpur
Shri. Suresh Sharma, Baidyanath, Nagpur
Shri. Prabhakar Rao Mundle, Dharampeth Educational Institutions, Nagpur

Executive Committee

Prof. G. U. Thite,
Vice President

Dr. Brijeshkumar Shukla,
Treasurer

Members

Dr. Rajni Satish Chandra Jha
Prof. Shukla Ramakant
Dr. Behera Ranjit
Dr. Meena Shukla
Dr. Nirmala Kulkarni
Dr. Roy Gauri Nath
Dr. Tripathi Uma Rani
Dr. Pushpa Jha
Dr. Basu Ratna
Dr. Mithilesh Kumar
Prof. Singh Prasoon Dutta
Shri. Mishra Arun Ranjan
Dr. Mishra Baidyanath
Dr. Tripathi Rajendra Rasraj
Shri. Harshdev Madhav
Dr. Kamdev Jha
Dr. Parinita Deshpande
Dr. Jha Udayanath (Ashok)

अनुक्रमणिका

क्षमादेव्याः कथाविश्वम्

प्रथमः भागः

प्रस्तावना—

वेदकालादारभ्यविदुषिभिः संस्कृतसाहित्यं समृद्धं कृतम्। वैदिककालेऽपालाघोषासदृशाः ब्रह्मवादिन्य आसन्। विद्वत्सभायां याज्ञवल्क्यं प्रश्नान् पृच्छन्ती गार्गी अलौकिकप्रतिभाशालिनी विद्वद्वरेण्या चासीत्। विज्जिकां मामजनता दण्डिना सर्वशुक्ला सरस्वतीति कथमुक्तमिती सगर्वं पृच्छन्तीं विज्जिकां को न जानाति।सरस्वत्या विरचितस्य लक्ष्मीस्वयंवरनाट्यप्रकारस्य प्रयोगः इन्द्रसभायां जात इति कालिदासेनोल्लिखितम्। आधुनिककालेऽपि संस्कृतसाहित्ये स्त्रिप्राधान्यं दृश्यते इत्यत्र नास्ति शङ्कालेशः। एतासु प्रतिभासम्पन्नासु स्त्रिजनेषु पं. क्षमा राव महोदया महत्त्वपूर्णं स्थानमादधति। षण्महाकाव्यानि त्रयः कथासङ्ग्रहाः, लघुकाव्यद्वयमिति तस्याः ग्रन्थविस्तारः। एतावद्ग्रन्थराशिंविरचय्य संस्कृतसाहित्यमलङ्कृतमेतया।

अस्मिन्प्रकल्पे क्षमादेव्याः कथासाहित्यस्याध्ययनं समीक्षणञ्च कृतमस्ति। तस्याः साहित्यमिदानीं दुष्प्राप्यं जातम्। अद्यावधीः न केनापि क्षमादेव्याः काव्यग्रन्थानां पुनःप्रकाशनं कृतम्। अतः शनैः शनैरेतानि काव्यरत्नान्यनुपलब्धानि जातानि। आधुनिककथातन्त्रेण रचितामिंद कथासाहित्यं छात्राणां संशोधकानां संस्कृतानुरागिणांञ्च कृते उपालब्धव्यमिति मनसि निधायायं प्रयासः कृतः। प्रा. राधावल्लभ त्रिपाठी महोदयैः क्षमादेव्याः समग्रसाहित्यस्य समीक्षणं हिन्दी भाषया कृतं वर्तते। परं तत्र मूलग्रन्थानां समावेशो नास्ति। अतः मूलकथाग्रन्थैः सह संस्कृतेन समीक्षणमित्यस्य प्रकल्पस्य वैशिष्टयम्।मूलकथाः कथासारं समीक्षणञ्चैतेन क्रमेण कथाग्रन्थानां समीक्षणमत्र विधास्यते।क्षमादेव्याः कथामुक्तावल्याः सम्पादनं मयैव 2012 मध्ये कृतम्। परं ग्रन्थे॰स्मिन् कथानां समीक्षणं

केवलं परिचयात्मकमेवासीत्। मराठीभाषया कृतमासीदिदं समीक्षणम् ।विशांतिशतकोत्तराष्टादशतमे वर्षे(2018)षट् कथाः मराठीभाषयानूदिता आसन्।

<u>क्षमादेव्याः जीवनपरिचय :</u>

अष्टादशशतकोत्तरनवतितमे वर्षे चतुर्थ दिनाङ्के पुण्यपत्तने क्षमादेवी जनिमलभत। बाल्ये एव तस्याः पितृछत्रं कठोरविधिनापहृतम्। अतः शिक्षणार्थं गुजरातप्रान्ते पितृव्यस्य गुहे तया गन्तव्यमापतितम्। मूलतः महाराष्ट्रीया सा गुजरातनिवासिनी जाता। विवाहानन्तरं सा पुनर्महाराष्ट्रं प्रत्यागता। मुम्बापुर्याः डॉ. राघवेन्द्र राव इत्यनेन सह तस्याः विवाहः जातः। बुद्धिमत्याः तस्या अध्ययने विवाहेन न प्रत्यूहः जातः। संस्कृतपाण्डित्यं तु तया परम्परया प्राप्तमासीत्। शङ्कराख्यः तस्य पिता संस्कृतपाण्डित आसीत्। आङ्ग्लभाषप्राभुत्वमपि तया लिलयाधिगतमासीत्। आङ्ग्लभाषया तया नाटकान्यपि लिखितानि। तेषां नाटकानां प्रयोगा अपि जाताः। आङ्ग्लभाषायाः प्रभावादेव लघुकथालेखनं तया प्रारब्धम्। आधुनिकतन्त्रेण समकालीनसमस्या आधारीकृत्य संस्कृतेन लघुकथालेखनं कुर्वतीयं प्रथमा लेखिका।

गुजरातप्रदेशे वासं कुर्वत्या तया सत्याग्रहस्यान्दोलनं समीपतः प्रत्यक्षीकृतम्। परं तत्र सक्रियं भागं ग्रहीतुं महात्मागान्धीमहोदयस्यानुमतिर्न लब्धा। आङ्ग्लानामत्याचारेण पीडितान् भारतीयान् दृष्ट्वा द्रुतचित्तया क्षमादेव्या लेखनमारब्धम्। तस्याः कृते प्रेरणास्रोतरूपमिदमान्दोलनं संस्कृतलेखनाय। अयोध्यास्थितसंस्कृतकल्याणसंस्थया एकोनविशांतिशतकोत्तराष्टत्रिंशत्तमे वर्षे क्षमादेवी पण्डितेत्युपाधिना सम्मानिता।

क्षमादेव्याः संस्कृतसाहित्यम्–

1) सत्याग्रहगीता–सत्याग्रहस्य आन्दोलने आङ्ग्लैः कृतं भारतीयानां क्रौर्यपूर्णं पीडनं दृष्ट्वा व्यथितहृदयया क्षमादेव्या 'सत्याग्रहगीता' नामाष्टादशाध्याययुतं महाकाव्यं रचितम्। अस्मिन् ग्रन्थे

सत्याग्रहस्यारम्भतः एकोनविंशतिशतकोत्तरैकत्रिंशत्तमवर्षपर्यन्तं घटितानां प्रमुखघटनानां वर्णनं कृतमस्ति।

2) उत्तरसत्याग्रहीता –महाकाव्यमिदं तिरुवेलपुरस्य भिक्षोः निर्मलानन्दस्य विज्ञप्त्यनुसारं रचितम्। निर्मलानन्देन गान्धीमहोदस्य सत्याग्रहमाश्रित्याप्रकाशितसंस्कृतमहाकाव्यानि प्रेषयितुं प्रार्थिता पण्डिता क्षमादेवी। तेषु महाकाव्येषु क्षमादेव्या अपि महाकाव्यं भवात्विति तस्य इच्छासीत्। तदनुसारं पञ्चमासेषु क्षमादेव्या सप्तचत्वारिंशदध्यायस्य महाकाव्यं रचितम्। अस्मिन्महाकाव्ये 1989 श्लोकाः सान्ति। संपूर्णदेशे गान्धीमहोदयस्य दाण्डीयात्रायाः प्रभावः, वृन्दावनयात्रा, शान्तिनिकेतनयात्रा, गान्धी–जिन्नाचर्चा इत्यादीनां घटनानां वर्णनम् कृतम्। ऐतिहासिकदृष्ट्या महत्त्वपूर्णामिदं महाकाव्यम्।

3) स्वराज्यविजयः– महाकाव्यमिदं उत्तरजयसत्याग्रहगीता नाम्नापि प्रसिद्धम्। अस्य महाकाव्यस्य 54 अध्यायाः सन्ति। देशस्य विभाजनविषये गान्धीजिन्नाचर्चातः गान्धीमहोदयस्य निर्वाणपर्यन्तं महत्त्वपूर्णाः घटना आस्मिन्महाकाव्ये वर्णिताः।

4) विचित्रपरिषद्यात्रा – खिस्ताब्दस्य 1939 मध्ये त्रिवेन्द्रमित्यत्र राष्ट्रियप्राच्यविद्यापरिषद् आयोजितासीत् तस्याः व्यङ्ग्यपूर्णं वर्णनमस्मिन् काव्ये कृतमस्ति ।

5) शङ्करजीवनाख्यानीयम् – शङ्कर पाण्डुरङ्ग पण्डित इति क्षमादेव्याः पितुर्नाम। संस्कृतस्य गभीराध्ययनेन प्राप्तपाण्डित्येन कुलनामयथार्थतां नीतं तेन। संस्कृतपण्डितानां विषये तस्य मनस्यत्यन्तादर आसीत्। अतः तान् गृहमामन्त्र्य सः सत्करोति स्म। प्रकृत्या बुद्धिमती क्षमा देवी संस्कृतविदुषां पाण्डित्येन सुसंस्कारिता। संस्कृताध्ययनस्य पैतृकं धनमग्रे नयन्ती सा स्वप्रतिभया साहित्यनिर्मितिं कर्तुमपि समर्था जाता। अस्मिन् ग्रन्थे क्षमादेव्या स्वपितुश्चरितमनुष्टुभछन्दासि वर्णितमस्ति। अस्मिन् ग्रन्थे 17 उल्लासाः तथा 840 श्लोकाः सन्ति।

सन्तजनेषु प्रीतिः भाक्तिश्च क्षमादेव्या अन्यदेकं महत्त्वपूर्णं वैशिष्टयम्। अत एव तया महाराष्ट्रेषु सम्भूतान् सन्तजनानधिकृत्य परमभक्त्या महाकाव्यानां रचनाः कृताः। श्रीरामदासचरितं, ज्ञानेश्वरचरितं तुकारामचरितञ्चैतानि महाकाव्यानि रचितान्याङ्ग्लानुवादेन सह प्रकाशितानिच।

6) ज्ञानेश्वरचरितम् – महाकाव्येऽस्मिन्नष्टसर्गाः 406 श्लोकाश्च सान्ति। ज्ञानेश्वरस्य पूर्वपुरुषाणां वर्णनेन महाकाव्यस्य प्रारम्भः भवति। ज्ञानेश्वरस्य समाधिग्रहणपर्यन्तं अनेकानां महत्त्वपूर्णघटनानां वर्णनं रसपूर्णवाण्यात्र कृतमस्ति। अस्मिन्महाकाव्ये शार्दूलाविक्रीडित–उपजाति–मालिनी–शिखरिण्यादिनां वृत्तानां योजना क्षमादेव्या कृता।

7) रामदासचरितम् – त्रयोदशसर्गेषु स्वामी–समर्थरामदासस्य जीवनचरितं वर्णितमास्ति। आस्मिन्महाकाव्ये 618 श्लोकां सान्ति। अत्रापि प्रथमं रामदासस्य वंशपरम्परा वर्णिता। रामदास्य बालक्रीडा, शिक्षा विवाहवर्णनं वैरागैं, पञ्चवटीनिवासः तीर्थाटनं रामदास–तुकाराममेलनं शिवाजीमहाराजेनसह रामदासस्य मेलनमित्यादिनां प्रसङ्गानां वर्णनमास्मिन्महाकाव्ये कृतमस्ति।

8) तुकारामचरितम् – महाराष्ट्रप्रदेशिषु समुत्पन्नेषु सन्तजनेषु दृढप्रीत्या क्षमादेव्या तेषां जीवनचरितमुपलक्ष्य रचितेष्वेकं तुकारामचरितम्। चतुःशताधिकपञ्चत्रिंशत् श्लोकेषु रचितंनवसर्गात्मकमिदं महाकाव्यम्। जन्मविवाहवर्णनादन्तरं ईश्वरदर्शनं, वाणिज्यविनाशः, आध्यात्मिकोत्कर्षः तुकारामेण सह पाण्डुरङ्गस्य भोजनवर्णनं, तुकारामशिवाजीमहाराजमेलेनं, वैकुण्ठगमनवर्णनमित्यादयः महत्त्वपूर्णप्रसङ्गाः वर्णिताः।

9) मीरालहरी – खण्डकाव्यमिदं। शार्दूलविक्रीडितवृत्ते रचितानि 135 पद्यानि सन्त्यत्र। मीरायाः बाल्यं, दिव्यमलौकिकं सौन्दर्यं, बालविवाहः, श्रीकृष्णेन सह मीरायाः तन्मयीभावः, स्त्रीस्वभावस्य मार्मिकं वर्णनं, मीरायाः पत्युरन्तर्द्वन्द्वं क्षमादेव्या सुष्ठु चित्रितम्। लीलया नानालङ्काराणां योजनं पदलालित्यं भावसौन्दर्यमित्यादिभिः काव्यविशेषैर्विराजते काव्यमिदम्।

10) ग्रामज्योतिः– अनुष्टुभछन्दसा रचिताः तिस्रः कथाः सन्त्यत्र। रेवायाः कथा, कटुविपाकः तथा वीरभा। अस्य कथासङ्ग्रहस्य वैशिष्टयमेतद्यत् सत्यघटनाश्रितो·यं कथासङ्ग्रहः। स्वातन्त्रसंग्रामसमये कस्तुरबा गान्धी महोदयया सह गुजरातप्रदेशस्य ग्रामेष्वटन्त्या क्षमादेव्या या स्त्रीशक्तिः साक्षात्कृता तस्याः प्रभावेण रचिता इमाः कथाः। स्वातन्त्र्यप्राप्त्यनन्तरमेतासां नामान्यापि न स्युर्कुत्रचित् परं क्षमादेव्याः लेखनेन एताः कथानायिका अमराः जाता। सत्यघटनाश्रिता एताः कथाः।

11) कथापञ्चकम् –ग्रन्थनामानुसारं पञ्चकथानां सङ्ग्रहोऽयम् 1932 मध्ये रचितः। अनुष्टुभछन्दसि रचितेऽस्मिन् कथासङ्ग्रहे सामाजिकसमस्याश्रिताः कथाः सन्ति। कथानां विस्तृतं विवरणमग्रे भविष्यत्येव।

12) कथामुक्तावली – पञ्चदश गद्यकथानां सङ्ग्रहोऽयम्। भारतस्य विभिन्नप्रदेशेषु निवसन्तः सामान्यजनः नायकनायिकारूपेणात्र चित्रिताः। आधुनिकविषयाः पुरातनसमासप्रचुरगद्यशैली चेति कथासङ्ग्रस्यास्य वैशिष्ट्यम्। विधवानां परित्यक्तांना जीवनस्य यथार्थं वर्णनमत्र वर्तते बहुविधानि स्त्रीपात्राण्यत्र चित्रितानि। कथासङ्ग्रहस्यास्य विस्तृतं विवरणमग्रे भविष्यत्येव। अतः विस्तारभयादत्र न कृतम्।

कथासाहित्येतिहासः–

भारतः कथाप्रियदेशः। वैदिकवाङ्मये ऋग्वेददिग्रन्थेषु कथायाः पूर्वरूपं दृश्यते। यथा वृत्रवधकथा (ऋ.1.32), पुरूरवा–उर्वशी संवादकथा (ऋ.10.95) शुनःशेपकथा (ऐ. ब्रा.प. 3.13–15), श्वेतकेतुकथा (छान्दो. उप. ख. 1–16) रामायणमहाभारतग्रन्थौ कथाभाण्डागारौः। पुराणानि तु कथारूपाण्येव। हितोपदेशपञ्चतन्त्रसदृशाः कथाग्रन्थाः विश्वविख्याताः। अनेकासु विदेशभाषास्वनूदिताश्चैते कथाग्रन्थाः परं कथा शब्दः महाभारतादनन्तरं रूढः। वैदिकवाङ्मये सूक्त गााथाख्यानमन्वाख्यानमिहासार्थवादादय शब्दाः रूढा आसन्। अत एव शुनःशेपकथा शुनःशेपाख्याननाम्ना प्रसिद्धा। महाभारतादनन्तरं बौद्धसाहित्ये कथा शब्दस्य प्रयोगः अर्थकथा (अट्ठकथा) इत्यस्मिन्नर्थे

कृतः। अत्राप्यर्थविवेचनं व्याख्येत्यर्थः। उपदेशात्मकगुणकथेत्यर्थो·प्यनन्तरं रूढः। जैननीतिकथाः ज्ञातधर्मकथा नाम्ना प्रसिद्धाः। प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः। जैनानामुदेशात्मकथाः धर्मकथानाम्ना प्रसिद्धाः।

भामहादिभ्यः विश्वनाथपर्यन्तं बहुभिः काव्यशास्त्रज्ञैः कथायाः स्वरूपं लक्षणञ्च स्पष्टीकृतम्। रसालङ्काराध्वन्यादिनां प्रदीर्घा चर्चा

कृता। परं कथालक्षणेऽनुदाराः दृश्यन्ते एते काव्यज्ञाः। श्रव्यकाव्येषुगद्यकाव्यान्तर्गतकथाप्रकारः एतैर्चर्चितः। तत्रापि बाणभट्टस्य हर्षचरितं कादम्बरी चेतिग्रन्थद्वयं पुरतोऽवस्थाप्य गद्यवाङ्मयस्याख्यायिका कथेतिप्रकारद्वयमुक्त्वा लक्षणानि दत्तानि।ऐतिहासिकवस्त्वाश्रिताख्यायिका काल्पनिकवस्त्वाधारिता च कथा।

संस्कृतानुकूलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका स्मृता।।
न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यापि।
संस्कृतासंस्कृता चेष्टा कथापभ्रंशभाक्तथा।।
(काव्यालंकार 1—25,28)

आनन्दवर्धनेन परिकथासकलकथाख्यायिकाकथा चैते गद्यप्रकाराः वर्णिताः। कथाख्यायिकयोर्विवेचनं तेनं रसबन्धोक्तमौचित्यम—नुसर्तव्यमित्युक्त्वा रसौचित्यस्य विचारः कृतः। (ध्व.लो.3.8,9 वृत्तिः) विश्वनाथेन कथायाः गद्यस्वरूपं तूक्तं परं क्वाचित्वक्त्रापरवक्त्रकं क्वाचिदार्या च कथानिबन्धने स्वीकृता (साहित्यदर्पणम् 6.332,333) हेमचन्द्रेण गद्यस्य सर्वाधिकप्रकाराः सोदाहरणं स्पष्टीकृताः। लघुकथयासह साधर्म्यं भजते खण्डकथा मध्यादुपान्तो वा ग्रन्थान्तर प्रसिद्धमितिवृत्तं यस्यां वर्ण्यते सेन्दुमत्यादिवत् खण्डकथा। (काव्यानुशासन् अ. 8) अत्र कथायाः लघुत्वं स्वीकृतं परं ग्रन्थान्तरविनिविष्टा कथेत्युक्त्वा कथायाः स्वतन्त्ररूपं न लक्षितम्। एवं काव्यशास्त्राविद्भिः कृतलक्षणैराख्यायिकाकथैतयोर्मध्ये भेदकतत्त्वमस्पष्टमिति भाति। आख्यायिकोच्छ्वासादिना वक्त्रापरवाक्त्रादिनाच युक्ता। कथा

तद्विरहिता। केवलमाख्यायिकायाः कथावस्तुनः ऐतिहासिकत्वं कथायाश्च काल्पनिकत्वं स्पष्टम्।

एकोनविशतिशतके आङ्गलसाहित्ये Short Story इत्ययं कथाप्रकारः प्रसिद्धिं गतः। एडगर ॲलन पो इत्ययं लघुकथायाः जनकरूपेण सर्वैः स्वीकृतः। अष्टादशशतकोत्तरद्वात्रिंशत्तमे वर्षे तेन प्रथममेतेन कथातन्त्रेण कथा रचिता। तदनन्तरं तेनैतस्य कथाप्रकारस्य लक्षणमपि दत्तम्। Unity of action and Unity of impressionअल्पपात्रसङ्गैस्संस्काराणामेकत्वमिति एतस्य सार इति वक्तुं शक्यते। एतेन कथानस्य लघुत्वमपि स्पष्टं जातम्। तत्पश्चाद्बहुभिः पाश्चात्यसाहित्यिकैः लघुकथायाः लक्षणं दत्तम्। विंशातिशतके बहुभिः मराठीभाषाविद्भिः हिंदीकथाकोविदैः संस्कृतकथातज्ज्ञैश्च लघुकथायाः लक्षणे प्रयासः कृतः। एतद्विषये 'संस्कृत साहित्यातील लघुकथा'नाम मम पुस्तके प्रदीर्घचर्चा कृता। अतः विस्तारभयादत्र संक्षेपेण संस्कृत–काव्यशास्त्रज्ञानामाधुनिकसाहित्यविदां लघुकथायाः लक्षणस्य विचारः कृतः।

संस्कृतकथानामाधुनिकलघुकथानाञ्च स्वरूपं मनासि निधाय लघुकथायाः लक्षणं मयात्र दत्तम्।

भवेल्लघुकथा या·सौ नैव दीर्घा प्रमाणतः।
वैविध्यपरिपूर्णस्य जीवनस्यैकदेशिका।।
भाववैविध्यसांश्लिष्टा चिरं मननकारिका।
अल्पपात्रप्रसङ्गैर्या प्राप्तलक्ष्याच रञ्जिका।।
मनोरञ्जनसच्छीला कदाचिच्छृङ्खलान्विता।
क्वचिद्गद्ये क्वचित्पद्ये कदाचित्संवादमिश्रिता।।

क्षमादेव्याः कथाविश्वमगन्तुमावश्यकमस्ति लघुकथाया आधुनिकं स्वरूपं ज्ञातुम्। तया कथापञ्चकम्नाम कथासङ्ग्रहे स्पष्टं कृतमासीद्यद् एताः कथाः मया प्रथममाङ्ग्लभाषया रचिताः। अनन्तरमेताः आधुककथातन्त्रेण संस्कृते·नूदिताः। 'ग्रामज्योति कथासङ्ग्रस्य प्रस्तावनायामुक्तमस्ति –'In 1933 she wrote five short stories in

verse and called the collection 'Kathapanchakam'. They are a Unique Contribution to Sanskrit literature because they are written in modern western technique and based on Indian life and problems of the day.' (Introduction of Gramjyoti Page iii,iv)

कथापञ्चकस्य पुरोभागे क्षमादेवी वदति –All the stories contained in this book were originally written in English, three of which have already been published in an English journal. The object of my translation them into Sanskrit was twofold. Firstly to popularise the ancient language which has undoubtedly a greater vocabulary and other where withals of expression Thanany Language. Secondly, I was impelled by the desire of presenting short stries with modern technique in this language. Oceans of fables and tales have been written in Sanskrit, but none of them fulfil the requirements of a modern short story, namely, one main incident, one or two predominating characters, minor incidents culminating in a climax, suspense and finally the denouement. The last of these essentials being arrived at the story must end.(Kathapanchakam) अल्पपात्रैरुत्कण्ठावर्धकप्रसङ्गैश्च कथानकस्य परमोत्कर्षः अन्ततोगत्वा विस्मयचकितघटनया कथायाः समाप्तिरिति क्षमादेव्याः कथावैशिष्टयम्। यथा कथापञ्चकस्य दन्तकेयूरकथायामारम्भे पत्न्यैराधिकायै दत्तस्य वंशपरम्परयागतस्य दन्तकेयूरस्योल्लेखः, होलिकोत्सवनिमित्तेन गणोस्तस्य पुत्रस्य च रङ्गसेकार्थं गमनम्, गमनसमये पुरातनोष्णीषेणोपहास्यतां गच्छामिति चिन्तयित्वा तस्यौदासिन्यं,

द्यूतक्रीडासमये कुसीदस्य रङ्गोर्हस्ते पत्न्याः दन्तकेयूरं दृष्ट्वा तस्यार्वाच्यवचनानि श्रुत्वा शङ्काकुलितस्य मद्यपानेनोत्मस्य च गणोर्गृहमागत्य क्रोधेन पत्नीताडनम्, गणोर्नूतनोष्णीषार्थं मातुः दन्तकेयूरविक्रयणमितिगणोर्बालकेन कृतं रहस्योद्घाटनं पश्चात्तापदग्धस्य गणोर्विलापः ।अत्र कथानकस्य परमोत्कर्षः। कथान्ते गणोर्पिशाचताडनेन राधिकायाः मृत्युरिति विस्मयकारणी घटना। एवं सर्वाः कथारेतेनाधुनिकलघुकथातन्त्रेण रचिताः

ग्रामज्योतिः

कथासङ्ग्रहो॰यं स्वातन्त्रयसङ्ग्रामेण प्ररेतिः। कस्तुरबा गांधी महोदयया सह ग्रामेष्वटन्त्यापण्डिता क्षमादेव्या काश्चन आङ्ग्लशासनेन कृतभयङ्करात्याचारेण स्फुल्लिङ्गवत्तप्ताः स्वातन्त्र्यसमरमखे आत्माहुतिं दातुमुत्सुकाः रणरागिण्यः स्त्रियः दृष्टाः। तासां कथा अत्र चित्रिताः। आस्मिन् पद्यात्मककाव्यसङ्ग्रहे तिस्रः कथाः सान्ति। त्रिषु मयूखेषु विभक्तोऽयं ग्रन्थः। प्रथममयूखः रेवायाः कथा, द्वितीयमयूखः कटुविपाकः तृतीयमयूखश्च वीरभायाः कथा। सर्वाः कथाः कथासारं वक्तुं समर्थेन सुभाषितेनारभन्ते ।क्षमोदेव्याः कथासङ्ग्रेहषु ग्रामज्योतिरियं प्रथमा रचना । एकोनविंशतिशतकोत्तरत्रिशंत्वर्षात् पूर्वं तथा आङ्ग्लभाषया नाटकानि कथाश्च लिखिताः । यदा क्षमया निष्पापजनानामुपरि क्रूररक्षकैः कृतचण्डदण्डप्रहाराः, गान्धीमहोदयस्य आङ्ग्लशासनविरोध्यान्दोलनञ्च दृष्टं तदा तया अष्टादशसर्गात्मकं सत्याग्रहगीतेति महाकाव्यं संस्कृतेन लिखितम् ।आङ्ग्लभाषापेक्षया संस्कृतेन भावाभिव्यक्तिः सरला प्रभावशालिनीति ज्ञात्वा तया संस्कृतेन लेखनमारब्धम् । ग्रामज्योतिरिति कथासङ्ग्रहे सत्याग्रहगीतायाः प्रभावः दरीदृश्यते । स्वतंत्रातान्दोलनसमये क्षमादेवी कस्तुरबागान्धी महोदयया सह गुजराप्रान्तस्य ग्रामेष्वटिता । तत्र तया जने जने गान्धीमहोदयस्यान्दोलनस्य प्रभावः लक्षितः । तेषु जनेषु ग्रामयोषिता अपि सहभागिन्य आसन् । एताः गान्धीमहोदयस्याहिंसादीनि तत्त्वानि स्वजीवने व्रतरूपेणाचरन्त्यः दृढनिश्चयाःउत्साहिन्यश्च महिला अस्य ग्रामज्योतिरिति कथासङ्ग्रहस्य प्रेरणास्रोतरूपाः ।

सत्याग्रहगीताग्रन्थे अस्य कथासङ्ग्रहस्य पार्श्वभूमिर्दृश्यते क्षमादेवी वदति–

पर्यटिषं प्रतिग्रामं सह पत्न्या महात्मनः ।
पांसूदूषितमार्गेण गाढदुर्भिक्षशंसिना ।।
प्रेक्षितं बोर्सदस्थाथ चतुःशालं मया पथि ।
यत्र स्वधर्मतः प्रापुरचिरात्कीर्तिमङ्गनाः ।। सत्य.गीता 17.45,48

क्षमादेव्या प्रत्यक्षीकृतमासीन्नहिलानां दुःखम्

अहो मया महद् घोरं ग्रामेऽस्मिन्नवलोकितम् ।
यदपश्यमहं नारीर्मर्माङ्गेष्वपि हिंसितारः ।। सत्या.गीता 17.54

अस्य कथासङ्ग्रहस्य ग्रामज्योतिरिति नामाभिधानं यथार्थता भजते। क्षमादेव्या ग्रामेषु सत्याग्रहपरायणा स्त्रिशक्तिर्दृष्टा । अस्य कथासङ्ग्रहस्य नायिकाः तेजास्विन्यः दीपशिखाः महात्मनः सत्यदेवस्य (महात्मा गान्धीमहोदयस्य)नीराजनं कुर्वत्य एताः ज्योतिरूपा एव । एतासामग्निशिखानां मयूखाः एव भवितुमर्हन्ति अतः कथाविभागः मयूखरूपेण कृतः । प्रथममयूखःरेवाया : कथा द्वितीयमयूखः कटुविपाकः तृतीयमयूखश्च वीरभा । कथासङ्ग्रहोऽयमनुष्टप्छन्दसा बद्धम् । एतासु कथासु कथानायिकाः स्वानुभवान् कथयन्ति। स्वतंत्रतासङ्ग्रामस्येतिहासे न वोलिखितान्येतासां नामानि परं क्षमादेव्या : कथालेखनेनामराः जाता एताः ।

ग्रामज्योतिः

प्रथमो मयूखः

रेवायाः कथा

देशाभ्युदयसक्तानां तृणाय धनसम्पदः

अस्ति स्वर्णपुरं नाम बार्दोलिबिषयान्तरे।
ग्रामः सर्वजनैस्त्यक्तः कुटुम्बद्वयमन्तरा।। 1।।
वसति स्म चिरायात्र कृषीवलगणो महान्।
सत्याग्रहमयीं बिभ्रद् व्रतदीक्षामनुत्तमाम् ।। 2।।
राजकीयभयोत्पादादात्मरक्षणमिच्छवः।
उपान्तवर्तिनं देशं विविशुस्ते वटोदरम्।। 3।।
ये तु स्थिता स्वगेहेषु ग्राम एव विलम्बिनः।
तेषामेका हि रेवाख्या कृषीवलकुटुम्बिनी।। 4।।
निजावासपरित्यागे विलम्बमकरोदसौ।
अकस्मात् सङ्कटप्राप्त्या न तु वैमत्यकारणात् ।। 5।।
गृहान्निर्गन्तुकामापि स्वयं व्याधिनिपीडिता।
न शशाक प्रयातुं सा ग्रामीणैरितरैः सह।। 6।।
ऋजुभिस्तैरसन्तुष्टैः परित्यक्तो निवासिभिः ।
श्मशानमिव स ग्रामो जज्ञे शून्यभयङ्करः ।। 7।।
चिराय वर्तमानानामज्ञानतिमिरोदरे।
अतृप्तिरेव लोकानां ग्रामोच्छेदमजीजनत्।। 8।।
ज्ञानदीपेन याथार्थ्ये दर्शिते देशनायकैः।
स्वदशायामसंतृप्ता ग्रामोच्छेदेऽपि निर्भयाः।
अहिंसायुद्धसन्नद्धा बभूवुस्ते जिगीषवः ।। 9।।
अप्रमेयबलं युद्धमिदं सत्याग्रहात्मकम्।
परराज्यमहासौधं समूलमुदकम्पयत् ।। 10।।
क्षमासारमहानेष कलिः कैश्चन वत्सरैः ।
भूकरस्याप्रदानेन परां काष्ठामनीयत ।। 11।।

हृदि स्वतन्त्रता नृणां बद्धमूला यदाभवत् ।
तदा सा बहुशाखाभिः प्रासरत् सर्वतोमुखम् ।। 12 ।।
कपोता अपि निर्बन्धं विष्टङ्के सोढुमक्षमा ।
विसृज्य शून्यमावासमुड्डीना जग्मुरन्यतः ।। 13 ।।
ददृशे ग्रामकूपाग्रे चञ्चलो राष्ट्रियध्वजः ।
सत्याग्रहमहावीर्यं सारयन्निव सर्वतः ।। 14 ।।
आसीद् ग्रामस्य रथ्यान्ते रेवाया वासमन्दिरम् ।
तृणपर्णादिभिश्छन्नं खचितद्वारसुन्दरम् ।। 15 ।।
तद्‌गृहस्य पुरश्चैको न चिराच्छकटः स्थितः ।
गृहोपकरणैः स्वीयै रेवायाः परिपूरितः ।। 16 ।।
तस्मिन् यदान्त्यजो भृत्यो निदधे भाण्डमन्तिमम् ।
प्राह शाकटिकं रेवा बोधयन्ती गतिक्रमम् ।। 17 ।।
परिखामनु मार्गेण गच्छन्नवहितो भव ।
मा किञ्चिदपि रे भद्र निपतेद्वस्तु वाहनात् ।। 18 ।।
तथेत्युक्त्वा शाकटिक आदाय प्रग्रहं करे ।
जिह्वाशब्देन महता बलीवर्दावनोदयत् ।।19 ।।
क्षणादेव प्रबुद्धाभ्यां वृषाभ्यां शकटस्ततः ।
कृष्यमाणोऽचलद् दूरं प्रदोषे शैशिरे जवात् ।। 20 ।।
गृहानथ प्रवेक्ष्यन्ती रेवा किङ्करमब्रवीत् ।
अन्धकारमयी शाला दीपमानय गोष्ठतः ।। 21 ।।
वर्धमानेऽन्धकारेऽस्मिन् भित्तिकासु गृहान्तरे ।
पिशाचाकृतिधारिण्यश्छाया नृत्यमिवाचरन् ।। 22 ।।
प्राङ्‌गणाभिमुखीनाच्च गवाक्षादन्तरान्तरा ।
विकिरन् पावनं ज्योतिर्दृश्यते स्म बृहस्पतिः ।। 23 ।।
अथ सा प्राञ्जलिर्भूत्वा नत्वा च गृहदेवताम् ।
विमोक्षं निजदेशस्य प्रार्थयामास भक्तितः ।। 24 ।।
प्रभा शुभग्रहस्यास्य प्रविशन्ती गृहान्तरे ।
धर्मोपदेशवाक्यानि भित्तिगानि व्यभासयत् ।। 25 ।।

तेष्वेकमभिपश्यन्ती पपाठ मनसा स्वयम्।
तस्यैव सुलभा मुक्तिः सङ्कल्पो यस्य निश्चलः ।। 26।।
ततस्तारागणं भूयः पश्यन्त्या गगनाङ्गणे ।
सुलक्षणे मुखे तस्या दीप्यते स्म प्रशान्तता ।। 27 ।।
प्रांशुरासीत् कृशाङ्गी च मनोज्ञा पटुलोचना ।
प्रत्युत्पन्नमतिश्चैषा सङ्कटे क्षिप्रकारिणी ।। 28 ।।
तदीयमभवद् गेहं शून्यशून्यं समन्ततः ।
विना द्वित्राणि वस्तूनि न किञ्चिदपरं स्थितम् ।। 29।।
गवाक्षाभिमुखं पेटी ददृशे ताम्रकोम्भिता।
कोष्ठमध्ये च हिन्दोलः कश्चिदुल्लम्बितः स्थितः ।। 30 ।।
सदीपः किङ्करो यावत् प्राविशत् साब्रवीत्तदा।
अहो इयच्चिरं मुग्धाः कथं नाम स्थिता वयम्।। 31।।
अथ क्षणमभूत्तूष्णीं वीक्षमाणा बृहस्पतिम् ।
भूयोभूयः स्मारयन्तं सुवाक्यं परमार्थकम् ।। 32 ।।
सिद्धये निश्चलश्रद्धा तथा सुदृढनिश्चयः ।
द्वयं चावश्यकं नृणां विमुक्तिं वाञ्छतामिति ।। 33।।
आसीन्न श्रद्धया हीना रेवा ग्रामेभवापि सा ।
भाति स्म जीवनं तस्याः श्रद्धामयमनुक्षणम् ।। 34 ।।
अथ सा व्याहरद्भूयः कियन्मूढा वयं बत ।
इति स्वाभिमुखीकर्त्तुमिच्छन्तीव स्वकिङ्करम् ।। 35 ।।
स तु कोणे क्वचिद्दीपं स्थापयित्वा निरुत्तरः ।
वाक्यमावर्तयन्नन्तस्तदुक्तमेव तस्थिवान्।। 36।।
अथाचिरेण पप्रच्छ स्वामिनीमवशः पटुः।
अपि भूकरदानेन प्रमादः कोऽपि शक्यते ।। 37 ।।
तथेत्युक्ते तया भृत्यो हीनजातिरकम्पत।
करादाने भविष्यन्तं नृपाद्दण्डं विचिन्तयन्।। 38 ।।
ततस्तूष्णीमवस्थाय क्षणं भूयो जगाद सः ।
ननु क्लेशाः पतिष्यन्ति भूकरश्चेन्न दीयते ।। 39 ।।

अन्यच्च वक्तुकामोऽपि वचनाद्विरराम सः ।
अर्थो विवक्षितः सर्वो हृद्येव विलयं गतः ।। 40 ।।
इङ्गितज्ञा तु सा रेवा किङ्करं पुनरब्रवीत्।
जाताः स्मो वयमुन्मुत्ता इति त्वं मन्यसे किमु ।। 41 ।।
दरिद्राश्च भविष्याम इति भीरोबिभेषि किम् ।
प्रतीक्षस्व मनाक् तावदचिरादाप्स्यते जयः ।। 42 ।।
इति प्रत्याययद्भृत्यं श्रद्धया विलसन्मुखी ।
स तु स्वीयकुलाभिज्ञस्तस्थौ भूयो निरुत्तरः ।। 43 ।।
अङ्गुल्या दर्शयन्ती सा ततः शाणप्रसेविके।
कोणस्थे धान्यसम्पूर्णे सानुकम्पा तमब्रवीत् ।। 44 ।।
इतो निष्क्रमणात्पूर्वं स्थापयेदं गृहे तव ।
श्वः प्रभाते प्रयास्यामि स्वपुत्रेण समन्विता ।। 45 ।।
मासत्रयस्य पर्याप्तं धान्यमेतद्भविष्यति ।
इह ते सकुटुम्बस्य जीवनाय श्रमं विना ।। 46 ।।
ततः पश्चाज्जगन्नाथो रक्षणं नः करिष्यति ।
स एव दीनलोकानां शरणं करुणानिधिः ।। 47 ।।
तदाकर्ण्य ह्रिया नम्रः कृतज्ञः किङ्करोऽब्रवीत्।
इदमम्ब प्रभूतं नः षण्मासान्गमयिष्यति ।। 48।।
अल्पमेवाधुना भुङ्क्ते भार्या मे गर्भदोहदात् ।
आसन्नप्रसवा द्वेष्टि स्वादुभक्ष्यादिकं च सा ।। 49 ।।
इति भृत्येन विज्ञप्ता मञ्जूषां समुपेत्य सा ।
तदन्तर्गतवस्त्राणामुद्यताभूद् विवेचने।। 50।।
ततश्चैकमथोष्णीषमुद्धृत्य कनकाग्रकम् ।
भृत्याय सा प्रदित्सन्ती बभाषे दृढनिश्चयम् ।। 51।।
यद्यन्न निर्मितं वस्तु स्वदेशे तदशेषतः ।
इतो निर्गमनात्पूर्वमपनेष्यामि पेटकात् ।। 52।।
अधक्ष्यमिदमुष्णीषं विदेश्याञ्चलदूषितम् ।
कथाशेषस्य मे भर्तुर्नाभविष्यद् यदि प्रियम् ।। 53।।

इदं हि क्रीतमस्माभिः प्रागवात्मजसम्भवात् ।
तदेवाद्य गृहाण त्वं भविष्यत्युपयोगि ते ।। 54 ।।
क्षणं भृत्यस्तटस्थोऽभूद्बद्धदृष्टिर्निरुत्तरः ।
प्रसार्य च ततो हस्तौ पारितोषिकमग्रहीत् ।।55।।
अथोद्धृत्याचिरादेव पोटलीं वस्तुसम्भृताम्।
वसनानि च दित्सन्ती गौरवेण जगाद तम् ।। 56।।
भवेयुरुपयुक्तानि वस्त्राण्येतानि ते गृहे ।
मम तावद्विदेश्यानि रुजन्ति नयनं सदा ।। 57।।
जीर्यन्तु नचिरादेव धार्यमाणानि नित्यशः।
इत्युक्त्वार्भकवस्त्राणि समुद्धृत्य ददौ स्वयम् ।।58।।
इदमौदार्यमालोक्य स्वामिन्या हृष्टचेतसः।
किङ्करस्य कृतज्ञस्य कृष्णमास्यं समुद्बभौ ।।59।।
न त्वजानादसौ हेतुं परित्यागस्य वाससाम् ।
पुत्रयोः शैशवस्मृत्यै रक्षितानामियच्चिरम्।।60।।
अथोद्धृत्य शिशोरेकं शिरस्कं सा न्यवेदयत् ।
प्रागेतत्त्रिशतोऽब्देभ्यः क्रीतं मद्भर्तुरम्बया ।।61।।
नामकर्मणि तन्न्यस्तं ज्येष्ठपुत्रस्य मस्तके ।
तदस्य स्मरणायेदं प्रीत्या रक्षामि सर्वदा ।।62।।
अनैषं हि दिने तस्मिण्डिम्भं प्रथमतो मम ।
सुशोभितं शिरस्केन पूजायै देवमन्दिरम् ।। 63।।
इत्यादिवादिनीं रेवां वेष्टनव्यग्रमानसाम्।
तच्चेष्टितेन विभ्रान्तः किङ्करः पश्यति स्म ताम् ।।64।।
निरमासीदिदं श्वश्रूः स्वयं कर्तनवानतः ।
इत्युक्त्वा तत्पुनः पेट्यां शीर्षकं सा न्यधात्ततः ।।65।।
अन्विष्यन्त्या पुनस्तस्यामचिरादुद्धृतं तया ।
वेष्टितं जीर्णवस्त्रेण हस्तलेख्यं पुरातनम् ।।66।।
निधाय पुस्तकं पुण्यं भित्तिस्थे फलके ततः।
कृताञ्जलिः प्रणम्यैषा श्रद्धालुः पुनरब्रवीत् ।। 67।।

नेदं विस्मरणीयं मे नेतुं रामायणं शुभम् ।
यदेतन्मे क्रमायातं पुण्यवंशे पितुर्मम ।। 68 ।।
विमुच्यते यदा नूनं पुत्रो मे बन्धनालयात् ।
शिबिरे स निरुद्योगः पुराणं मे पठिष्यति ।।69 ।।
पेटीमथ पिधायासौ यावद् गच्छति चुल्लिकाम्।
तावत् स परिपप्रच्छ किमु शय्या प्रसार्यताम्।।70 ।।
सा च प्राह कुमाराय ननु शय्योपकल्प्यताम् ।
अचिरेण परिश्रान्तः स हि गेहमुपैष्यति ।। 71 ।।
दूरे जनपदाध्यक्षो ग्रामान्ते हि कृतास्पदः ।
तमसौ बालनाथस्ते गतो द्रष्टुं पराह्णतः।।72 ।।
इत्यादिष्टो युवा यावत् स्वकार्ये व्यापृतोऽभवत् ।
तावदश्रावि कस्यापि पदशब्दो गृहाद्बहिः ।।73 ।।
आगतो मे कुमारः स्यादिति शीघ्रगतिर्ययौ ।
प्राङ्गणाभिमुखं रेवा पुत्रदर्शनलालसा ।।74 ।।
नामग्राहं निजं पुत्रमाह्वयन्ती ससम्भ्रमम्।
देहलीमनतीत्यैव चुक्रोश चकितेव सा ।।75 ।।
अपि भद्रे तव त्रासः सञ्जातो मम कारणात् ।
इति ग्रामाधिकारी तामपृच्छत्परिविह्वलाम्।।76 ।।
राज्याधिकारिणां दासो ग्रामणीः स हि नूतनः।
स्थितोऽत्र तर्जयन् सत्यव्रतान् वाक्यैर्विभीषकैः ।।77 ।।
कच्चिन्मुक्तस्त्वया भद्रे ग्रामत्यागे दुराग्रहः।
इत्यपृच्छत् सुखासीनः प्रेङ्खायां ग्रामणीब्रुवः।।78 ।।
कम्पयन्तीं शिरस्तूष्णीं स रेवां पुनरब्रवीत्।
गृहेऽस्मिन् दीपमालोक्य द्रष्टुमेव समागतः।।79 ।।
त्यक्ते ग्रामेऽधुना भद्रे मित्रैस्तैर्मूढबुद्धिभिः।
वरं ते भूकरं दत्त्वा स्थितिरत्रैव मन्दिरे ।।80 ।।
तमेवंवादिनं रेवा देशविद्रोहतत्परम्।
क्रोधसंमूर्छिता प्राह ग्रामलोकैस्तिरस्कृतम्।।81 ।।

चिरकालात् परं मौर्ख्यं निजं जानन्ति ये जनाः।
अपि निन्दास्पदं ते स्युः किंनु ते मूढबुद्धयः।।82।।
चिरस्तम्भितभावां तां प्रस्फुरन्तीमुवाच सः।
भद्रे शासनभङ्गेन न कदापि भवेत् सुखम्।।83।।
उपयान्ती पुनश्चुल्लीं मानिनी प्रत्युवाच सा।
सुखालाभेऽपि नः सद्यः सन्ततिः सुखमाप्स्यति।।84।।
विहसन् सावहेलं स गृहीत्वा कोशतस्ततः।
तमाखुपत्रमाचूर्ण्य मुखे विन्यस्य चाब्रवीत्।।85।।
चिरमत्र निवासिन्या वारणीयाः खलु त्वया।
ग्रामस्था इतरे लोका मूढमार्गावलम्बनात्।।86।।
ऋजीषे पिष्टकं दत्त्वा ततः सा प्रत्यभाषत।
अन्यथा चेत् प्रवर्तेरंस्त्रपा तन्मे भवेदिति ।।87।।
पूर्वजास्ते नृपासक्ता धर्ममार्गानुसारिणः।
अद्रक्ष्यन्न्यायभङ्गं चेत् किमवक्ष्यन् विचिन्तय।।88।।
इत्युक्ते तेन सा प्राह तेऽमी मामकपूर्वजाः।
अन्धश्रद्धान्विताश्चेलुरितः पूर्वं यथा वयम्।।89।।
परमार्थो यदा दैवात् प्राकाश्यं हृदये गतः।
मृषा सुखमयो भावस्तदास्माभिरपास्यत।।90।।
मर्मभिद्वचनं वक्त्रात् सावेगमिति निःसृतम्।
तस्यां गलशिराबन्धं व्यदारयदिवाञ्जसा।।91।।
ग्रामणीस्तमथावोचत् किं न लब्धं प्रबोधनम्।
बन्धनादपि सूनोस्ते दुराग्रहमिमं त्यज।।92।।
पिष्टकानि पचन्ती सा प्रत्युवाच सगौरवम्।
मत्सूनोर्बन्धनादेव निश्चयो नः स्थिरीकृतः।।93।।
जयप्राप्तिर्न यावत् स्याद्युद्धेऽस्मिन् सत्यजीविते।
स्थास्यामः सर्वदा भद्र निश्चला अचला इव।।94।।
प्रहसन्नुद्धतं भूयोऽवज्ञया प्रत्युवाच सः।
विचित्रः किल युष्माकं जयप्राप्तौ मतिभ्रमः।।95।।

अथ रुष्टाब्रवीद्रेवा किं वैचित्रामिहास्ति भोः।
भ्रमत्वेन गृहीतं यत्त्वया तद् गौरवाय नः।।96।।
स्वाभिमानात् प्रियं भूयो मनुष्यस्य न विद्यते।
मानभङ्गं स्वदेशस्य यः सहेत स कीटकः।।97।।
बान्धवानर्दितान् दृष्ट्वा राजभृत्यैः कथं बत।
ग्रामेशपदमातिष्ठेत् पापभीरुर्ममात्मजः।।98।।
धिग् ग्रामण्यः पदं नीचं यद्यनेनात्मसंमतेः।
प्रतिकूलं विधेयं स्यात् स्वदेशद्रोहकारिणा।।99।।
त्यक्तं पदमनेनेति बध्येत यदि मे सुतः।
नूनं वयं च बन्दिन्यः स्याम श्वासापराधतः।।100।।
सोऽब्रवीत् स्वहितायव मुञ्चतैनं मतिभ्रमम्।
द्वेषस्य हेतुभूतोऽयं सर्वतो नाशकारिणः।।101।।
ईदृशैश्चेष्टितैर्नूनं निपातो वः स्वतो भवेत्।
मुखद्वेषकृते नासाच्छेदनं न हि युज्यते।।102।।
हितोक्तिं शृणु मे भद्रे पुनरानाय्यतामिह।
स्वगृहोपस्करः शीघ्रं प्रेषितश्चेत्त्वयान्यतः।।103।।
साब्रवीत् सशिरःकम्पमन्तिमेयं निशा स्थितेः।
नव्या जीवनयात्रा श्वो मया प्रारभ्यतेऽन्यतः।।104।।
इत्युक्त्वाधिकृतं रेवा भूकरादाननिश्चया।
चुल्लिकाभिमुखी भूयः पिष्टकं पर्यवर्तयत्।।105।।
अथाचिराच्चिरं जीयाद्राज्यक्रन्तिरिति ध्वनिः।
उत्सिक्तजनवृन्दस्य श्रूयते स्म विदूरतः।।106।।
स पप्रच्छ निशम्यैतं किं तवापि सुतो गतः।
प्रस्थाने मूढलोकानां न्यायभङ्गविधायिनाम्।।107।।
नैवं जनपदाध्यक्षं द्रष्टुमेव गतो हि सः।
इति स्पष्टं ब्रुवाणं तां पृच्छति स्मोद्धतं पुनः।।108।।
गतः किं याचितुं भ्रातुर्मोचनं बन्धनालयात्।
इति पृष्टाब्रवीन्मैवं रक्षितुं देशसेविकाः।।109।।

रक्षिणामतिमत्तानामवस्कन्दादसौ गतः।
सुजातः को नरो मृष्येदपमानं सुयोषिताम्।।110।।
इति प्रत्याह यावत् सा सुस्पष्टं च समासतः।
राज्यक्रान्तिजयोद्घोषस्तावदुच्चैः पुनः श्रुतः ।।111।।
उत्थाय सहसा रेवा तदेव वचनं स्वयम्।
उज्जुघोष सुमन्द्रेण ध्वनिना मन्दसर्पिणा।।112।।
स्वाङ्गुल्या दोलिकापीठं मृदङ्गमिव ताडयन्।
ग्रामणीस्तु पुनः प्राह सावज्ञपरुषं वचः।।113।।
कथं प्रतिबलैर्यूयं वराकाश्चण्डविक्रमैः।
योद्धुं शक्नुथ निःसत्त्वा उत्ताना इव कच्छपाः।।114।।
सोवाच विधिपर्यस्ता वयं चेत् कच्छपा इव।
निजां पूर्वस्थितिं लब्धुं यत्नः कार्यः किलौजसा।।115।।
बलसर्वस्वमाधाय धान्यस्याप्यन्तिमं कणम्।
व्ययीकृत्यापि नः कार्यान्न भवेम पराङ्गमुखाः।।116।।
जन्मसिद्धाधिकारोऽयं स्वातन्त्र्यंनाम देहिनाम्।
वयं च तत् पुनः प्राप्य शीर्षमूर्ध्वं वहामहे।।117।।
निशम्य वचनं तस्याः क्रुद्धं संरक्तलोचनम् ।
हस्तेन हस्तमाहत्य स्थितं भूयो जगाद सा ।।118।।
अप्यर्धशतमब्दानां प्रयतिष्यामहे वयम् ।
यावत् संप्राप्यतेऽस्माभिः स्वराज्यं चिरमीप्सितम् ।।119।।
इत्युदीर्य दृढां वाचं गवाक्षमथ साभ्यगाात् ।
सोऽपि धिक् कत्थनानीति तर्जयन् पुनरब्रवीत् ।।120।।
प्रतिदैवं कथं योद्धुं शूरेणापि प्रगल्भ्यते ।
धर्मभङ्गाय यत्नोऽयमन्याय्यो बालिशश्च वः ।।121।।
चेष्टा विदूषकस्येव प्रेक्षकाणां विनोदिनी ।
केवलं लोकहास्याय प्रवृत्तिर्वो विलक्षणा ।।122।।
कारा वा निजगेहं वा समे द्वे पुरवासिनाम् ।
विरोद्धुं तदमी शक्ताः पर्याप्तधनसम्पदः ।।123।।

ग्रामीणास्तु वयं भद्रे भूमिशस्योपजीविनः ।
षण्मासीमपि नस्त्युक्तुं क्षेत्राणि न हि शक्नुमः ।।124।।
नरनार्यर्भकाः सर्वे मरिष्यामो बुभुक्षया ।
यदि न त्यज्यते द्वन्द्वं न्यायभङ्गविदूषितम् ।।125।।
रिक्तोदरा लुठिष्यामः करीषनिचयोपरि ।
नष्टेषु चान्ततोऽस्मासु देशध्वंसोऽपि निश्चितः ।।126।।
तूष्णीं विलोकयन्ती सा गवाक्षेण बृहस्पतिम् ।
श्रुत्वापि तस्य तीव्रोक्तिं न किञ्चित् प्रत्यभाषत ।।127।।

आदितो भारतस्यास्य दशां चिन्तयति स्म सा ।
यथा बलं विदेश्यानामादौ भारतमान्धयत् ।।128।।
ततो निग्रहपाशेन यथाबध्नाद्भयानतम् ।
पर्यन्ते च विनिष्पिष्य यथा गर्ते न्यपातयत् ।।129।।
यथाकारि जनैर्भूयः पण्डितैर्गाढनिश्चयः ।
यथा च तैः श्रिता तीव्रा तितिक्षा शर्मदायिनी ।।130।।
यथा स्वार्थपरित्यागो दास्यबन्धविमुक्तये।
क्रियते स्म दृढश्रद्धैर्निखिलैर्ग्रामवासिभिः ।131।।
ग्रामेशाय विपक्षाय सर्वस्यास्य निवेदनम् ।
नैष्फल्यमुपयातीति मत्वा तूष्णीं बभूव सा ।।132 ।।
प्रतिकूलमतालम्बी स एकोऽभूदवस्थितः ।
कश्चित् कुसीदकैः साकं ग्रामेऽस्मिन्निर्जनोपमे ।।133।।
अथ यावदुभौ तूष्णीं तस्थतुस्तावदारवः ।
श्रुतः कपोतबालस्य भ्रमन्मातृवियोगिनः ।।134।।
अन्त्यजायाश्च भीतायाः स्वरोऽश्रावि कुतश्चन।
सान्त्वयन्त्या निजं बालं रुदन्तं भृशमन्तिके ।।135।।
क्वचिच्च श्रूयते स्मापि जनस्तोमस्य दूरतः ।
माननार्थं जयोद्घोषो बन्दिनां देशसेविनाम् ।।136।।
प्रद्वारेऽथ हठाद् दृष्टो रेवायाः किङ्करोऽन्त्यजः ।
व्यलम्बतैव देहल्यां दोलायितमना इव ।।137।।

नेत्राभ्यामिव पृच्छन्त्यां किङ्करः संज्ञयाह्वयत् ।
आगतं युवकं कञ्चिद्धवलाम्बरधारिणम् ।।138।।
कृशाङ्गश्च युवा प्राह प्रविश्यैव समद्गदम् ।
मार्तजनपदाध्यक्षः पुत्रं तेऽताडयद् भृशम् ।।139।।
हा धिङ् निरपराधस्य पीडकं धूर्तपापिनम् ।
इति वस्त्रेण सञ्छाद्य स्वमुखं सा स्थिताकुला ।।140।।
कण्ठस्तम्भितवाग्वृत्तिर्युवा भूयो न्यवेदयत् ।
ततश्च पतितः श्वभ्रे शेतेऽद्य हि विचेतनः ।।141।।
क्रन्दन्ती तद्वचः श्रुत्वा न्यस्तहस्ता स्वमस्तके ।
सर्वाङ्गैरवसीदन्ती पपात भुवि सावशा ।।142।।
निनीषुः शिबिकामेकां तं विसृज्यागतोऽस्म्यहम् ।
प्रेष्यतां प्रेष्यतां भद्रे सहायः कोऽपि मे द्रुतम् ।।143।।
इति सम्भाषितं यूनः श्रुत्वा ग्रामाधिपस्ततः ।
विनाशो वः समारब्ध अति जल्पन्नगाद्बहिः ।।144।।
क्व नु लप्स्यामहे यानमिति गद्गदभाषिणी ।
स्वरन्ती च विषादेन समुत्तस्थौ भृशाकुला ।।145।।
निर्दिश्यासनमङ्गुल्या तत्रस्थां शिबिकां युवा ।
दर्शयन्नब्रवीदेतु भृत्यस्तेऽयं मया सह ।।146।।
तथेत्युक्ते तया भूयो वृत्तशेषं जगाद सः ।
निगृह्णन् स्वयमात्मानं वर्णयंश्च प्रयत्नतः ।।147।।
निपातितो यदा गर्ते नृशंसैरात्मजस्तव ।
मया विना न कोऽप्यासीत्तदा तस्यान्तिके जनः ।।148।।
तावच्चं कश्चिदायातो दिष्टया गोपालदारकः ।
ततस्तं स्थापयित्वाहमात्मजस्य तवान्तिके ।।149।।
आगतः शिबिकां नेतुं वक्तुं च भवतीमिदम् ।
पुनस्तत्रैव गन्तव्यमिति खिन्नोऽब्रवीद् युवा ।।150।।
इदं निशम्य निःशब्दा रेवागत्य बहिस्ततः ।
मार्गं मे दर्शयेत्येनं वार्ताहरमवोचत ।।151।।

आयाहि त्वमपीत्येनां वदन्तीमाह किङ्करः ।
न मुच्यतां धनं गेहे पेटिकायामवस्थितम् ।।152।।
मा बिभीहि धनं तत्र स्थास्यत्येव सुरक्षितम् ।
तद्गवाक्षकपाटानि पिधीयन्तां सुसत्वरम् ।।153।।
अथ निर्गमनात् पूर्वमागन्तुयुवकोऽब्रवीत्।
प्रायस्तवात्मजो नेतुं शिबिरं श्वो न शक्यते ।।154।।
क्षताङ्गः सोऽधुना शेते दुर्बलश्चं विचेतनः ।
शिबिरे जीवनं तस्य दुस्तरं हि भविष्यति ।।155।।
वक्तुं सा यतमानापि विवशाभून्निरुत्तरा।
द्वारं तालेन बद्ध्वाच युवकावन्वगात्ततः ।।156।।
अल्पमार्गमतिक्रान्तैः सहसा तैरदृश्यत ।
दलमेकं मनुष्याणां पुरस्तादुपधावताम् ।।157।।
उद्धतालोकनैस्तेषां दृढैश्च पदघट्टनैः ।
सत्वरं किलं साजानात् क एते पुरुषा इति ।।158।।
ग्रामण्या सह वृन्देऽस्मिन्नग्रतः समुपस्थिते ।
रेवा तत्सम्मुखी भूत्वा प्रष्टुकामा व्यलोकयत् ।।159।।
अग्रेसरोऽथ सङ्घस्य भर्त् सयामास निष्ठुरम् ।
परिहासास्पदैर्मूढे कृतं ते बालचेष्टितैः ।।160।।
अथान्यो दीपमुद्धृत्य बद्धभ्रूकुटिरब्रवीत् ।
करदाने विलम्बस्ते कुतो रे दीर्घसूत्रिणि ।।161।।
संस्तब्धावयवां रेवां प्रेक्षमाणां विनिर्भयम् ।
पप्रच्छाग्रसरश्चण्डि करं दास्यसि किं न वा ।।162।।
नेत्येकाक्षरवाक् तस्या राज्यक्रान्ते चिरं जय ।
इति लोकस्य घोषेण प्रतिदध्वान दूरतः ।।163।।
निशम्य तद्बभूवुस्ते क्रुद्धा हिंसितुमिच्छवः ।
रुरोध वीरचर्यास्या वृत्तिमेषां तु पाशवीम् ।।164।।
अथ नेता दलस्यास्य ग्रामाध्यक्षस्य संज्ञया।
सार्थया प्रेरितो हस्तचेष्टाभिस्तामतर्जयत् ।।165।।

शृणु रे चरमं वाक्यं पुनस्ते दीयतेऽवधिः ।
अथापि दुर्दमा चेत् स्या दारुणं विद्धि तत्फलम् ।।166।।
वर्धितामर्षमात्मानं निगृह्य प्रत्युवाच सा ।
क्रियतां क्रियतां स्वैरं निश्चलो निश्चयस्तु मे ।।167।।
नाप्नुयाम वयं यावत् स्वराज्यं चिरमीप्सितम् ।
अप्यब्दशतकं यातु न तावद्दास्ते करः ।।168।।
इत्युक्त्वा निर्भयं रेवा बभूवाथ पराङ्मुखी ।
प्रतस्थे च युवभ्यां सा पुत्रदर्शनकाङ्क्षिणी ।।169।।
आग्रामपथपर्यन्तमपवाक्यानि पृष्ठतः ।
जल्पन्ति स्म नृशंसास्ते सोपहासोरुडम्बरैः ।।170।।
आत्मजानुगतध्याने रेवा तु व्यग्रमानसा ।
नाश्रृणोत्तानि वा हास्यं ग्रामण्यो वा दुरात्मनः ।।171।।
युवककैर्मध्यरात्रेऽथ वहद्भिः क्षतपुत्रकम् ।
ग्रामोपकण्ठमासन्नैरग्निज्वाला विलोकिता ।।172।।
तज्ज्वालाजालमालोक्य पल्लिकायां समुत्थितम् ।
रेवायाः किङ्करो भीतः शब्दमार्त इवाकरोत् ।।173।।
अनिवार्यं वितर्क्येदं द्वितीयस्तत्सहायकः ।
उवाच किञ्चिदस्पष्टं रेवां सञ्जातसाध्वसः ।।174।।
अर्धस्पष्टवचोभिस्तैर्य नोऽस्य हतचेतना ।
मुहूर्तमिव सा स्तब्धा तस्थौ स्थाणुरिवाचला ।।175।।
ततस्ते नचिरात् प्राप्य सर्वे ग्रामचतुष्पथम् ।
मन्दिरस्य पुरस्तस्थुर्ज्वलितस्य समन्ततः ।।176।।
परिविह्वलमात्मानं निगृह्य स्थिरचेतसा ।
चलति स्म द्रुतं रेवा ग्रामाभिमुखमेव सा ।।177।।
जलसम्भृतपात्राणि द्रुतमानीय किङ्करः ।
यावत् सेचनमारेभे तावद्रेवा रुरोध तम् ।।178।।
किं बताद्य जलक्षेपैर्भस्मीभूतगृहोपरि ।
इत्यब्रवीद्विषण्णापि रेवा रुद्धाश्रुलोचना ।।179।।

हा भवत्या न नीतानि रौप्यकुम्भा धनानि च ।
इति रोरुद्यते स्मास्याः किङ्करः करुणस्वरम् ।।180।।
किं धनैर्भाजनैः किं वा विनष्टे मन्दिरे मम।
इति तस्यां ब्रुवाणायामग्निज्वाला व्यवर्धत ।।181।।
पश्यन्ती स्वगृहं रेवा ध्वंसमानं शनैः शनैः ।
व्यचिन्तयदुदासीना स्मृतिलक्षसमाकुला ।।182।।
अहो पञ्चाशदब्देभ्यः प्रागिदं गृहमागमम् ।
अत्रैव मम कौमारं सुकुमारमनैषि च ।।183।।
स्निग्धैर्गे रुजनैरत्र पोषिताहं प्रयत्नतः ।
गृहेऽस्मिन्नेव मे पुत्रौ वत्सलौ संबभूवतुः ।।184।।
पूर्वं गुरुजनाः पश्चाद्भर्ता चात्रैव सेविताः ।
यावज्जीवनयात्रायाः पर्यन्तमगमन्नमी ।।185।।
ज्ञानदीपस्य चात्रादौ हृदि मे प्राविशत् प्रभा ।
निरस्यन्ती तमो बुद्धेर्बोधयन्ती च मां शनैः।।186।।
अथ प्रक्षेप्तुकामं तं जनं भूयोऽग्रतःसरम् ।
निषेधन्ती शिरःकम्पै रेवा प्रोवाच किङ्करम् ।।187।।
सर्वं यातु सखे शोको न कार्यः सेयमाहुतिः ।
कल्पिता सत्यदेवाय प्रेयो नः स हि दास्यति ।।188।।
ज्वालेयं जटिला पुण्या दीपिकेति विभाव्यताम् ।
नीराज्यते ययास्माभिर्बुद्धिनेता बृहस्पतिः ।।189।।
इत्यर्थोदारगम्भीरां देववाणीमिवोद्गताम् ।
श्रुत्वा दृढतरप्रेम्णा भृत्योऽरोदीत् सगद्गद्म।।190।।
आमृशन्ती ततः प्रीत्या स्कन्धमस्य जगाद सा ।
शिबिकां नय ते गेहं संश्रयं निशि देहि नः ।।191।।
निशम्य प्रार्थनामेतामन्त्यजः शङ्कितो भृशम् ।
स्वामिनीमुच्चवर्णां तां पश्यन् मुग्ध इव स्थितः ।।192।।

इति क्षमायाः कृतिषु ग्रामज्योतिराख्येकाव्ये रेवासत्याग्रहो नाम प्रथमो मयूखः समाप्तः।

रेवायाः कथा – सुभाषितम् – देशाभ्युदयसक्तानां तृणाय वनसम्पदः

प्रदेशाविशेषेणारभते कथा। बार्दोलि नाम जनपदस्य स्वर्णपुरग्रामे कृषीवलस्य रेवा नाम्नि कुटुम्बिनी वसति। अत्रस्थः कृषीवलगणः भूकरं दातुमनुत्सुकः। परं राजकीयोत्पातादात्मरक्षणमिच्छवः ते ग्रामं त्यक्त्वा गताः। 'श्मशानमिव स ग्रामो जज्ञे शून्यभयङ्करः।' इति ग्रामस्य वर्णनं कृतं क्षमादेव्या। रेवाऽपि ग्रामं त्यक्तुकामा परं व्याधिपीडिता सा गन्तुं न शक्ता। सत्याग्रहव्रतदीक्षितायाः तस्याः गृहं ग्रामस्य रथ्यान्ते आसीत्। तस्याः पुत्रोोऽपि असहकारान्दोलनेन सम्बद्ध इतिकृत्वा शासकैः कारायां निक्षिप्तः।

तत्रागतं कुत्सितशब्दैः रेवामधिक्षिपन्तं ग्रामध्यक्षं सा उद्दीप्ततेजा श्रावयति स्वराज्यसंग्रामस्य महत्त्वम्। स्वगृहस्थानि सर्वाणि वस्तूनि तया इतरेभ्यः दत्तानि। कानिचन वस्तूनि स्वीकृत्य सेवकेन सह गृहं त्यक्त्वा गन्तुमिच्छति सा। अत्र स्वदेश्यान्दोलनेन प्रेरिता सा विदेशीयवस्तूनि दाहयितुमिच्छति। तदा एकः युवकः तत्रागत्य रेवां कथयति यत् भूकरविरोधात् तव पुत्राः शासकैः पीडितः। तदा ग्रामीणः तां, वदति 'बन्धनादपि सूनोस्ते दुराग्रहमिमं त्यज।' परं दृढनिश्चया सा प्रत्युत्तरति–

मत्सूनोर्बन्धनादेव निश्चयो नः स्थिरीकृतः।
जयप्राप्तिर्न यावत् स्याद्युद्धेऽस्मिन् सत्यजीविते।।

अत्याचारेण क्षतविक्षतं स्वपुत्रं शिबिकामवस्थाप्यसा गन्तुं प्रारब्धा। तदा एव कैश्चनयुवकैः तस्याःगृहं ज्वालितम्। तथापि सा वदति शोको न कार्यः। एषा आहुतिः सत्यदेवाय कल्पिता।

ज्वालेयं जटिला पुण्या दीपिकेति विभाव्यताम्।
नीराज्यते ययास्माभिर्बुद्धिनेता बृहस्पतिः।।

गान्धीमहोदये दृढश्रद्धा, सत्याग्रहः, स्वातन्त्रप्राप्तिपर्यन्त सर्वदुःखसहिष्णुता इति रेवायाः वैशिष्ट्यानि।

ग्रामज्योतिः
द्वितीयो मयूखः
कटुविपाकः
परसेवी निजद्वेषी कुलमृत्युर्न संशयः

अस्ति जालालदेशान्ते ग्रामो मणिपुराभिधः ।
नवोऽत्र ग्रामणीरासीद्विद्विष्टः सुतरां जनैः ।।1।।
बभूवुस्तं विना सर्वे सत्याग्रहपरायणाः ।
देशयुद्धमहावर्ते निमग्ना ग्रामवासिनः ।।2।।
भारतीयैः प्रयासोऽयं परदेशीयशासनम् ।
महाक्लेशकरं नित्यमुन्मूलयितुमास्थितः ।।3।।
अहिंसयैव वार्येत सन्त्रासः परशासितुः ।
इति श्रद्धा दृढा ह्यासीत् तत्पुरस्य निवासिनाम् ।।4।।
आयोधनमिदं दिव्यमहिंसाबलसंज्ञितम् ।
ऐतिहासिककालात् प्राङ् न श्रुतं भारताद्बहिः ।।5।।
अथ मौनव्रतेनैव विरोद्धुं कृतनिश्चयाः ।
अदानाद्भूकरस्यापि संक्षोभमुदपादयन् ।।6।।
अधोगतेः स्वदेशस्य निर्धनत्वस्य चात्मनः ।
हेतुः शासनमन्याय्यमिति ग्रामाश्च जज्ञिरे ।।7।।
आयद्वाराणि संवृत्य युक्त्या भारतवासिनाम् ।
दास्यबन्धं च तान् निन्युः शासका इति ते विदुः ।।8।।
शनैरथ प्रबुद्धास्ते बभूवुर्मुक्तिकाङ्क्षिणः ।
लाभालाभौ समौ कृत्वा तत्यजुश्च स्वपल्लिकाम् ।।9।।
प्रागेव निर्गमात् सूक्ष्मं दुर्दशाहेतुसञ्चयम् ।
अन्वेषितुं प्रवृत्तैस्तैर्हेतुरेकस्तु लक्षितः ।।10।।
उन्मूलनाय तस्यैव यत्नं ते कर्तुमुद्यताः ।
अनाकलय्य सर्वां च हानिं तदनुबन्धिनीम् ।।11।।

ग्रामस्यान्ते पुरा ह्यासीत्तालद्रुमवनं शुभम् ।
यदीयफलतः केचित् कर्षका लेभिरे धनम् ।।12।।
एतन्मद्यरसेनैव विप्लुता बहवो जनाः ।
तेषामधोगतिः पूर्णा नचिरादेव मा भवेत् ।।13।।
इति सञ्चिन्त्य धीमन्तः केचित् स्वार्थपराङ्मुखाः ।
सर्वशश्छेदयामासुः स्वकांस्तालीमहीरुहान् ।।14।।
शून्यकल्पे प्रदेशेऽस्मिन् ह्रस्वस्कन्धावशेषिणः ।
तालीद्रुमा बभुः साक्षाच्छ्मशानस्तम्भसन्निभाः ।।15।।
बभूव ग्रामणीरस्याः पल्लिकाया दुराग्रही ।
प्रतिकूलमतालम्बी शठः स्वार्थैकतत्परः ।।16।।
स्वमताभिनिविष्टः सन्नन्यायपरिपोषकः ।
जल्पति स्मैष भक्तोऽहमन्नदस्यास्मि शासितुः ।।17।।
ग्रामण्यो दारुणस्यास्य पुरो भार्या तपस्विनी ।
कृशाङ्गी देशभक्ता च कम्पते स्म दिवानिशम् ।।18।
युवतिर्दुहिता चास्य सत्याग्रहपरायणा ।
देशसेवासमुत्कापि नाभूत् सिद्धमनोरथा ।।19।।
देशभक्तो बभूवास्य सूनुः स्वातन्त्र्यभूषणः ।
धीरोदारगुणो धीमान् हिंसायुद्धकोविदः।।20।।
जनकेन युवा सोऽयमधिकारावलम्बिना।
क्रोधाविष्टेन वृद्धेन निरकासि गृहाद्बहिः ।।21।।
ततश्चोद्दीपका लेखास्तेन केचित् प्रकाशिताः ।
तदयं द्रोहकारीति रुद्धोऽभूत् सोऽधिकारिभिः ।।22।।
अथ ग्रामाद्बहिर्दूरे संवृत्ता तद्विचारणा ।
तस्य माता स्वसा चापि प्रतिक्षेते स्म निर्णयम् ।।23।।
गतस्य ते पितुर्गेहादानेतुं वृत्तपत्रिकाम् ।
व्यतीता महती वेला नातिदूरेऽपि वर्त्मनि ।।24।।
इत्याह ग्रामणीभार्या सचिन्ता निजबालिकाम् ।
पुनरागमनं भर्तुः पालयन्ती समुत्सुका ।।25।।

आत्मनो ह्रस्वगेहस्य प्राग्रे कोष्ठेङ्गनोन्मुखे ।
इतस्ततः समुद्विग्ना भ्राम्यति स्मावशेव सा ।।26।।
क्षणमात्रमतिष्ठच्च गवाक्षाभिमुखी ततः ।
प्रेक्षमाणा निजां कन्यां धावन्तीं वस्त्रसञ्चयम् ।।27।।
प्रायेण सर्वपत्राणां प्रत्युषस्येव विक्रयात् ।
मन्ये नैकमपि प्राप्य भवेदित्याह बालिका ।।28।।
आसीत् कुमारिका सेयं सविशेषमनोरमा ।
निश्चयोत्साहदर्शिन्या शुभाकृत्या लसन्मुखी ।।29।।
उभे अपि ततस्तूष्णीं क्षणमात्रं बभूवतुः ।
अथ माताब्रवीत् पुत्रीं वस्त्रनिर्णेजनोद्यताम् ।।30।।
शोषयिष्यसि कुत्रेदं बालिके धौतवस्त्रकम् ।
त्वरस्व नचिरादेव पिता ते गृहमैष्यति ।।31।।
वस्त्राणि पाकशालायां लम्बयिष्यामि सत्वरम् ।
तत्रैव तानि शुष्यन्ति नचिराच्चुल्लिकोष्मणा ।।32।।
इत्युक्त्वा धौतवस्त्राणि यत्नेन निरपीडयत् ।
ततस्तानि समादाय प्रविवेश महानसम् ।।33।।
उदासीना ततस्तस्या माता प्राङ्गणमव्रजत् ।
तत्र चैकाकिनी तस्थौ प्रेक्षमाणाभिशङ्कया ।।34।।
शून्ये चतुष्पथे वापि वीथ्यां वा सुविदूरतः ।
न पुमान् न च नारी वा भवति स्माक्षिगोचरः ।।35।।
चाण्डालकुक्कुरा ये च व्यलम्बन्तान्नकाङ्क्षिणः ।
पल्लिकायां पुरा तस्यां नादृश्यन्ताद्य तेऽपि वा ।।36।।
चुकूजुश्चटका ये च कूपाभ्यर्णे पुरा किल ।
डिड्यिरे ते बहिर्ग्रामात् सत्याग्रहपथानुगााः ।।37।।
धान्यक्षेत्राणि शून्यानि विलसन्त्यर्करोचिषा ।
निःशब्दं कथयामासुः कृषीवलपलायनम् ।।38।।
अथोच्छित्तिमिमां दृष्ट्वा शून्यतां च समन्ततः ।
जटिलीभूतसङ्कल्पा स्थिता पर्याकुला हि सा ।।39।।

अथांशुकेन प्रोञ्छन्ती निजहस्तौ कुमारिका ।
उपेत्य मातरं तूष्णीमुवाच मृदुकं वचः ।।40।।
नेष्याम्यहं यदा मातः शिबिरं वस्त्रसञ्चयम् ।
क्रेष्ये तदा नावं रज्जुं न पर्याप्ता पुरातनी ।।41।।
न वेत्तु ते पिता वत्से या सेवा क्रियते त्वया ।
कारालयनिबद्धानां भगिनीनां कृतेऽन्वहम्।।42।।
एकाकिनी बहिर्गन्तुं मया त्वमनुमोदिता ।
इति चापि न जानातु मातेत्यन्वशिषत् सुताम्।।43।।
कथं तातोऽम्ब जानीयात् स हि नित्यं बहिर्गतः ।
कार्यान्मध्याह्नवेलायामिति पप्रच्छ बालिका ।।44।।
मदयन्ती ततो हस्तौ वलितौ चिरसेकतः ।
गृहद्वाराणि पश्यन्ती बद्धानि प्रतिवेशिनाम् ।।45।।
कन्या प्राहाम्ब बालानां संमर्दं द्रष्टुमर्हसि।
कुर्वतां स्वागतं मह्यं प्राप्स्यन्त्यै शिबिरं सदा ।।46।।
यथा संज्ञापिता एव मया ग्रामाविदूरतः ।
अहंपूर्विकयाा द्रष्टुमुपधावन्ति माममी ।।47।।
अथ तां निजगादाम्बा बाले निःसशयं त्वया ।
त्यक्तस्वार्था इमाः सर्वाः सेव्यन्ते देशसेविकाः ।।48।।
प्रत्यागमं तु ते बाले शीघ्रमेवाभिकाङ्क्षिणी ।
स्थास्यामि प्रत्यहं तावदुत्सुका परिशङ्किनी ।।49।।
हन्त मे स्यात् कियान् हर्षः शिबिरे चेदवस्थिता ।
राष्ट्रकार्याण्यहं कुर्यामिति खिन्नाब्रवीत् सुता ।।50।।
कुवन्त्यमूर्यथा सेवां शिबिरे देशसेविकाः ।
तथैव त्वमिहस्थोऽपि करोष्येवार्थवत्क्रियाम् ।।51।।
देशकार्यप्रसक्तानां भगिनीनां हि बालकाः ।
अन्याभिः स्वगृहस्थाभिः पालनीया यथोचितम् ।।52।।
इत्युक्त्वा जननी भूयो निजगादोत्तरे क्षणे ।
शृणु वक्ष्यामि तेऽन्यच्च पिता तेऽत्र निरोधकः ।।53।।

ततो मर्मभिदा वाचा प्रत्युवाच कुमारिका ।
पोतकस्य करे हन्त पुत्रिका इव धिग् वयम् ।।54।।
न चेत् स्वार्थपरस्तातोऽभविष्यत् कातरस्तथा ।
देशभक्तैस्तदा लोकैरलप्स्यत कियत् सुखम् ।।55।।
अलं कथाभिरीदृग्भिर्विषये जनकस्य ते ।
इति तां जननी मन्दं वारयामास दारिकाम् ।।56।।
अथ यावत् क्षणं तूष्णीं योषितौ ते अतिष्ठताम् ।
तावत् कण्ठरवस्तारः श्रूयते स्म विदूरतः ।।57।।
अथ सा दुहितुः कर्णे शङ्कितेवाब्रवीच्छनैः ।
सावधानमये बाले पदशब्दं पितुः शृणु ।।58।।
इत्युक्त्वा त्वरयागच्छत् सकन्याम्बा गृहान्तरम् ।
ततः कर्तनचक्रस्य निकटे निषसाद सा ।।59।।
पुत्रदण्डभयोद्भ्रान्ता यावत् सा जननी स्थिता।
धौतवस्त्राणि संगृह्य सुतासर्पन्महानसम् ।।60।।
ग्रामेशोऽथाचिरात् प्रांशुः स्थूलांसः पीवराननः ।
वृत्तपत्रं करे धुन्वन् प्राङ्गणं समवाप सः ।।61।।
पृच्छन्ती पुत्रवृत्तान्तं नेत्राभ्यामेव गेहिनीम् ।
ग्रामेशोऽवददक्षुब्धो लघीयः किन्न्वतो भवेत् ।।62।।
वर्षमात्रावधिः कारा दण्डो द्विशतमेव च ।
इति हृद्रोगनिष्ठूरं तं वचः पत्न्यै न्यवेदयत् ।।63।।
श्रुत्वा पत्युर्वचः क्रूरं शोकोद्विग्ना बभूव सा ।
ग्रामणीरथ भूयोऽपि मुदन् वाक्यशरैस्तु ताम् ।।64।।
उवाच स्वयमेवैते प्रेरिता यदि बालकाः ।
इत्थं मातृभिरज्ञाभिः किं नु कुर्युरितोऽन्यथा ।।65।।
निन्दितुं राजभृत्यान् प्राक् प्रवृत्तोऽभूत्तवात्मजः ।
ग्रामेशपदवीं त्यक्तुं निरबध्नाच्च मां ततः ।।66।।
ग्रामणीभार्यया सत्या दण्डार्होऽपि त्वया सुतः ।
स्वैरजल्पी प्रहारेण दुष्कार्यान्न निवारितः ।।67।।

अश्लाघत यदा मूढः साहसं देशपापिनाम् ।
अहो धन्यः सुतो मेऽयमिति हृष्टाभवः किल ।।68।।
इत्याक्षिपन्तमाकर्ण्य न सा किञ्चिदभाषत ।
देहल्यां तु स्थिता कन्या तस्मै प्रत्युत्तरं ददौ ।।69।।
स्वार्थत्यागात् तथाप्येते सुदृढाच्च विनिश्चयात् ।
मानास्पदं स्वदेशस्य भवन्त्येव हि साधवः ।।70।।
अथैनां जनकः प्राह नाप्स्यते मुग्धनर्तनैः ।
स्वराज्यमिति सा भूयस्तातं पप्रच्छ दारिका ।।71।।
वर्षोदबिन्दुरप्येकः कल्पते घटपूर्तये ।
इति किं न त्वया प्रोक्तं बालिकाहं यदा स्थिता।।72।।
ग्रामाधिपस्ततोऽवादीद्दीपयन् धूमवर्तिकाम् ।
न खलु प्राप्यते किञ्चित् फलं भूकरवञ्चनात् ।।73।।
कलिरेष समारब्धा भूकरादानपूर्वकम् ।
ततो निष्क्रमणं ग्रामात्ततो मद्यनिरोधनम् ।।74।।
अपि शुण्डापणद्वारं पिधापयितुमीशते ।
मूढात्मान इमा नार्यो ग्रामणीरित्यवोचत ।।75।।
उपविश्य ततः कन्या जननीसन्निधौ भुवि ।
पप्रच्छ युक्तिवादेन जनकं मन्दभाषिणी ।।76।।
बहूनामिह किं मद्यं न जातं नाशकारणम् ।
यत्तदीयकुटुम्बानि जीवन्ति मृतजीवनम् ।।77।।
निर्व्याजवचनं तस्या निशम्य जनकोऽब्रवीत् ।
विनिपातो हि लोकांना भविष्यत्यधिकाधिकः ।।78।।
दुराग्रहिभिरुच्छिन्ने तालीद्रुमकदम्बके ।
नूनं भजति देशोऽयं श्मशानसमशून्यताम् ।।79।।
ईदृग्दुर्जनकूटेन न्यायभङ्गचिकीर्षुणा ।
दुर्यशः प्राप्तुकामेन सोदारस्ते विचेष्टते ।। 80।।
श्रुत्वेदं जटिलीभूतैः सङ्कल्पैर्विवशीकृता ।
वृद्धा तूष्णीं स्थिता नेत्रे मार्जती बाष्पसम्भूते ।।81।।

कारालयगमात् पूर्वं न किं भ्राताधिकारिभिः ।
मुच्येत गृहमागन्तुमुत गच्छेदसौ स्वयम् ।। 82 ।।
इत्युक्त्वा युवतिर्यावत् सन्दष्टरदनच्छदा ।
प्रतीक्षते पितुर्वाक्यं तावदुच्चैर्जगर्ज सः ।।83।।
विशृङ्खलस्तव भ्राता विधर्मा कुलपांसनः ।
देहलीमस्य गेहस्य न पुनर्दूषयेन्मम ।।84।।
प्रस्तौषि चेत् पुनर्भ्रातुः कथामेनां मदग्रतः ।
स्थाप्यसे त्वं दिवारात्रं बद्ध्वा गोष्ठे तमोमये ।।85।।
क्रन्दनोन्मुखमात्मानं निगृह्य जननी स्थिता ।
कन्या च नियतक्रोधा कम्पमाना निरुत्तरा ।।86।।
अथ तस्माद्बहिर्गेहाच्छ्रूयते स्म पदध्वनिः ।
अचिराच्चोपसम्प्राप्तस्तदीयः किङ्करोऽन्त्यजः ।।87।।
स्वाङ्गुलीर्मर्दयन् यावद्देहलीमुप स स्थितः ।
किं वृत्तमिति संपृष्टः स्वामिना तावदब्रवीत् ।।88।।
शङ्कितः कम्पमानश्च किङ्करः स्खलदक्षरः ।
उच्छिन्नाः स्वामिनस्तालीपादपा देशसेवकैः ।।89।।
आः किं सत्यं कियच्छिन्नमिति क्रोशन्तमाह सः ।
सत्यं ब्रवीमि भोः स्वामिन् हन्त सर्वेऽपि नाशिताः।।90।।
श्रुत्वैतद् ग्रामणीर्वाक्यं कोपाविष्टोऽभवद् भृषम् ।
दुरुक्तैर्बहुभिर्भार्यां तनयां चाप्यभर्त्सयत् ।।91।।
विक्रमस्य फलं पश्य पुत्रस्य तव धीमतः ।
अन्येषां गर्दभानां च देशविध्वंसकारिणाम् ।।92।।
पशुताडमहं सर्वास्ताडयिष्यामि पापिनः ।
वेत्रयष्टिप्रहारैस्ते जानन्तु मम पौरुषम् ।।93।।
इत्युक्त्वाभिजगामासौ जवात् प्रद्वारभूमिकाम् ।
जननी कन्यका तावत् साकूतमुदलोकयत् ।।94।।
अथ स ग्रामणीः स्थूलं दण्डमादाय सत्वरम् ।
दुरुक्तानि पुनर्जल्पन्निर्जगाम गृहाद्बहिः ।।95।।

भार्या चानुजगामैनं प्राङ्गणं सुतया सह ।
तस्थौ च तत्र पश्यन्ती पतिमादृष्टिगोचरम् ।।96।।
निष्प्रभं भीषणाकारं दृश्यते स्म वणिक्पथम् ।
उत्खातमिव भूगर्भात पुराणं ध्वस्तमन्दिरम् ।।97।।
लोकानां जयनिर्घोषोः दूरतः प्रतिगर्जताम्।
अवर्धयत भूयोऽपि प्रचण्डत्वं परिस्थितेः।।98।।
अथ प्रविष्टयोर्गेहमचिरान्मातृकन्ययोः।
पूर्वा जगाद हा वत्सं कदा द्रक्ष्याम्यहं पुनः।।99।।
खिन्नां मातरमालिङ्ग्य सान्त्वयामास दारिका।
क्षिप्रमम्ब समग्रोऽपि वत्सरोऽयं गमिष्यति।।100।।
पुनर्गेहमुपैष्यन्तं वर्षस्यापगमे सुतम्।
समालिङ्ग्य द्रुतं हर्षाच्छोकमुक्ता भविष्यसि।।101।।
त्यक्तस्वार्थस्य पुत्रस्य कृतकृत्यस्य धर्मतः।
जननी त्वं प्रमोदस्व धन्यं मत्वा निजं जनः।।102।।
प्रमार्जती निजाश्रूणि कम्पयन्ती च मस्तकम्।
दुःखिता जननी कन्यां प्रत्युवाच सगद्गदम्।।103।।
अद्यैव स्पृष्टतारुण्यो वर्तते वत्सको मम।
नाद्यापि तेन यत्किञ्चिद्यशस्यं किल साधितम्।।104।।
कारालयेषु विख्याता युवानः सन्ति भूरिशः।
मन्येय कथमात्मानं पुत्रि धन्यं तपस्विनी।।105।।
तच्छ्रुत्वा दुहिता प्राह भ्रातापि मम जित्वरः।
कुर्यादेव महत् कार्यं कष्टमेतच्छुभाय नः।।106।।
इति सा सान्त्वयित्वाम्बां दुःखितामथ दारिका ।
समालिङ्ग्य परप्रेम्णा प्रविवेश महानसम् ।।107।।
अतिक्रान्तेऽपि मध्याह्ने नागमद् ग्रामणीर्गृहम् ।
कन्या तु नियते काले प्रतस्थे शिबिरं प्रति ।।108।।
धौतवस्त्राणि संगृह्य यास्यन्तीमम्बिकाब्रवीत् ।
विलम्बो न त्वया कार्यः पुनरागमने क्वचित् ।।109।।

मार्गस्ते दुर्गमः शून्यः शीघ्रमेति च यामिनी ।
आत्मानं यत्नतो रक्षेः प्रमादं मा कृथा इति ।।110।।
भानोरस्तमयात् पूर्वमागमिष्यामि निश्चितम् ।
किमस्ति मयि यच्चोर्यमेतल्लोहदलं विना ।। 111।।
इति सा ब्रुवती कण्ठेऽदर्शयत् क्षुद्रभूषणम् ।
यत्रासीत् खचितं गान्धेः प्रतिरूपं महात्मनः ।।112।।
एवमुक्तवतींकन्यां माता पुनरबोधयत् ।
भवितव्यं त्वया गेहे प्रागेव पितुरागमात् ।।113।।
अम्ब तालीवनव्यग्रस्तातोऽन्यच्चिन्तयेत् कथम्।
इत्युक्त्वा परिहासेन सत्वरं निर्जगाम सा ।।114।।
अथ दीर्घायमाणेऽह्नि ध्यायन्ती गृहिणी स्थिता।
ताडयन्तं पतिं ग्रामान् सन्त्रस्ताननतिनिष्ठुरम् ।।115।।
आसेधं निजपुत्रस्य सहान्यैर्देशसेवकैः ।
न्यायाध्यक्षेण चामीषां विचारं हास्यकारकम् ।।116।।
उद्विग्नजनसंमर्दं शुण्डापानाद्बहिःस्थितम् ।
कोपाविष्टवणिग्लोकैः सेविकांना विडम्बनम्।।117।।
तासां च याचनां नम्रां मद्यविक्रयवारणे ।
अन्ते पराभवं निन्द्यमुद्दण्डैरधिकारिभिः ।।118।।
अहिंसाविग्रहस्यान्यान् गुणान्नैकानविश्रुतान् ।
विदेशयोधिनां घोराद्भिन्नान् संग्रामपाटवात् ।।119।।
पतिर्मे बान्धवान् हन्तुं प्रवर्त्तयति रक्षकान् ।
तदीयहृदयं रूग्णं दुर्भावेन च दूषितम् ।।120।।
दुष्कर्मणोऽस्य मे भाति परिणामो भयङ्करः ।
इत्यादि चिन्तयन्ती सा जातकम्पाभवद्भृशम् ।।121।।
कम्पमानकरेणाथ भालस्वेदममार्जयत् ।
विवशा लुप्तदृष्टिश्च मूर्छाला च बभूव सा ।।122।।
कोलाहलः समुद्भ्रान्तलोकवृन्दस्य दूरतः ।
मूर्छायाः क्षणिकायास्तामचिरादुदबोधयत् ।।123।।

भविष्यति विपत् काचिदिति प्रागेव बिभ्यती ।
विलम्बेन पुनः पत्युर्नितरां शङ्किताभवत् ।।124।।
असकृत् प्राङ्गणं यान्ती वीक्षते स्म विदूरतः ।
अपि नाम सुतागच्छेत् प्रागेव जनकादिति ।।125।।
अथ प्रादोषिकीच्छाया घनीभूता वणिक्पथे ।
दुःखसन्तमसं तस्या हृदये समवर्धयत् ।।126।।
अथ सा गृहमावृत्य दीपमादीप्य कोष्ठके ।
वह्निं प्रज्वलयामास चुल्लिकायां महानसे ।।127।।
यावत् पाको न चारब्धस्तावदेव शनैः शनैः ।
बहिर्वणिक्पथे शून्ये श्रूयते स्म पदध्वनिः ।।128।।
अश्रृणोदथ यावत् सा साध्वसात्तं सवेपथुः ।
बभूवोच्चतरः शब्दस्तावदासन्नगोचरः ।।129।।
सत्वरं निर्गता गेहाद् यत्नबद्धकवाटका ।
यदा सा प्राङ्गणं प्राप ददर्श स्वामिनं तदा।।130।।
तदीयं मुखमालोक्य दुष्कृत्या हृष्टमुज्ज्वलम् ।
भयग्रस्तावसीदन्ती स्थविरा विवशाभवत् ।।131।।
अथासौ कम्पमानाङ्गी साडम्बरमवेदयत् ।
निरुध्य जाल्मकूटं तत् स्थापितं गुल्मके मया।।132।।
लुठन्तु तत्र ते रात्रौ सङ्कीर्णा मेषयूथवत् ।
इति ग्राम्यवचो जल्पन् विकृतं प्रजहास सः ।।133।।
तन्निशम्य मनस्तस्या अवसन्नमिवाभवत् ।
सर्वाङ्गवेपथुर्जातः सा चाभुत्पतनोन्मुखी ।। 134।।
जगाद ग्रामणीर्भूयः कितवाः शिक्षिता इमे ।
प्रवर्तनमकार्येषु फलत्येवमिति क्षणात् ।135।।
निर्विण्णा सा निरालापा स्थिता यादवधोमुखी ।
तावत् पुनरसौ तस्या मौनेन प्रेरितोऽब्रवीत् ।।136।।
कृतघ्नबुद्धयस्तेऽमी शासकं धर्षयन्ति ये ।
शरण्यमन्नदातारं यं विना मृत्युरेव नः ।।137।।

इत्युक्त्वा वेदिकापीठे ग्रामेश उपविश्य सः ।
पांशुलं पादुकायुग्मं चरणाभ्यामवामुचत् ।।138।।
शासकोऽस्तु परं सोऽयं विधर्मी च विनिर्घृणः ।
इत्युवाचात्मनात्मनं प्राज्ञी मौनमुपाश्रिता ।।139।।
ग्रामणीः पुनरेवाह महिलाशिबिरं प्रति।
दीयतेऽद्याभ्यवस्कन्दस्तत्र नैकापि गण्यते ।।140।।
कुशला रक्षिणो भान्ति येऽमी पुण्यपुरागताः ।
निग्रहीष्यन्ति ते शीघ्रं छाद्मिका देशसेविकाः ।।141।।
असकृत्ताडनैरेव शिक्षणीयाः खला इमाः ।
इत्यसौ परुषं जल्पन्नूरूमास्फालयन्निजम् ।।142।।
पक्षं रक्षितुकामपि त्रस्तानां ग्रामवासिनाम् ।
निरूत्तरैव सा तस्थौ तदात्याहितशङ्किनी ।।143।।
यथापूर्वमवज्ञाता निजभर्त्रा तपस्विनी ।
अनन्यशरणा द्वारस्तम्भमाश्रित्य सा स्थिता।।144।।
उत्थाय ग्रामणीः पीठात् पर्यक्राम्यदितस्ततः ।
चिन्तयन् दिनवृत्तान्तं परितुष्टः स्वकर्मभिः ।।145।।
सहसाथ विरम्यासौ पप्रच्छ सहधर्मिणीम् ।
कुत्रास्ते दुहितेदानीं मृष्टान्नं किं पचत्यसौ ।।146।।
अस्पष्टमिव सावादीत् किमपि स्खलदक्षरैः ।
ततो नियम्य चात्मानमुपासर्पन्महानसम् ।।147।।
भर्त्ता बुध्येत कन्यायाः शुश्रूषां सेविकाजने ।
इति शङ्काकुला वृद्धा किंकार्यविधुराभवत् ।।148।।
शीघ्रमेवाभिकाङ्क्षन्ती दारिकाया निवर्त्तनम् ।
आलोकते स्म सोत्कण्ठा महानसगवाक्षतः ।।149।।
शून्यकैदार्यविस्तारे वीक्षमाणापि दूरतः ।
पर्याकुलमना वृद्धा न ददर्श कुमारिकाम् ।।150।।
नैराश्योपहतेवासौ परावृत्ता गवाक्षतः ।
वर्तते स्म स्थिरश्वासा सावधाना बहिर्ध्वनौ ।।150।।

अथ केचित् क्षणाः कृच्छ्रं व्यतिजग्मुः शनैः शनैः ।
तावच्च शुश्रुवे बाह्ये सलिलस्फालनध्वनिः ।।151।।
स्नानानुलेपनव्यग्रो भर्ता मेऽद्य हि वर्तते ।
मन्यमानेति वृद्धासौ किञ्चदुच्छूसिताभवत् ।।152।।
अन्तरा दारिका मे चेन्निवर्तेत गृहं तदा।
शक्नुयान्निभृतं कोष्ठे प्रवेष्टुमनवेक्षिता ।। 153।।
आत्मानं सान्त्वयन्त्येवं सुतागमनिरीक्षिणी ।
बभूव स्थविरा शीघ्रं पाकनिष्पादनोद्यता ।।154।।
अतिक्रान्तेऽपि होरार्धे दुहिता नाजगाम सा ।
वृद्धा च चुल्लिकापार्श्वे खिन्ना तूष्णीमुपाविशत् ।।155।।
ग्रामाधिपः कृतस्नानः क्रोशति स्म पराङ्गणात् ।
इयच्चिरं युवां नार्यौ कुरुथः किं महानसे ।।156।।
सिद्धप्रायः किलाहारः स्वामिन्नातिविलम्ब्यते ।
इत्याख्यान्ती स्खलद्वाक्यैरन्नपात्रमपातयत्।।157।।
पप्रच्छ ग्रामणीर्वक्रो भ्रातुः किं बन्धनोत्सवम् ।
प्रवर्तयितुमिच्छन्ती महापाके त्वमुद्यता ।।158।।
अथाङ्गनं बहिर्गत्वा ग्रामण्यः सहधर्मिणी ।
इतिवक्तव्यतामूढा तस्थावुपहतेव सा ।।159।।
पुस्तकाद् गणंनां कुर्वन् ग्रामणीः सहसाब्रवीत्।
अद्यापि भोजनं कस्मान्न त्वया परिवेष्यते ।।160।।
भार्यामवचनां दृष्ट्वा सूक्ष्मं तामवलोकयन्।
लक्षयामास तां त्रस्तां सोत्प्रासं चाब्रवीत्ततः ।।161।।
अपि ते तनयं वीरमनुशोचसि बन्दिनम् ।
तेनैव हि कृता शय्या शेतां तदुपरि स्वयम् ।।162।।
लिखितं यदि तद्भाले दुःखभागयमस्त्विति ।
सर्वं च तेन सोढव्यं देशसेवां चिकीर्षुणा ।।163।।
इति भार्यावचः श्रुत्वा ग्रामणीश्चकितोऽभवत् ।
न कदापि त्वया पूर्वमुक्तमेवं हि निश्चितम् ।।164।।

संज्ञया भर्त्सयन् भार्यां सावज्ञं विजहास सः ।
मुहूर्तं च तयोर्मध्ये मौनव्रतमराजत ।।165।।
नवसारपुराद्दूरे श्रूयते स्म जयध्वनिः ।
वन्दे मातरमित्यादिः क्षुब्धलोकैर्विजृम्भितः ।।166।।
अथ यावन्निमग्नोऽभूत् स्वकार्ये ग्रामणीः पुनः ।
अतिष्ठत् स्थविरा तावद्विदूरे बद्धलोचना ।।167।।
सुतां प्रतीक्षमाणापि चिराय रजनीमुखे ।
तदागमनचिह्नं सा न ददर्श मनागपि ।।168।।
अथाचिराद्बभौ दूरे मानुषी काचिदाकृतिः ।
अवलोक्य च तां वृद्धा हृदये कम्पिताभवत् ।।169।।
तां च यत्नेन पश्यन्ती निदध्यौ सा यथा यथा ।
शिथिलानि तदङ्गानि सीदन्ति स्म तथा तथा।।170।।
क्षणान्ते निर्बभौ कश्चित्तरुणः परिवेष्टितः ।
आपादमस्तकं वस्त्रैः शुभ्रैः खद्दरनिर्मितैः ।।171।।
आसीद्युवा कृशाङ्गोऽसौ कुमारः प्रतिवेशिनः।
पारतन्त्र्यात् स्वदेशस्य सोत्कण्ठं मोक्षमिच्छतः ।।172।।
सत्यव्रतेन बद्धस्य पीडितस्याधिकारिभिः ।
त्यक्तक्षेत्रनिवासस्य वरोदाभूप्रवासिनः ।।173।।
प्रत्यासन्नं युवानं तं पप्रच्छ ग्रामणीर्हसन् ।
स्वक्षेत्रान्निभृतं धान्यं किमु रे नेतुमागतः ।।174।।
कुमारः सशिरःकम्पं प्रत्युवाच सगौरवम् ।
नैवमार्यास्ति सन्देशस्तमहं वक्तुमागतः।।175।।
दुहिता भवदीयाद्य मस्तके भूरि विक्षता।
आर्ता रुग्णालये शेते नीता सत्याग्रहानुगैः ।।176।।
श्रुत्वेदं ग्रामणीरुच्चैराक्रोशद्विस्मितो भृशम्।
उन्मत्तोऽसि किमु ब्रूषे दुहिता मे क्षतेति यत् ।।177।।
अवस्कन्दे कृते देशसेविकाशिबिकोपरि ।
अङ्गना तत्र नैकापि गण्यते स्माधिकारिभिः ।।178।।

अकुर्वत्योऽपि निर्दोषा मद्यविक्रयवारणम् ।
योषितोऽग्न्यस्त्रकुण्ठाग्रैर्लगुडैश्च प्रताडिताः ।।179।।
वज्राहतेव वृद्धा सा चक्रन्दासह्यवेदना ।
हा वत्से किमिदं घोरमकस्मात्त्वामुपस्थितम् ।।180।।
ग्रामणीरुद्धातोऽपृच्छत्तरुणं वृत्तवाहकम् ।
किं कार्यं दारिकाया मे मूढैस्तैः पापसेवकै ः ।।181।।
ग्रामाधिपस्य संक्षोभमनादृत्याह दारकः ।
तत्कालं सापि तत्रासीत् सेविकाशिबिरे खलु ।।182।।
क्षालितानि हि वस्त्राणि सेविकानां तयान्वहम् ।
तयैव शिशवस्तासां यत्नाच्च परिपोषिताः ।।183।।
दृढीकर्तुं कथामेतां ग्रामशोऽथ व्यलोकयत् ।
तूष्णीमेव स्थितां भार्यामवष्टब्धामधोमुखीम् ।।184।।
न किं स्पष्टीकरोष्येतदित्याक्षिप्ता तपस्विनी ।
त्यक्ताशा प्रत्युवाचैनं सत्यं तत् सकलं खलु ।।185।।
क्रोधाविष्टः पतिस्तस्या जगादोच्चैरनार्यवत् ।
ब्रूहि कस्यानुमत्या वा सुता मम बहिर्गता ।।186।।
निश्चला सा स्थिता यावत्तूष्णीं पर्यश्रुलोचना ।
पप्रच्छ ग्रामणीस्तावत् तां तदेव पुनःपुनः।।187।।
श्रृण्वती गर्जनाटोपं स्वामिनोऽतिभयङ्करम् ।
हृतवाक्या यदा तस्थौ युवा वक्तुं तदोद्यतः ।।188।।
पितुराज्ञामवज्ञातुं नापारयत बालिका ।
तत् सिषेवे यथाशक्ति सेविकाः स्वार्थनिस्पृहाः।।189।।
ग्रामणीरथ चुक्रोश वक्रीकुर्वन्निजाननम् ।
विरूपयंश्च तद्भूयः किमुन्मत्ताभवेत् सुता ।।190।।
युवासौ प्रत्युवाचैनं भवता ह्यधिकारिणाम् ।
उपकारः कृतो देशबन्धूनां परिपीडने ।।191।।
मस्तकं भेदयित्वामी बालायास्तेऽधिकारिणः ।।
भवतः प्रत्युपाकार्षुरहो दैवस्य चेष्टितम् ।।192।।

निर्दोषा ताडिता हन्त बालिका भग्नकर्परा।
समावृता वयस्याभिरास्ते सा मरणोन्मुखी ।।193।।
दारिकासौ निशामेतां प्रायशो नोत्तरीष्यति ।
इत्यप्याशङ्क्यते हन्त भिषजा तां चिकित्सुना ।।194।।
चक्रन्द स्थविरा यावच्छ्रुत्वेदं दुःखविह्वला ।
शापौघो निर्ययौ तावन्मुखाद्भर्तुर्निरर्गलः ।।195।।
दुरुक्तानि बहून्येष ग्रामेश उदचारयत्।
देशबन्धून् समूद्दिश्य सत्याग्रहपरायणान् ।।196।।
खण्डशः क्षुद्रवाक्यानि गर्हणानि पुनः पुनः ।
क्रोधावेशेन चोद्भ्रान्तचेता इव जजल्प सः ।।197।।
विसिष्मिये च वाग्वीर्यं कर्मशौण्डीर्यमेव च ।
अव्याहतं पुरा यन्मे तदद्य क्व पलायितम् ।।198।।
भार्यास्याशनिविद्धेव निपपात महीतले ।
उद्धृत्यच कुमारोऽसौ गृहान्तस्तां न्यवेशयत् ।।199।।
दूरादुद्भ्रान्तलोकस्य हाहाकारोऽति शुश्रुवे ।
प्रताडनध्वनिश्चापि मन्दमन्दोऽन्तरान्तरा ।।200।।

इति क्षमायाः कृतिषु ग्रामज्योतिराख्ये काव्ये कटुविपाको नाम कथा द्वितीया समाप्ता।

***

कथासारांशः

'परसेवी निजद्वेषी कुलमृत्युर्न संशयः' इत्येतेन सुभाषितेन कथायाः प्रारम्भो भवति। जलालदेशान्तर्गतमणिपुराभिधे ग्रामे निवसतः ग्रामप्रमुखस्य देशभक्तिपरायणभार्यायाः कथेयम्। तस्मिन् ग्रामे तं ग्रामणीं विहायान्ये सर्वे सत्याग्रहपरायण आसन्। अहिंसाशस्त्रेण योद्धुं तत्पराऐते ग्रामवासिनः।

ग्रामस्यान्ते एकं तालद्रुमवनमासीत्। तस्माद्वनात् केचन कर्षकाः मद्यनिर्माणं कृत्वा धनं प्राप्तुवान्ति स्म। एतेन मद्यसेवनेन बहवः ग्रामवासिनः मृताः। अतः केचन धीमन्त एतं वनं छेत्तुमुद्युक्ताः आसन्। परं दुराग्रही ग्रामणीः वनछेदनं नैच्छत्। तस्य भार्यया दुहित्रा पुत्रेणच

देशकार्याय स्वजीवनं समर्पितमासीत्। तस्य पुत्री प्रतिदिनं कारागृहस्थितबान्धवानां वस्त्राणि प्रक्षाल्य धौतवस्त्राणि देशसेविकानां शिबिरं प्रापयतिस्म। तस्य देशसेवारतेन पुत्रेण शासनविरोधिनः लेखाः प्रकाशिता आसन्। अतः स द्रोहकारीति मत्वा आंङ्ग्लाधिकारिभिः निरुध्दः। एतं वीरपुत्रं दुर्विनितेन ग्रामप्रमुखेण गृहाद्बहिर्निष्कासित आसीत्। तस्य देशभक्तस्य माता भगिनी च न्यायालयस्य निर्णयं प्रतीक्षेते। तदा ग्रामणीः वृत्तपत्रं दर्शयन् पुत्राविषयकं निर्णयं श्रावयति—'वर्षमात्रावधिः कारा (63) दण्डो द्विशतमेव च'। तच्छ्रुत्वा तस्य भार्या दुःखव्याकुला जाता।

याः ग्रामस्थाः स्त्रियः मद्यापणं पिधापयितुमिच्छन्ति तासु ग्रामप्रमुखस्य पत्न्यप्यासीत्। अकस्मात् कश्चनसेवकः तत्रागत्य दुर्वार्तां श्रावयति, 'देशसेवकैः स्वामिनः तालीवनमुच्छिन्नमिति।' क्रोधान्धः ग्रामणीः देशसेवकान् दुरूक्तैरभर्त्सयत्। 'पशुताडमहं सर्वांस्ताडयिष्यामि पापिनः' इत्युक्त्वावनं प्रत्यगच्छत्। तस्य पुत्र्यपि नित्यक्रमानुसारं देशसेविकानां शिबिरं गच्छति।

मद्यविक्रयणवारणाय मद्यापणस्य पुरतः स्थिताः देशसेविकाः अधिकारिभिः निष्ठुरं ताडिताः इति ग्रामणीः गृहमागत्य स्वपत्नीं सोपहासं सगर्वं च श्रावयति। यदा सः पुत्र्याः विषये तां पृच्छति तदा पुत्र्याः देशसेवाकार्यं गोपयितुं सा पाकशालायां कार्यव्यग्रास्तीत्युक्तवती। असमर्था सा सत्यमिदं चिरकालं गोपयितुम्। तदैव एकेन देशसेवकेन तत्रागत्योक्तम् मद्यापणस्य पुरतः मद्यविक्रयणवारणाय स्थिताः महिलाः अधिकारिभिः भृशं ताडिताः। तासु भवदीया दुहितासीत्। चण्डाघातेन भग्नशिरा सा सत्याग्रहानुयायिभिः रूग्णालयं नीता। मरणोन्मुखी सा प्रायः रात्रिमपि नेतुं न शक्नुयादित्यनेन वाक्येन वज्राहतेव तस्याः माता असहयवेदनया विह्वला जाता। इमां वार्तां श्रुत्वा ग्रामणीः विस्मितोऽभूत्। क्रोधावेशेन सत्याग्रहपरायणान् देशसेवकान् उद्दिश्य दुरुक्तान्यवोचत्।

दूरतः सैनिकानां प्रताऽनध्वनिः देशसेवकानां हाहाकारध्वनिश्च श्रूयते। इत्यत्रा कथा समापिता।

***

ग्रामज्योतिः

तृतीयो मयूखः

वीरभा

दुर्जनोऽपि सतां सङ्गाद् भवत्येव हि सज्जनः

कृते प्रधर्षणे स्त्रीणां कदाचित् पुररक्षिभिः ।
वीरभा तत्प्रतीकारं दिनत्रयमचिन्तयत् ।।1।।
अतिनिन्द्योऽयमाचारो मत्तानामधिकारिणाम् ।
बोर्सदस्य प्रजामध्ये क्रोधानलमजिज्वलत् ।।2।।
असह्ययोधनारम्भाद्वीरभा हि सभर्तृका ।
निजग्रामं परित्यज्य प्रोषिताभूत् पुरान्तरे ।।3।।
वटोदरमिति ख्याते राजन्वति मनोरमे ।
प्रतिवेशजनैः साकमल्पसम्भारसंयुता ।।4।।
तदीयजननी वृद्धा नवाग्रहविमोहिता ।
मार्गं तरुणलोकानां स्वयमप्यन्ववर्तत ।।5।।
निर्व्याजमकारं वक्त्रं वीरभायाः कृशाधरौ ।
तेजस्विनीव तन्नेत्रे धैर्यमस्या असूचयन् ।।6।।
उन्नता मां लाङ्गी च नताङ्गी च बभूव सा ।
लोकोत्तरबलाढ्या च प्रसहिष्णवपुर्गुणा ।।7।।
प्रगल्भा च प्रतिद्वन्द्वे बलिभिः पुरुषैरपि।
व्यस्मापयज्जनान् सर्वान् स्वया सा कायसम्पदा ।।8।।
तथा हि जातु सा रात्रौ निर्गते निजभर्तरि ।
लुण्ठाकेन प्रविष्टेन युद्ध्वा तं निरकासयत् ।।9।।
ग्रामे तां जनताशंसद्वीरपौरुषशालिनीम् ।
दोषैकदृग् जनोऽप्यस्या बहुमेने महद्बलम् ।।10।।
तथापि न च सा स्त्रीणां नापुषद् गुणसम्पदम् ।
सर्वानप्यातिथेयी सा जनानार्तानुपाचरत् ।।11।।

तदात्मजो महापुर्यां विदेशाम्बरविक्रयम् ।
निषेधति स्म यद् दृष्ट्वा वणिजः कूटमाचरन् ।।12।।
तथाहि ते स्ववाणिज्यमन्यदशं निनीषवः ।
निषिद्धैः पूरयामासुर्यन्त्रयानानि वस्तुभिः।।13।।
निरोत्स्यन् यानसञ्चारं तदग्रे सुकुमारकः ।
शयित्वाथ निजप्राणान् देशकार्ये व्यसर्जयत् ।।14।।
वृत्तान्तं मरणस्यास्य सूनोराकर्ण्य वीरभा ।
शोकावेगेन संस्तब्धा निरालापाभवच्चिरम् ।।15।।
कालेन जीर्णसंवेगामतिक्रम्य च वेदनाम् ।
सान्त्वयामास भर्तारं निजया सा तितिक्षया ।।16।।
मातृहीनोऽर्भकः पौत्रस्तनुजं प्रति वर्तते ।
दिष्टया वंशाङ्कुरः सोऽयं दत्तो नः खलु दैवतः।।17।।
तदारभ्य शिशुं पार्श्वे सर्वदा विनिवेश्य सा ।
आदिनान्तं बभाषे सा दध्यौ वा नियतात्मना ।।18।।
स्थितायामपि दोलायां तस्याः शयनसन्निधौ ।
अस्वपीत् सर्वदा डिम्भो वीरभाहस्तसंश्रितः ।।19।।
वत्सलः पौत्रनामायमावयोः पुत्र एव हि।
इत्येवं चिन्तयन्ती सा पुत्रशोकममर्षयत् ।।20।।
यदास्या हृदि संकल्पः परिपक्वः शनैः शनैः ।
तदा कल्पयितुं नारीप्रस्थानं निश्चिकाय सा ।।21।।
सत्याग्रहानुरूपं स्यात् प्रस्थानं किल नीरवम् ।
विरोद्धमतिबीभत्सं धर्षणं रक्षिभिः कृतम्।।22।।
कार्यं तत् खलु दुःसाधमपायि च भविष्यति ।
ग्रामे ग्रामे हि गन्तव्यं सम्मेलयितुमङ्गनाः।।23।।
योऽत्याचारः कृतो घोरः प्रतिग्रामनिवासिषु।
स बलात् प्रत्यवस्थेयः क्रान्त्वा विघ्नशतान्यपि ।। 24।।
इत्येवं निश्चितावादीत् स्निग्धगभ्भीरया गिरा ।
ग्रामाद् ग्राममटन्ती सा सोत्साहानुनयं जनान् ।।25।।

अस्मत्कृते कुलस्त्री या प्रययास दिवानिशम् ।
सैवावमानिता सख्यो राजभृत्यैस्तपस्विनी ।।26।।
अस्माभिर्माननना तस्याः कर्तव्या शोभनक्रमैः ।
धर्षणं च विरोद्धव्यं मौनप्रस्थानयोजनैः ।।27।।
तूष्णीमाकर्णयामासुर्मिलिता ग्रामयोषितः ।
विषण्णभीतसन्दिग्धास्तिष्ठन्तिः च समन्ततः ।।28।।
तासामालोक्य सन्त्रस्नु वीक्षणं प्राह वीरभा।
कस्मादि्बभीत हे सख्यो नास्ति शङ्कास्पदं क्वचित् ।।29।।
सभारम्भनिषेधो यस्तस्य वृत्तः किलावधिः ।
अस्मद्विघटनायाद्य प्रभवन्ति न रक्षिणः ।।30।।
तदाकर्ण्य स्थिताः काश्चितः संशयापन्नमानसाः ।
सम्मतिं दर्शयामासुरपरा मन्दमर्मरैः ।।31।
कर्तव्येषु परायत्ताः स्वभर्तृषु दृशं दधुः ।
स्वतन्त्रास्त्वपरास्तस्थुर्विमृशन्त्यो नताननाः।।32।।
अथावगम्य मौनस्य कारणं ग्रामयोषिताम् ।
प्रोत्साहयितुकामा ता वीरभा पुनरब्रवीत् ।।33।।
अहो कस्माद्भगिन्यो वः शङ्का पुनरपीदृशी ।
यूयं निश्चितचित्ताश्चेद्भर्तारः स्युर्न रोधकाः ।।34।।
अथ सा दृष्टिमाधाय नरेषु सहवर्तिषु ।
साग्रहं बोधयामास विधानं स्वस्वकर्मणः ।।35।।
बान्धवा अवगन्तव्यं प्रस्तुतस्यास्य गौरवम् ।
युष्माभिरपि कर्तव्यं काले साहायकं च नः ।।36।।
इत्यादि बोधयन्ती सा ग्राम्यानेकान्तमानसा ।
ददर्श जनसंमर्दे मुखं कस्याप्यकाण्डतः।।37।।
अभिज्ञाय च तां व्यक्तिं शुकनासोपलक्षिताम् ।
उज्झितग्रामनेतेति हठादेवं तमब्रवीत् ।।38।।
अपि दापयितुं ग्राम्यानागतोऽस्यत्र भूकरम् ।
दूत्यं तद्यदि ते भद्र वेत्स्येवात्मविनिश्चयत् ।।39।।

धूनयंस्तर्जनीं भूयो जगादागन्तुकश्च ताम् ।
फलितं न्यायभङ्गस्य ज्ञास्यसे नचिरान्ननु ।।40।।
अथ प्रगल्भचारित्रा निर्भयं प्रत्युवाच तम् ।
यावन्न लभ्यतेऽस्माभिः स्वराज्यं चिरकाङ्क्षितम् ।।41।।
तावन्नैव प्रदास्यामः प्राणान्तेऽपि भुवःकरम् ।
तदेतद्राजभृत्येभ्यो निश्चितं विनिवेद्यताम् ।।42।।
इत्युक्त्वाथ प्रियं पौत्रं रुदन्तं बाहुमूलगम् ।
लालयन्ती प्रसन्नास्या सहसाभूत् पुनश्च सा ।।43।।
प्रोवाच ग्रामणीर्भूयो गृहकार्यं वरं स्त्रियाः।
न तु प्रोत्साहनं ग्राम्यलोकस्यान्याय्यकर्मसु ।।44।।
सा तदुक्तिमनादृत्य समबोधयदङ्गना ।
हे सख्यः श्रूयतां यात्रा नान्याय्याद्य भविष्यति ।।45।।
अहिंसासत्यरूपेण वयं बद्धा व्रतेन हि ।
धर्मैकनिष्ठतां चापि शिक्षिताः स्मो महात्मना ।।46।।
दीपद्वयमिदं मोहतमोविध्वंसकारणम् ।
स्वातन्त्र्यरूपमोक्षस्य पदवीं दर्शयिष्यति ।।47।।
ग्रामेशः प्रत्युवाचोच्चैर्वचनैरतिदारुणैः ।
त्वादृशाः कुहका एव लोकविध्वंसहेतवः ।।48।।
न्यायभङ्गोद्यमोऽयं वः सर्वथा विपदावहः ।
तीव्रदण्डास्पदं नूनं भविष्यथ न संशयः ।।49।।
भविष्यति यदोच्छेदो भारतस्य समन्ततः ।
तदैव नायकस्तोमश्चक्षुरुन्मीलयिष्यति ।।50।।
समित्रबान्धवा यूयं दिष्ट्या तत्कष्टदर्शनैः ।
प्रायो नः परितप्स्यध्ये यथा युष्मत्परम्परा।।51।।
अथाहवीरभा भद्र न हिंसा शान्तिसाधनम् ।
ज्ञातव्यं शासकैर्मूलमसन्तोषस्य तत्त्वतः ।।52।।
श्रुत्वेद वचनं तस्याः संमर्दे मर्मरध्वनिः ।
क्रुद्धक्षुभितलोकानां श्रूयते स्म समन्ततः ।।53।।

शुकनासो जहासोच्चैर्ग्रामेशोऽयमनार्यवत् ।
उत्कासनं ततः कृत्वा निःससारावहेलया ।।54।।
अनार्यं तमनादृत्य बोधयामास सा पुनः ।
बोर्सदस्य चतुःशाले हे सख्यो गुरुवासरे ।।55।।
सुसज्जिताः सराष्ट्रीयपताकाश्च गमिष्यथ।
निश्चयं दृढमास्थाय मिलिताश्चाकुतोभयाः ।।56।।
अथ तूष्णीं स्थिता दृष्ट्वा किं युष्माभिर्विनिश्चितम् ।
इति ताः परिपृच्छन्तीमूचुः सम्मतमस्ति नः ।।57।।
उवाच वीरभा तुष्टा तद्वाक्येन स्मितानना।
प्रत्येकस्मादपि ग्रामादङ्गनानां द्वयं द्वयम् ।।58।।
अधिष्ठाय स्त्रियश्चान्या धारयद्राष्ट्रियध्वजम् ।
श्रेणीभूय क्रमेणैव समेयाद् बोर्सदाङ्गणे ।।59।।
सगौरवं च सोत्साहं प्राहोच्चैः काचिदङ्गना ।
अस्त्वेवं किन्तु सर्वासां त्वमेवाग्रसरी भव ।।60।।
अन्याभिः प्रतिपन्नेऽस्मिन् वाक्ये जग्राह वीरभा ।
माननामन्यया साकं स्त्रिया मध्यवयस्कया।।61।।
वीरभाथ गुरूत्साहा पर्याटीत् पल्लिकाः क्रमात् ।
उद्योजयितुमन्याः स्त्रीः प्रस्थाने निश्चितेऽहनि ।।62।।
ग्रामे ग्रामे जनस्तस्याः प्रत्यगृह्णाच्च सूचनम् ।
कुलस्त्रीधर्षणां श्रुत्वा परमोद्वेगकारिणीम् ।।63।।
सार्भका कृतकृत्या सा यदा गेहमुपागमत् ।
तदा प्रतीक्षमाणां स्वां ददर्श जननीं बहिः ।।64।।
सुतां दृष्ट्वा क्षुधाक्षामां चिन्तया जरठाब्रवीत् ।
अहो श्रमः कियान् सोढः क्षुधार्तोऽयं शिशुःकियत् ।।65।।
बालं निधाय दोलायां मन्दं प्रोवाच वीरभा ।
न श्रान्ताहं प्रयाणं हि शकटेषु कृतं मया ।।66।।
ग्रामे ग्रामे सपौत्राहं ग्रामिकैः सुष्ठु भोजिता ।
प्रणयात् सत्कृताया मे कुतो नु स्यात् परिश्रमः ।।67।।

मिलितांना बहिर्गेहं कर्तुं स्वागतमात्मनः ।
शिबिरावसिलोकानां वीरभा दर्शनं ददौ ।।68।।
अथ सा तान्नमस्कृत्य स्वभर्तारं विचिन्वती ।
पप्रच्छ क्व नु मे स्वामी न कुत्रापीह दृश्यते ।।69।।
ततः कोऽपि जनस्तोमात् सखेदं तामवेदयत् ।
विक्रेष्यते तव क्षेत्रं हन्त साधयितुं करम् ।।70।।
अथ सा वीरभावादीदवधार्य परिस्थितिम् ।
कुर्वन्तु ते यथाकामं जानेऽहं तद्विभीषिकाम् ।।71।।
स्वभावतो बभूवैषा चतुरा प्रतिभावती ।
विपद्यपि निजं धैर्यं न जहौ सार्थसंज्ञिका ।।72।।
अथैको जरठः प्राह गतो भद्रे पतिस्तव ।
कार्पासानि समुच्चेतुं प्रागेव क्षेत्रविक्रयात् ।।73।।
तच्छ्रुत्वा वीरभा यावत् स्थिता तूष्णीं मनस्विनी ।
तदीयजननी तावदब्रवीद् गर्गरस्वना ।।74।।
द्विक्रोशमात्रदूरेऽयं ग्रामोऽस्माकमितः खलु ।
तथापि ते पतिर्वत्से कस्मादेवं चिरायते ।।75।।
अपराह्णो व्यतीयाय सायंसन्ध्यापि निर्ययौ ।
तथापि वीरभाभर्ता नागतो गृहमात्मनः ।।76।।
दैवन्यस्तभरा सा तु नैवात्मानमचिक्लिशत् ।
केवलं चिन्तयामास प्रयोगानायतिक्षमान् ।।77।।
अथ साबोधयत् सर्वा मिलिता ग्रामयोषितः।
प्रातराशात् परं सख्यः श्वःप्रतिष्ठामहे द्रुतम्।।78।।
सम्मतिं प्रददुः सर्वा अङ्गनाः सद्य एव ताः ।
स्वराज्यविजयोद्घोषमुद्गिरन्त्यः प्रहर्षुलाः ।।79।।
अथापरेद्युरुत्थाय प्रत्यूषे शयनाद् द्रुतम् ।
भर्तुर्निवर्तनात् पूर्वं दीग्धुकामा गवां गणम् ।।80।।
आदाय त्रपुदीपं सा चञ्चलं वायुवेगतः ।
गोशालामुपसर्पन्ती मर्शं मर्शं महीतलम् ।।81।।

गोष्ठपार्श्वं यदा प्राप तदा सन्ध्या समागता।
द्वारमुत्कीलितं दृष्ट्वा तालं च पतितं भुवि।।82।।
तालमुद्धृत्य गोष्ठान्तः प्रविष्टा सा व्यलोकयत् ।
चोरितं गोधनं सर्वं शून्यीभूतं च गोष्ठकम्।।83।।
वस्तुमर्म वितर्क्यासौ प्राञ्ज्युवाच सुनिश्चयात् ।
अहो धिक् शासकांश्चोरांस्तेषामेतद्धि चेष्टितम्।।84।।
आपदमस्तकं कोपात् कम्पमानाथ वीरभा।
न्यवर्तत पुनर्गेहं शोकावेगात् स्खलद्गतिः ।।85।।
दोलायां शयितं बालं चलन्तमवलोक्य सा ।
तं प्रस्वापयितुं दोलां मन्दं मन्दमदोलयत् ।।86।।
प्रबुद्धा जननी तावत् त्वरयन्ती जगाद ताम् ।
सूर्योदयेऽपि कस्मात् त्वं दोहनाय न गच्छसि।।87।।
नियम्याथ निजक्षोभं वीरभास्यै न्यवेदयत् ।
अम्ब रिक्ताद्य गोशाला गावः सर्वाश्च लुण्ठिताः ।।88।।
कम्बलं जरठापास्य क्षिप्रमुत्थाय चाब्रवीत।
अपि त्वं वृद्धया सार्धं परिहासं चिकीर्षसि ।।89।।
इति तन्निकटं गत्वा स्पृशन्ती तां जगाद सा ।
किं वृत्तं ब्रूहि मे वत्से कुतः खिन्नास्यकारणात् ।।90।।
वीरभा प्रत्युवाचैनां किं ब्रवीम्यम्ब ते पुनः ।
उक्तमेव हि तत् सर्वं पूर्वमेव यथार्थतः ।।91।।
अथ वृद्धा समुद्भ्रान्ता प्रारेभे क्रन्दितुं भृशम् ।
सन्निपेतुश्च तच्छ्रुत्वा प्रातिवेश्या गृहाद्बहिः ।।92।।
लुण्ठनस्य कथां तेषु श्रुतवत्सु विगर्हितम् ।
सर्वतः शिबिरे तस्मिन् हाहाकारः समुत्थितः ।।93।।
सान्त्वयामास तां क्षुब्धां क्रन्दन्तीं तत्सुहृद्गणः ।
अलं भद्रे विलापेन न हि गावो दुरासदाः।।94।।
मातरं सान्त्वयिष्यन्ती शपन्ती हतलुण्ठकान् ।
बोधयामास मौनाय स्वयं क्रुद्धापि वीरभा ।।95।।

अचिरात्तरुणाः केचित् समाप्तस्नानभोजनाः ।
अन्वेष्टुं गोधनं नष्टं बभुवुरलमुद्यताः ।।96।।
वीरभा तु निरुन्धाना युवकान् यास्यतोऽब्रवीत् ।
अन्वेषणमिदं व्यर्थं वेद्मि के तस्करा इति ।।97।।
अचिराद् गृहकृत्येषु व्यापृताथ बभूव सा ।
तच्चौर्येण निजोद्दिष्टे भूयो वर्धितनिश्चया ।।98।।
अथ निर्वृत्तकार्या सा निर्गता योषितोऽब्रवीत् ।
मध्याह्नात् पूर्वमेवाशु प्राप्तव्यं बोर्सदाङ्गनम् ।।99।।
आकर्ण्य तास्तदादेशं प्रत्यूचुर्योषितस्ततः ।
वयं सर्वाश्च सज्जाः स्मः प्रस्थानाय सपद्यपि।।100।।
यथा यथा हि पूर्वाह्णोव्यतीयाय तथा तथा ।
कुटीरं परितो वायुःकरोति स्माकुलस्वनम् ।।101।।
पत्युः प्रतीक्षमाणा सा पदशब्दं प्रतिक्षणम् ।
सोत्कण्ठं वायुशूत्कारं शृणोति स्म विलक्षणम् ।।102।।
ध्यायति स्म च किं भर्ता ब्रूयादाकर्ण्य गा हृताः ।
मितभाष्यपि शान्तोऽपि नूनं क्रुद्धो भविष्यति ।।103।।
इति चिन्तानिमग्नाया बभूव श्रुतिगोचरः ।
सहसा शकटीयानचक्रध्वनिदूरतः ।।104।।
जनन्या सह यावत् सा निर्जगाम कुटीरतः ।
तावच्छकटिका काचिद् ददृशे जीर्णगर्गरा ।।105।।
रथे तस्मिन् रटच्चक्रे सैनिकौ धवलाम्बरौ।
अदृश्येतामुदासीनौ वाहकोभयपार्श्वतः ।।106।।
दृष्ट्वा यानमुपायातं कापथे सहसा स्थितम् ।
अस्फुरद्धृदयं तस्या वीरभायाः प्रवेगतः ।।107।।
क्षणादेवाभ्यजानात् सा शकटे शयितं नरम् ।
रक्तलिप्ताम्बरावीतमात्मनः प्राणवल्लभम् ।।108।।
वीरभामुपमर्पन्तीमेकः प्रोवाच सैनिकः ।
ताडितस्ते पतिर्भद्रे रक्षिभिर्मूर्च्छितोऽस्ति हि ।।109।।

अवनम्य यदापश्यद्विसञ्ज्ञं वीरभा पतिम् ।
जरठा जननी तस्याः क्रन्दति स्म सगद्‌गदम् ।।110।।
किं नु वृत्तमहो सौम्या इति पृष्टास्त्रयो नरा : ।
संज्ञया मौनमास्थातुमादिशन् योषितावमू ।।111।।
ततो गृहान्तरं नीत्वा क्षतदेहं गृहेश्वरम् ।
शयने तं निधायैको बभाषे देशसेवकः ।।112।।
यावन्न प्राप्नुयात् संज्ञां पुनर्भद्रे पतिस्तव ।
नोपरोध्यस्त्वया तावदिति वैद्योऽनुशास्तिवः ।।113।।
निर्गतेषु ततस्तेषु सर्वेष्वपि गृहाद्‌बहिः ।
तयोः सैनिकयोरेको वीरभामेवमब्रवीत् ।।114।।
तूलबीजं निजक्षेत्रे समाचिन्वन् पतिस्तव।
निरुध्य रक्षकैः क्रूरैरनायि ग्रामपाग्रतः ।।115।।
अथ ग्रामाधिपः क्रुद्धस्तर्जयामास ते पतिम् ।
देहि रे भूकरं नोचेच्चूर्णयिष्यामि ते शिरः ।।116।।
निराकृत्य यदा वाक्यं तव भर्ता निरुत्तरः ।
अवज्ञया स्थितो धीरः सत्याग्रहबलोर्जितः ।।117।।
तदानमय्य तद्देहं स्वस्तिकीकृत्य तत्करौ ।
संस्पर्श्य च पदाङ्गुष्ठौ चिराय स्थापितो बत ।।118।।
हठादेवमवष्टब्धं कशाघातैः प्रजहर्तुः ।
नियुक्तौ नरवेतालौ पर्यायेणच्छटच्छटम्।।119।।
इत्युक्त्वा विरते तस्मिन्नुच्छ्वासायं मनागिव ।
वीरभा परमोद्विग्ना विललाप भृशार्दिता ।।120।।
सैनिकोऽकथयद् भूयः पिशाचौ तौ विरेमतुः ।
प्रतिद्वादशघातान्ते ततश्चैनं ततर्जतुः ।।121।।
झटिति ब्रूहि रे मूढ करं दास्यसि किं न वा ।
नो चेद्वक्रस्वभावस्य सदशं फलमाप्नुयाः ।।122।।
तर्जितस्ताडितश्चापि निर्भयस्ते पतिः स्थितः ।
निश्चलात्मा सहिष्णुश्च धीरः पर्वतराडिव ।।123।।

नरासुरौ ततः क्रुरौ दुष्टकर्मप्रहर्षिणौ।
स्वामिनस्ते शठौ भूयः प्रारभेतां प्रताडनम्।।124।।
परः शतप्राहारान्ते पपात भुवि मूर्च्छितः।
तितिक्षावर्मनद्धोऽपि यातनां सोढुमक्षमः।।125।।
तावच्च मामुपायान्तं रक्षिचत्वरपार्श्वतः।
आहूय रक्षकः कश्चिन्मद्वशे तं समार्पयत्।।126।।
अनैषं सवयस्योऽहं रुग्णशालां पतिं तव।
प्रत्यग्रनिर्मितं लोकै रासग्रामनिवासिभिः।।127।।
अचिराद्वैद्यशालायां क्षणं संज्ञामवाप्य सः।
बलात्कारकथामेनामब्रवीन्मां समासतः।।128।।
अथ वर्णितवृत्तान्तः सैनिको मौनमाश्रयत्।
वीरभा चापि तूष्णीकावतस्थे बद्धवागिव।।129।।
एतद्घोरतरं वृत्तं ग्रामाद् ग्रामं सरीसरत्।
अवर्धयत लोकांना विरागं परशासके।।130।।
वीरभाया यदा भर्ता बभूवागतचेतनः।
तदा पप्रच्छ तां त्यक्तः किमु प्रस्थानसंविधिः।।131।।
धृत्वा भर्तुर्मुखोपान्ते वीरभा दुग्धभाजनम्।
प्रत्युवाच न हि त्यक्तः प्रयास्यामोऽचिरादिति।।132।।
श्रुत्वेदं जननी तस्या विस्मितोवाच कातरा।
अपि नालमिदं कष्टं यदन्यत् काङ्क्ष्यते पुनः।।133।।
मातरं प्रत्युवाचासौ सर्वमेतदनुष्ठितम्।
सन्त्रासयितुमेवास्मानतस्त्याज्यो न निश्चयः।।134।।
आकर्ण्य वचनं तस्याः पतिर्वृद्धामसान्त्वयत्।
रूढव्रणोऽचिरादेव भवितास्मि प्रयातु सा।।135।।
आप्यायितः स दुग्धेन निद्रालुरभवद् यदा।
तस्थौ निरूपयन्ती सा तदा श्वासगतिं क्षणम्।।136।।
स्वस्थोऽद्य मम भर्तेति प्रतीता वीरभार्भकम्।
जालकोशे निवेश्याथ स्कन्धे तमुदलम्बयत्।।137।।

ततो दक्षिणहस्तेन दधती राष्ट्रियध्वजम्।
शिबिरस्थाङ्गनासङ्घं द्रष्टुं सा निरगाद्बहिः।।138।।
निर्यास्यन्तीमथ प्राह माता नैराश्यविह्वला।
अर्भकं मुञ्च मा नैषीरत्रैवास्तु सुरक्षितः।।139।।
हेलया वीरभोवाच मा बिभीहि मनागपि।
कृशयोरपि मे बाह्वोरम्ब सारं न बुध्यसे।।140।।
इत्युक्त्वा परिहासेन वीरभा ध्वजधारिणी।
उत्कन्धरा दृढश्रद्धा निर्जगाम कुटीरतः।।141।।
अनुजग्मुश्च तामन्याः सोत्साहा ग्रामयोषितः।
वन्दे मातरमित्यादिजयघोषपुरःसरम्।।142।।
जननी वीरभायास्तु स्थितासीत् प्राङ्गणे बहिः।
वीक्षमाणा महद्वृन्दं यावन्नयनगोचरम्।।143।।
उच्चैरुच्चैरभूत्तासां निर्घोषस्य प्रतिध्वनिः।
अथ मन्दायमानः सञ्छनैरश्रव्यतां गतः।।144।।
मध्याह्ने वीरभा प्राप्ता बोर्सदस्य चतुष्पथम्।
ददर्श वनितावृन्दं नानादिग्भ्यः समागतम्।।145।।
अथ सङ्गम्य तन्मध्ये स्वजनैश्चिरमागता।
प्रस्थानं रचयामास विधानज्ञा यथाक्रमम्।।146।।
पृथक् पृथग् विभज्यैवं जनतां स्वयमग्रगा।
निर्भयं ध्वजहस्तानां योषितां मूर्धनि स्थिता।।147।।
प्रचचाल ततो गुर्वी जनयात्रा प्रहर्षिणी।
महता जनघोषेण जनयन्ती मुहर्मुहुः।।148।।
प्रतिध्वनितरङ्गणामावर्तानम्बरार्णवे।
दिव्यसन्देशगाम्भीर्यं समन्तादनुकुर्वतः।।149।।
गतेऽल्पमात्रमध्वानं प्रस्थाने सहसाग्रतः।
अभ्यापतन्मुष्याणामश्रूयत पदध्वनिः।।150।।
यावदुद्घोषयामासुर्जयशब्दं स्त्रियः पुनः।
तावदभ्याययौ वृन्दं रक्षिणां शस्त्रधारिणाम्।।151।।

तेष्वेको निकटीभूय योषितोऽपृच्छदुद्धतम् ।
स्वराज्यं किल युष्माभिः काङ्क्ष्यते तच्च विन्दत ।।152।।
सायुधैरथ विष्टब्धे प्रस्थाने सहसा नरैः ।
प्रश्नोन्मुखीव निर्भीका वीरभा तानलोकयत्।।153।।
अथ ते रक्षिणः क्रूराः क्रोशन्ति स्म सुनिष्ठुरम् ।
भो अनार्या पृथग् यूयं स्वगृहान् गच्छत द्रुतम् ।।154।।
वीरभोवाच नन्वार्या निषेधस्यावधिर्गतः ।
इत्युक्त्वाथ सखीर्दृष्ट्वा प्रयातेति समादिशत् ।।155।।
तेषामेकतमो रक्षी शीङ्कारध्वनिमातनोत् ।
तत्क्षणाद् दुद्रुवुःकेचिदग्रतो ध्वजधारिणीः ।।156।।
शपन्तोऽन्येऽभ्यवास्कन्दन् रभसात् फेनिलैर्मुखैः ।
तरुणीः पार्श्वभागस्था हृत्कम्पं जनयिष्णवः ।।157।।
लालयन्ती रुदङ्डिम्भं वीरभाह स्त्रियोऽग्रगाः ।
सख्यः प्राणव्ययेनापि ध्वजान् रक्षत सर्वतः ।।158।।
तासां प्रेरणयेदृश्या नासीत् कार्यं मनागपि ।
स्वयमेव हि ता यत्नाद्ररक्षू राष्ट्रियध्वजान् ।। 159।।
धभद्धभद्ध्वनिः सर्पन्नाग्नेयास्त्रसमुद्भवः ।
बोर्सदस्य महामार्गे प्रतिध्वनिमजीजनत् ।।160।।
भृशं निक्रियमाणानां ध्वजरक्षापरात्मनाम् ।
आर्तानामपि योषाणां न मुखाद् दुःस्वरः श्रुतः ।।161।।
अथास्मिंस्तुमूले घोरे वामस्कन्धे निपातितः ।
प्रहारो वीरभाकण्ठाच्चकर्षार्तरवं बलात्।।162।।
तथापि लोहबद्धेव द्रढिमानमुपागता ।
न प्राप दक्षिणा मुष्टिः शिथिलत्वं मनागपि ।।163।।
मर्दिताश्च स्त्रियो मुख्याः सोपानत्पदघट्टनैः ।
सहमानाः खलीकारं निपेतुर्भुवि मूर्छिता : ।।164।।
पृष्ठतो योषितश्चान्या वेणीभिरवकर्षिताः ।

निष्कासिताश्च निर्लज्जैरधावन्त यतस्ततः ।।165।।
तद्गुरुक्तीरनादृत्य ताडनानि विषह्य च ।
वीरभा निश्चला तस्थौ रक्षन्ती राष्ट्रियध्वजम् ।।166।।
अपाकृष्याथ दण्डात् सा त्रिवर्णध्वजचीवरम् ।
पिण्डीकृत्य जुगूहान्तः स्तनयोः कञ्चुकान्तरे ।।167।।
पतितावाङ्मुखी भूमौ घट्टिताभूत् पुनःपुनः।
पादाघातैश्च दण्डैश्च यावन्नभूद्विचेतना ।।168।।
तस्यामेवाथ यामिन्यां शायिता शयनोपरि।
सेविता भर्तृमातृभ्यां पुनःसंज्ञामलब्ध सा ।।169।।
अथाचिराद् यदा नेत्रे प्रबुद्धा सोदमीलयत् ।
स्वरसादेव तत्पाणिरुरोदेशं तदास्पृशत् ।।170।।
स्मृतमध्याह्नवृत्तायाः प्राप वैवर्ण्यमाननम् ।
सा च निश्वसती ध्यानपरिमग्ना चिरं स्थिता ।।171।।
वितर्क्य जननी तस्या वीरभाया मनोगतम् ।
विलपन्ती समुद्विग्ना जगादैनां सगद्गदम् ।।172।।
न युक्तं तुमुले नेतुं शिशुमित्यसकृन्मया ।
अहो बोधितपूर्वापि त्वमनैषीर्हठाद्बत ।।173।।
अथोत्थाय पतिस्तस्याः खञ्जं खञ्जमुपाययौ ।
सान्त्वयामास च प्रेम्णा भग्नकण्ठः स्वगेहिनीम् ।।174।।
मा शुचःसर्वथा कान्ते विलापोऽद्य निरर्थकः ।
रक्षितो हि भवेद्वत्सो दैवात् केनापि साधुना ।।175।।
प्रत्याह सशिरःकम्पं दुःखिता वीरभा ततः ।
भारतोर्वीयशश्चिह्नं मया केतुः सुरक्षितः ।।176।।
तदर्थे किल हा हन्त दत्तं मूल्यं महत्तमम् ।
त्यक्तसर्वस्वया नाथ दैवोपहतया मया ।।177।।
उक्त्वैवं परिमृज्यासौ नयने बाष्पसंप्लुते ।
चोलान्तर्वीरभा गूढं ध्वजवस्त्रमपानयत् ।।178।।
अथ क्षयं गते तस्मिञ्छैषिरे दिवसे निशा ।

तमःकज्जलमादाय लिम्पति स्माखिलं जगत् ।।179।।
अहो धन्या अमी लोका हृदि येषां मनागपि।
बलात्कारः सुघोरोऽपि भयं नाजीजनत् क्वचित् ।।180।।
स्वराज्येप्सामहावह्निर्वर्धते स्माधिकाधिकम् ।
सत्याग्रहैकनिष्ठानां हृदयेषु निरन्तरम् ।।181।।
पीडीतानेकदुर्भाग्यैर्विदीर्णाङ्गाी क्षतैर्भृशम् ।
चिरं शिश्ये विनिद्रा सा वीरभा शयनीयके ।।182।।
निद्रोन्मुखोऽथ पर्यङ्कं प्रत्यलङ्घीत् पतिः स्वकम् ।
वृद्धा स्वप्ने च पश्यन्ती गोव्रजं शयिताभवत् ।।183।।
शुश्रवे सहसा दूरादस्पष्टो रोदनध्वनिः ।
तत्रैव दत्तकर्णासौ वीरभास्थात् समुत्सुका ।।184।।
अचिरात् क्रन्दने तस्मिञ्छनकैः प्रशमं गते ।
अश्रृणोत सा बहिर्गेहादात्मसम्बोधनध्वनिम् ।।185।।
नचिराद्रोदनं भूयो बभूव श्रुतिगोचरः ।
श्रृण्वती तन्निरुच्छवासं सकम्पा सा स्थिता क्षणम् ।।186।।
तदाकर्ण्य त्वरते स्म स्थलं तत्प्रतिवेशिनः ।
अकाण्डरोदनस्यास्य कारणं ज्ञातुमिच्छवः ।।187।।
आहूयाथ क्षणादुच्चैः कोऽप्येनां प्रातिवेशिकः ।
उद्घाट्य च हठाद् द्वारं प्रविवेश धृतार्भकः ।।188।।
अथ यावत् सुहृत्तस्यै बालपौत्र समार्पयत् ।
आगन्तुकः शिशोस्त्राता तावदस्थाददूरतः ।।189।।
असह्यवेदनार्तापि हठादुत्थाय मञ्चतः ।
प्रसारितकरौत्सुक्याद् गृह्णाति स्म स्तनन्धयम् ।।190।।
तथानन्दप्रकर्षस्य व्यतीते प्रथमक्षणे ।
आगन्तुकं गृहस्वामी पृच्छति स्म प्रहर्षुलः ।।191।
कुत्र लब्धस्त्वया बालो जीवितं नो बहिश्चरम् ।
इति पृष्टो नवागन्ता कथयामास विस्तरम् ।192।।
अपश्यं सार्भकां भार्या धन्यां ते तुमुले यदा ।

ध्वजरक्षापरिव्यग्रां तदा चिन्ताकुलोऽभवम् ।।193।।
ततश्छिन्ना मया रज्जुः शिशुकन्थावलम्बिनी ।
स्कन्धात्त्वदीयभार्याया अपनीतश्च बालकः ।।194।।
तच्छ्रुत्वा वचनं तस्य वीरभा संशयान्विता ।
साभिज्ञमिव तद्वक्त्रे नाक्षिकम्पं व्यलोकयत् ।।195।।
स ह्यासीद्रक्षिणामेको नियुक्तानां प्रजार्दने ।
दिनचर्या विनिर्वर्त्य तस्थिवान् खद्दरावृतः ।।196।।
मृदुस्वनो जगादासौ वितर्क्यास्या मनोगतम् ।
यद्यस्ति मयि विश्वासः शृणु भद्रे कथां मम ।।197।।
तथेत्युक्ते तया चासौ तत् प्रवक्तुं प्रचक्रमे ।
जीवनस्यात्मनो वृत्तं राक्षसीयं चिराश्रितम् ।।198।।
एषोऽस्मि दिवसानेतान्नियुक्तो घोरकर्मसु ।
दुर्जातव्रात्ययुक्तेषु सञ्जातोऽतिजुगुप्सितः ।।199।।
यदाहमेकदाश्रौषं वर्ण्यमानानि युक्तिभिः ।
सत्याग्रहस्य तत्त्वानि बान्धवानां पुरस्त्वया ।।200।।
नितरां व्याकुलोऽभूवं लज्जितो दुरितैर्निजैः ।
स्त्रीजनस्याभ्यवस्कन्दान्निवृत्तं च मनो मम।।201।
तदाकर्ण्य जगादोच्चैर्जरठा परुषस्वरा ।
अथ कस्मात् प्रवृत्तोऽभूरद्यैव क्रूरकर्मणि ।।202।।
इति पृष्टः स चावादीदलङ्घ्यंहतशासनम् ।
अधिकारिभिरादिष्टः किं नु दासः करोम्यहम् ।।203।।
असहाया यदापश्यमहिंसातत्पराः स्त्रियः ।
युध्यमाना बलात्कारदुर्मदः पुररक्षिभिः ।।204।।
अक्षमो रक्षितुं रक्ष्याः प्रेक्ष्य च क्षोभितं शिशुम् ।
कक्षमूले तमाक्षिप्य क्षिप्रमागामलक्षितः ।।205।।
श्रुत्वेदं वीरभा प्रेम्णा पौत्रमालिङ्ग्य साब्रवीत् ।
हन्त साधु कृतं भद्र धर्मज्ञोऽसि दयापरः ।।206।।
प्रत्युवाचाथ विश्रब्धः स चागन्तुर्मृदुस्वरः ।

विवशास्ते मदोद्रेकादासन् सहचरा मम ।।207।।
दिष्टया निवृत्तपानोऽहं नो चेत्तत्सदृशं किल ।
आचरिष्यमहं चापि नृशंसैः सह संगतः ।।208।।
स्मृत्वा मद्यस्य दुर्गन्धं रक्षिणां श्वासदूषकम् ।
जगाद वीरभा जाने यथार्थं तव भाषितम् ।।209।।
अथाह पुनरागन्तू रक्षिकार्यंत्यजाम्यहम् ।
बुभूक्षया वरं मृत्युर्न तु दास्यं दुरात्मनाम् ।।210।।
कनिष्ठसेवको भूत्वा सत्याहिंसानुयायिनाम् ।
घोरकष्टैश्च कारायां मार्जयिष्याम्यघं मम ।।211।।
इत्याश्रुत्यानुतापार्तः सत्यगम्भीरवागसौ।
वीरभादीन्नमस्कृत्य निर्जगाम कृती ततः ।।212।।
इति क्षमायाः कृतिषु ग्रामज्योतिराख्ये काव्ये वीरभायाः कथा नाम तृतीयो मयूखः समाप्तः । समाप्तं चेदं ग्रामज्योतिःसमाख्यं काव्यम् ।

***

वीरभा

कथासारांशः

कथारम्भे सुभाषितं वर्तते, 'दुर्जनोऽपि सतां सङ्गाद् भजत्येव हि सज्जनः।' अस्यां कथायां वीरभा नाम काचिदतीव बलिष्ठा निर्भया रणरागिणीव मध्यमवयस्का स्त्री बोर्सदग्रामे निवसति स्म। तत्रस्थरक्षा– पुरुषाणामनान्वितात्याचारेण परित्रस्ता वीरभा कथंतेषा प्रतिकारः करणीय इति चिन्तने निमग्नासीत्। तस्याः बलं सौष्ठवञ्चानन्यसाधारणमासीत्। गृहं बलात्प्रविष्टेन लुण्ठकेन सह युद्धं कृत्वा सा तं गृहाद्बहिर्निष्कासितवती। वीरभायाः एकः देशकार्यप्रवण पुत्र आसीत्। विदेशवस्त्राणि नयतः यानस्य पुरतः निषेधार्थं स्थितस्य तस्य शरीरस्योपरि यानसञ्चारं कृतं दुष्टजनैः। तस्य मरणस्य वृत्तान्तं श्रुत्वा

सा शोकावेगेन संस्तब्धा जाता। तस्याः स्नुषा तु पूर्वमेव दिवंगतासीत् मातृपितृहीनं पौत्रं सा स्वपुत्रवत् लालयति स्म।

रक्षकाणामत्याचारेण त्रस्ता सा निजग्रामं परित्यज्य वटोदरनाम्नि नगरे वृद्धमात्रा सह न्यवसत्। रक्षकाणामत्याचारस्य प्रतिकारार्थं महिला संघटनमावश्यमिति चिन्तयित्वा पौत्रेण सह ग्रामेष्वटन्त्या तथा स्त्रीसंघटनं कृतम्। 'कस्माद्विभीत हे सख्यो। अस्मद्विघटनाय एव यतन्ते रक्षिणः। अतः संभूय स्थेयम्। इति प्रेरणादायि गिरा सा ग्रामयोषिताः प्रोत्साहयति स्म।' गान्धीमहात्मना शिक्षितेन अहिंसासत्यरूपेण व्रतेन दीक्षिताऽस्ति सा। बोर्सदस्य चतुष्पथे हस्ते राष्ट्रीयपताकाः गृहीत्वा सुसज्जाः भवन्त्वित्यादेशं दत्वा वीरभा गृहं प्रत्यागता। तस्याः पतिः क्षेत्रस्य विक्रयात्पूर्वं कार्पासानि समुच्चेतुं गत इति तस्याः जनन्या कथितम्। अतः सा स्वगृहं गता। परं तत्र केनापि दुष्टेन तस्याः गोधनं चोरितमासीत्। शकटयानं तत्रोपायातम्। तास्मिन् याने रक्तलिप्ताम्बरं स्वप्राणनाथं दृष्ट्वा स्तम्भिता सा। कार्पासं चिन्वन् पतिः भूकरदानार्थं रक्षकैः कशाघातैस्ताडितस्तेनैव सः मूर्च्छित इत्येकेन सैनिकेनोक्तम्। वृत्तान्तमेतं श्रुत्वा वीरभा दुःखेन विललाप। कञ्चित्कालादनन्तरं सचेतनाय तस्मै दुग्धं दत्वा वीरभा निश्चितकायार्थं गन्तुमुद्युक्ता। तस्याः गमनं वार्यमाणां मातरमुक्तवती सा 'अस्मान् संत्रासयितुमवे रक्षका अत्याचारान् कुर्वन्ति। परमस्माभिः निश्चयः न त्याज्य' इति। पौत्रं स्कन्धेऽवलम्ब्य दक्षिणहस्तेन राष्ट्रध्वजञ्च धृत्वा सा गृहाद्बहिर्निरगात्।

माध्याह्ने वीरभा बोर्सदग्रामस्य चतुष्पथं प्राप्ता। ततः राष्ट्रध्वजगृहीतानां योषितानां यात्रा प्रस्थिता। वीरभा वनितावृन्दस्य नेतृत्वं कुर्वन्त्यासीत्। तासामुद्घोषणाभिर्निनादितमासीदखिलं वातावरणम्। सहसा रक्षकैस्ताडनमारब्धम्। तेन सर्वाभिरितस्ततः पलायनमारब्धम्। वीरभा उच्चैर्चुक्रोश – 'सख्य प्राणव्ययेनापि ध्वजान् रक्षत । सर्वतः अहिंसाशस्त्रेण युद्धमानानामार्तानामपि तासां मुखाद्दुःस्वरः न निर्गतः तदा तस्याः दक्षिणमुष्टिर्न शिथिला जाता। त्रिवर्णकराष्ट्रध्वजचीवरं

दण्डादाकृष्य चोलान्तर्गतं निगूह्यच सा भूमौ पतिता। मूर्च्छिता सा कैश्चिज्जनैः गृहं प्रपिता। कञ्चित्कालादनन्तरं सचेतना सा शिशुं दृष्ट्वामाध्याह्नवृतंञ्च स्मृत्वा विललाप। तदा तस्याः पतिः तां सान्त्वयामास–' मा शुचः कान्ते, केनापि साधुना वत्सस्ते दैवाद्रक्षितः।' येन स बालः रक्षितः सः रक्षक आसीत्। वीरभायाः सत्याग्रहतत्त्वेषु दृढभक्तिं दृष्ट्वा तस्य हृदयपरिवर्तनं जातम्। 'इदमकार्यमिदानींत्यजाम्यहम्। बुभुक्षया वरं मृत्युर्न तु दास्यं दुरात्मनामित्युक्त्वाश्रुपातैस्सह वीरभादीन्नमस्कृत्य सः निर्गतः।

***

कथासमीक्षणम्

कथावैशिष्टयानि :

सर्वत्र सुभाषितेन भवति कथारम्भ ।प्रथमा रेवायाः कथा 'देशभ्युदयसक्तानां तृणाय धनसम्पदः' इति सुभाषितेनानेनारभते । ग्रामप्रमुखेण भूकरदानार्थं भृशं पीडिताऽपि दृढनिश्चया रेवा न ददाति भूकरम् । देशसेवाकार्यरतं रक्षकाणां दण्डप्रहारैश्च क्षतविक्षतं स्वपुत्रं गृहीत्वा यदा रेवा गृहस्थानि वस्तूनि जनेभ्यः प्रदाय गृहञ्चत्यक्त्वा सेवकेन सह ग्रामान्तरं गन्तुं प्रस्थिता तदा दुष्टजना अज्वालयत्तस्याःगृहम् ।तद्दृष्ट्वापि शोकं न करोति सा ।

सर्वं यातु सखे शोको न कार्यः सेयमाहुति : ।
कल्पिता सत्यदेवाय प्रेयो नः स हि दास्यति ।। 1–188

सत्यदेवाय (गान्धीमहोदयाय) इयमाहुतिः कल्पितेति तस्याः भाव। एतादृशदेशसेविकायाः कृते धनसम्पदः तृणायेति तात्पर्यं कथायाः ।

'कटुविपाक' इति काथायाः प्रारम्भे– 'परसेवी निजद्वेषी कुलमृत्युर्न संशयः इति सुभाषितं दत्तम् । अत्र ग्रामणीरेव स्वकुलद्वेष्टा । रक्षकाणां साहाय्येनं ग्रामाजनान् ताडयन्नयं ग्रामणीः देशसेवारतान् स्वगृहजनानपि पीडयति । स्वतंत्राताान्दोलनेन सह सम्बद्धः स्वपुत्रः तेन

गृहान्निष्कासितः । मद्यविक्रयवारणाय कटिबद्धां भार्यां वाक्ताडनेन सततं दुःखमेव ददात्ययम् । अन्ततो गत्वा कारागृहे बद्धानां देशसेविकानां कृते कार्यं कुर्वती तस्य पुत्री रक्षकाणां ताडनेन मरणासन्ना भवतीति कटुविपाकः। दुष्टाचरणस्य ग्रामप्रमुखस्य ईदृशाचरणेनैव नश्यति तस्य कुलम् ।

'दुर्जनोऽपि सतां सङ्गात् भवत्येव हि सज्जनः ' वीरभेति तृतीयकथाया आरम्भे आगतमिदं सुभाषितम् ।स्वपुत्रस्य मृत्योर्दुःखमविगणय्य पौत्रं स्कन्धेऽवलम्ब्य देशकार्यार्थं ग्रामाद्ग्रामं पर्यट्य महिलासंघटनार्थं यतते स्म वीरभा । स्कन्धे पौत्रं हस्ते राष्ट्रध्वजञ्च धृत्वा वीरभायाः नेतृत्वे जनयात्रा प्रस्थितासीत् । सहसा कृतचण्डप्रहारेण भूमौ पतिताऽपि राष्ट्रध्वजं रक्षन्ती वीरभा शत्रूणामपि मनस्सु देशभक्तिमजनयत्। रक्षापुरुषेष्वेकः वीरभायाः धैर्यं देशभक्तिञ्च दृष्ट्वा तस्याः पौत्रं रक्षति । 'बुभुक्षया वरं मृत्युर्न तु दास्यं दुरात्मनामित्युक्त्वात्यजति परसेवाकार्यम्। दुर्जनोऽपि रक्षकः रेवायाः सङ्गात् सज्जनःभवतीति तात्पर्यम् । एवं सुभाषितानां कथाभिः सहसम्बन्धः तात्पर्यकथने सामर्थ्यं साफल्यञ्च द्रष्टुं शक्नुमः ।

कथास्वपि यत्र तत्र सुभाषितानि विकीर्णानि सन्ति । यथा कटुविपाकः इत्यस्यां कथायां ग्रामप्रमुखस्य पुत्री तं पृच्छति–'वर्षोदबिन्दुरप्येकः कल्पते घटपूर्तये । (2.72) तस्यैव सुलभा मुक्तिः सङ्कल्पो यस्य निश्चलः (1.26)

सुभाषितैः सह वाक्प्रचरा अपि प्रयुक्ताः क्षमादेव्या । यथा कटुविपाकः इत्यस्यां कथायां तालवनमुच्छिन्नमिति श्रुत्वा क्रोधान्धस्य ग्रामप्रमुखस्यवाक्यमिदम्– 'पशुताडमहं सर्वांस्ताडयिष्यमि पापिनः' । (2. 93) अत्रपशुताडमिति पदेन ताडनक्रौर्यं व्यञ्जिम् । अस्यामेव कथायां पुत्रस्य रक्षकैः कृतां दुर्दशां दृष्ट्वा ग्रामणीर्वदति – तेनैव कृता शय्या शेतां तदुपरि स्वयम् । ' (2.162)

कथासूत्रम्

सर्वास्वेव कथासु गान्धीमहोदयांना सत्याग्रहान्दोलनस्य सूत्रं वर्तते। जनानां सत्याग्रहशस्त्रेण स्वातन्त्र्यप्राप्तिविषये जनानां दृढनिष्ठा, अहिंसादीनां तत्त्वानामाचरणे निश्चयः तत्त्वपालनार्थं प्राणार्पणार्थमपि सज्जाः व्रतदीक्षिताः कथानायिकाः च दृश्यन्ते एतासु कथासु । भूकरदानार्थं पीडयन्तं ग्रामणीं दृढमविचलधैर्या रेवा सरोषं वदति–

जयप्राप्तिर्न यावत् स्याद्युद्धेऽस्मिन् सत्यजीविते ।
स्थास्यामः सर्वदा भद्र निश्चिला अचला इव ।। 1/94

कटुविपाकः कथायाः प्रारम्भेऽहिंसा तत्त्वस्य महत्त्वं प्रतिपादितम्

अहिंसयैव वार्येत सन्त्रासः परशासितुः ।
इति श्रद्धा दृढा ह्यासीत् तत्पुरस्य निवासिनाम् ।।2/4
आयोधनमिदं दिव्यमहिंसाबलसंज्ञितम् ।
ऐतिहासिककालात् प्राङ्न श्रुतं भारताद्बहिः।।215

वीरभेति कथायां ग्रामयोषितानां प्रोत्साहनार्थं वीरभा वदति–

अहिंसासत्यरूपेण वयं बद्धा व्रतेन हि ।
धर्मे कनिष्ठतां चापि शिक्षिताः स्मो महात्माना ।। 3/46

रेवायाः कथा इत्यस्यां कथायां स्वातन्त्रयप्राप्तिरित्येवास्माकं जन्मसिद्धाधिकार इति वदति रेवा–

जन्मसिद्धाधिकारोऽयं स्वातन्त्र्यं नाम देहिनाम् ।
वयं च तत्पुनः प्राप्य शीर्षमुर्ध्वं वहामहे ।। 1.116.17

बालगङ्गाधरतिलकस्य प्रभावः दृश्यतेऽस्मिन् श्लोके।

स्वतन्त्रातासङ्ग्रामे योषितानां सक्रियसहभागः तदर्थं दृढनिश्चय इत्येतेन सूत्रेण बद्धाः एताः कथाः ।

चरित्रचित्रणम् –

कथानायिकानामितरपात्राणाञ्च चरित्रचित्रणं क्षमादेव्या समर्थतया कृतम् ।

रेवायाः वर्णनं पश्यामः।

प्रांशुरासीत् कृशाङ्गी च मनोज्ञा पटुलेचना ।
प्रत्युत्पन्नमतिश्चैषा सङ्कटे क्षिप्रकारिणी ।। 1/28
एकास्मिन्नेव श्लोके रेवायाः शरीरयष्टिर्गुणाश्च प्रोक्ताः । यदा ग्रामणीः रेवां वदति – 'विचित्राः किल युष्मांक जयप्राप्तौ मतिविभ्रमः । ' तदा क्रुद्धा रेवा सरोषं वदति –'किं वैचित्र्यमिहास्ति भो :।'

भ्रमत्वेन गृहीतं यत्त वया तद् गौरवाय न : ।
स्वाभिमानात् प्रियं भूयो मनुष्यस्य न विद्यते ।
मानभङ्गं स्वदेशस्य यः सहेत स कीटकः ।।

स्वदेशस्य मानभङ्ग न सा कदापि सहते न चास्याः पुत्रोऽपि । तदर्थमेव तस्याः पुत्रेण ग्रामेशपदं त्यक्तम् । पुत्रस्य मृत्योर्वृत्तान्तं श्रुत्वा रेवायाः स्थितिं वर्णयति कथालेखिका –
क्रन्दन्ती तद्वचः श्रुत्वा न्यस्तहस्ता स्वमस्तके।
सर्वाङ्गैरवसीदन्ती पपात भुवि सावशा ।। 1/142
कारुण्यमूर्तिरस्मत्पुरतः साक्षादुपस्थापयति क्षमादेवी ।
तस्याः दातृत्वं स्थाने स्थाने वर्णितं क्षमादेव्या । गृहत्यागात्पूर्वं तया बहुनि वस्तूनि सेवकाय दत्तानि । तस्याः दातृत्वं दृष्ट्वा सोऽपि विस्मितः । विदेशीवस्तुषु रुचिर्नासीत् तस्याः ।

यदा रेवायाः गृहं ज्वालितं दुष्टजनैः तदा सा स्तब्धा जाता परं अनुक्षणं सर्वं त्यक्त्वा निर्गता सा तस्मात् स्थानात्

मुहुर्तमिव सा स्तब्धा तस्थौ स्थाणुरिवाचला । 1/179
परं ज्वालां दृष्ट्वा उक्तं तया –
ज्वालेयं जटिला पुण्या दीपिकेति विभाव्यताम् ।
नीराज्यते ययास्माभिर्बुद्धिनेता बृहस्पतिः ।। 1/189

अत्र बुद्धिनेतेति पदं महात्मागान्धीमहोदयानां कृते प्रयुक्तम् । तस्यैव नीराजनं एतया ज्वालया कृतमिति भाव : । गान्धीमहोदयान् प्रत्यत्यादरः व्यञ्जितः पदेनेतेन ।

कटुविपाक : इत्यस्याः कथायाः नायिका ग्रामेशस्य पत्नी । देशसेवकान् प्रति तीव्रक्रोधः तस्य ग्रामेशस्य मनसि वर्तते । परं तस्य

पत्नी पुत्रः कन्या च सर्वे देशसेवाकार्ये रताः सन्ति । ग्रामप्रमुखस्य भयात् न ते स्वतन्त्राः। सततं भयभीतां कथानायिाकां वर्णयति कथालेखिका–

ग्रामण्ये दारुणस्यास्य पुरो भार्या तपस्विनी ।
कृशाङ्गी देशभक्ता च कम्पते स्म दिवानिशम् ।।2 ।18

तपस्विनी पदेन तस्या असहायत्वं सूचितम्। देशकार्यं कर्तृकामपि न सा स्वतंत्रा । तस्याः पुत्री प्रतिदिनं देशसेविकानां शिबिरं धूतवस्त्राणि नयति । परं भर्तृक्रोधात्तां रक्षितुमेव सततं तस्याः प्रयासः। अतः कन्यायाः सेवाकार्यं गोपयितुं यतते सा । तस्याः देशभक्तः पुत्रस्तु जनकेन क्रोधात् गृहाद्बहिर्निष्कासितः । तस्या पुत्री पित्रागमनाद् पूर्वं गृहं नागच्छति चेत् कथं रक्षामि तामिति चिन्तया सतत ग्रस्ताऽऽसीत् सां। तस्याः स्थितिरत्र वर्णिता –

भर्ता बुध्येत कन्यायाः शुश्रूषां सेविकाजने ।
इति शड्काकुला वृद्धा किंकार्य विधुराभवत् ।2.148
शीघ्रमेवाभिकाङ्क्षन्ती दारिकायां निवर्त्तनम् ।
आलोकते स्म सोत्कण्ठा महानसगवाक्षतः ।
पर्याकुलमना वृद्धा न ददर्श कुमारिकाम् ।
नैराश्योपहतेवासौ परावृत्ता गवाक्षतः ।
वर्तते स्म स्थिरश्वासा सावधाना बहिर्ध्वनौ ।।150 ।।

नैराश्यं, भयं, उत्कण्ठा चिन्ता एते भावाः सूक्ष्मतया वर्णिताः लेखिकया । कन्यायाः विषयेऽत्याहितं श्रुत्वा सा दुःखविह्वला माता अशनिविद्धेव निपपात महीतले ।

अस्यां कथायां क्रोधाविष्टस्य ग्रामाधिपतेः क्रोधः तस्य निरर्गलदुर्वचनानि देशसेवकान्प्रति देशकार्यं कुर्वाणान् स्वकुटुम्बजनान्प्रति च दुराग्रहः द्वेषश्च्च क्षमादेव्या संभाषणद्वारेणोत्तमरीत्या प्रकटितः । कथायाः प्रारम्भे एव तस्य स्वभाववैशिष्ट्यं सुस्पष्टं भवति ।

बभूवुस्तं विना सर्वे सत्याग्रहपरायणाः ।
देशयुद्धमहावर्ते निमग्ना ग्रामवासिनः ।। 2.2
बभूव ग्रामणीरस्याः पल्लिकाया दुराग्रही ।

प्रतिकूलमतालम्बी शठः स्वार्थैकतत्परः ।।2.16

ग्रामप्रमुखपदेन शक्त्या च गर्विष्ठो जातोऽयं ग्रामणीः ।

देशसेवकैः तालीपादपाः उच्छिन्ना इति श्रुत्वा सः सगर्वं वदति–

पशुताडमहं सर्वांताडयिष्यामि पापिनः ।

वेत्रयष्टिप्रहारैस्ते जानन्तु मम पौरुषम् ।।2.96

एतेन गर्वेण सः देशकार्यरतं पुत्रं गृहाद्बहिर्निष्कासितवान् ।

तस्य तपस्विनी सततं भयाक्रान्ता भार्या पुत्र्याः देशसेवां गोपयितुं यतते स्म ।

स्वकन्या विक्षता आर्ता रुग्णालये स्थितेति कुमारादेकात्वृत्तं श्रुत्वा स ग्रामणीः उच्चैर्जगर्ज–

क्रोधाविष्टः पतिस्तस्या जगादोच्चैरनार्यवत् ।

ब्रूहि कस्यानुमत्या वा सुता मम बहिर्गता ।। 2.186

ग्रामणीरथ चुक्रोश वक्रीकुर्वन्निजाननम् ।

विरूपयंश्च तद्भूयः किमुन्मत्ता भवेत् सुता ।।2.190

एतेन प्रसङ्गेण भ्रमिष्ठः ग्रामणीः देशसेवकान् भूरिशोऽशपत् ।

शापौघो निर्ययो तावन्मुखाद्भर्तुर्निरर्गलः ।।

दुरुक्तानि बहून्येष ग्रामेश उदचारयत् ।

देशबन्धून् समुद्दिश्य सत्याग्रहपरायणान् ।। 2.195.196

एवं खलपुरुषस्यापि चित्रणं क्षमादेव्या उत्तमरीत्या कृतम् ।

क्षमादेव्याः चरित्रचित्रणस्य परमोत्कर्षं वीरभायाः चित्रणे दृश्यते । शत्रूणां कृते साक्षाद्दामिनीव अग्निशिखेव असिपुत्रिकेव रणरागिणीव पौत्रस्य कृते वात्सल्यमूर्तिरम्बेव ग्रामयोषितानां कृते प्रेरणादायिनी सखीव वीरभा चित्रिता कथायामस्याम् । वीरभायाः शरीरसौष्ठवं धैर्यं निर्भयता च वर्णिता कथारम्भे

निर्व्याजभरं वक्त्रं वीरभायाः कृशाधरौ ।

तेजास्वीव तन्नेत्रो धैर्यमस्या असूचयन् ।।

उन्नता मां लाङ्गीव च नताङ्गी च बभूव सा ।

लोकोत्तरबलाढया च प्रसहिष्णवपुर्गुणा ।।

प्रगल्भा च प्रतिद्वन्द्वे बलिभिः पुरुषैरपि ।

व्यस्मापयज्जनान् सर्वान् स्वया सा कायसम्पदा ।। 3.6–8

वीरभायाः पराक्रमं दर्शयितुमेकः प्रसङ्गोऽ पि रचितोऽत्र । रात्रौ निर्गते भर्तरि सा एकाकिनी गृहप्रविष्टेन लुण्ठकेन सह युद्ध्वा तं गृहात्बहिर्निष्कासितवती। दुःखातिरेकेणापि न सा स्वकर्तृत्वाच्चलिता । पुत्रस्य मरणवृत्तं श्रुत्वा शोकावेगेन व्याकुला जाता परं गच्छता कालेन स्वदुःखमतिक्राम्य भर्तारं सा सान्त्वयामास । पौत्रः पुत्रवल्लालितस्तया । विदेशीवस्तुनि नयद्यानस्य पुरतः स्थितस्य युवकस्य शरीरस्योपरि यानं चालितम्। तेन तस्य युवकस्य मृत्युर्जातः ।

एतादृशप्रसङ्गः सत्याग्रहगीतामहाकाव्ये वर्णितः । (सत्या गीता 16.14)

संघटनकुशला सा ग्रामाद्ग्रामान्तरं गत्वा ग्रामयोषिताः सम्मेलयितुं अटिता । तस्याः प्रोत्साहनपरा निश्चितार्था मधुरा च वाणी

योऽत्याचारः कृतो घोरः प्रतिग्रामनिवासिषु ।

स बलात् प्रत्यवस्थेयः क्रान्त्वा विघ्नशतान्यपि ।।3.24

वीरभायाः वचनं श्रुत्वा ग्रामस्त्रिणामवस्था एकेनैव पदेन वर्णिताः 'विषण्णभीतसन्दिग्धास्तिष्ठन्ति च समन्ततः । ताः प्रोत्साहयितुं पुनरुक्तं तया

अहो कस्माद्भगिन्यो वः शङ्का पुनरपीदृशी ।

यूयं निश्चितचित्ताश्चेद्भर्तारः स्युर्न रोधकाः । 3.34

तत्रोपस्थितबान्धवानप्युपदिशति सा –

युष्माभिरपि कर्तव्यं काले साहायकं च नः ।। 3.36

'निश्चितार्थान्न विरमन्ति सज्जनः 'इत्युक्त्यनुसारमासीद् वीरभायाः कार्यप्रणाली । जनसंमर्दे शुकनासं ग्रामेशं दृष्ट्वाव भूकरार्थमेवागत इति ज्ञात्वा वीरभा तं वदति –

यानन्न लभ्यतेऽस्माभिः स्वराज्यं चिरकाङ्क्षितम् ।

तावन्नैव प्रदास्यामः प्राणान्तेऽपि भुवः करम् ।।3.42

तदेतद्राजभृत्येभ्यो निश्चितं विनिवेद्यताम् ।।43

बालं गृहीत्वैव सर्वत्र भ्रमति स्म वीरभा । प्रवासस्य कष्टमविगणय्य जनसंघटनाय भ्रमणं तस्याः कृते आनन्ददायकमेव ।
बोर्सदग्रामं परित्यज्य वटोदरे सा न्यवसत् । भूकरदानार्थं तस्याः क्षेत्रं विक्रेष्यते । विक्रयात्प्राग् कार्पासानि समुच्चेतुं तव पतिः ग्रामं गत इति श्रुत्वा सा धैर्यशालिन्यवदत् –
'कुर्वन्तु ते यथाकामं जानेऽहं तद्विभीषिकाम् । ' 3.71 अत्र क्षमादेवी तस्याः धैर्यस्य वर्णनं करोति –

स्वभावतो बभूवैषा चतुरा प्रतिभावती ।
विपद्यपि निजं धैर्यं न जहौ सार्थसंज्ञिका ।। 3.73

तस्याः गोधनं चोरितं लुण्ठकैः । कार्पासं चिन्वन् पतिरपि रक्षकैः कषाधातैस्ताडितः । सङ्कटाना सन्त्यनैकमुखानि । तथाप्यविचलधैर्या वीरभाया पतिं शयने निधाय निश्चितकार्यार्थं बालेन सह गन्तुं प्रस्थिता । बोर्सदग्रामस्य चतुष्पथे सर्वाः ग्रामस्त्रियः राष्ट्रध्वजं हस्ते गृहीत्वागन्छन्त्विति तस्या आदेशानुसारं साम्मिलिता आसन् सर्वाः । वीरभायाः नेतृत्वे योषितानां जनयात्रा प्रस्थिता । सहसा सशस्त्ररक्षकाणां समूहेन तत्रागत्य योषिताः दण्डप्रहारैः पीडिताः । योषितानां प्रोत्साहनार्थ। मनोधैयौर्थञ्च वर्धनार्थं वीरभा उच्चैरुदीरयत् – 'सख्यः प्राणव्ययेनापि ध्वजान् रक्षत सर्वतः। वीरभायाः स्कन्धे चण्डप्रहारः निपतितः । तथापि तया ध्वजरक्षणं कृतम् – 3/158

तद्दुरुक्तीरनादृत्य ताडनानि विषह्य च ।
वीरभा निश्चला तस्थौ रक्षन्ती राष्ट्रियध्वजम् ।। 3.166

राष्ट्रध्वजं कञ्चुकान्तरे निगूहय सा भूमौ पतिता । मूर्च्छिता सा मात्रा भर्त्रा च सेविता । संज्ञां लब्ध्वा यदा सा बालः कुत्रास्तीति पृष्टवती तदा एकेन रक्षकेन रक्षितोऽस्तीति श्रुत्वा आनन्दिता । तस्याः देशभक्तिं धैर्यं च दृष्ट्वा स रक्षकोऽपि प्रभावितः तेन परदास्यं त्यक्तमिति वीरभायाः प्रभावः । वीरभायाः विषये क्षमादेव्याः उक्तिरेषा –

अहो धन्या अमी लोका हृदि येषां मनागपि ।

बलात्कारः सुघोरोऽपि भयं नाजीजनत् क्वचित् ।। 1.180

वीरभायाः कथाबीजं बोर्सदस्थायाः लीलावती नाम गतभर्तृकायाः वृत्तान्तात् स्वीकृतमिति दृश्यते । सत्याग्रहगीतेतिमहकाव्ये वर्णितमतीदं वृत्तम् । (सत्या गीता 17.5–43)

भाषावैशिष्ट्यानि :–

अनुष्टुप्छन्दसा बद्धाः एताः कथाः। सरलावगम्या विरलसमासा प्रसादगुणयुक्ता च वैदर्भी रीतिरत्र प्रयुक्तास्ति । सत्याग्रहस्यान्दोलनाय कटिबद्धा एताः नायिकाः । रक्षकाणां घोरैरत्याचारैः पीडिता अपि स्वातन्त्र्यप्राप्तिं मनसि निधाय स्वनिश्चयादचलाः नायिकाः

वीररस्यालम्बनविभावाः । सैनिकानामत्याचारश्चोद्दीननविभावः चिन्ताधैर्यमत्यादयः व्यभिचारिभावाः । एतैर्विभावाद्यैः परिपुष्टः वीररस एवाङ्गीरस सर्वासु कथासु ।

अलङ्कारेषूपमोत्प्रेक्षारूपकादिनां प्रयोगः सर्वत्र दृश्यते यथा निर्जनग्रामपथवर्णनम् –

निष्प्रभं भीषणाकारं दृश्यते स्म वणिक्पथम् ।
उत्खातमिव भूगर्भात् पुराणं ध्वस्तमन्दिरम् ।। 3 |181

अत्र प्रयुक्तोत्प्रेक्षा ग्रामस्य शून्यत्वं प्रकर्षेण सूचयति । क्रोधानलमजिज्वलत् (3.2) मत्ताधिकारिणामत्याचारेण ग्रामवासिषु जनितः क्रोधः अग्निरूप इत्यनेन रूपकालङ्कारेण व्यञ्जते ।

स्वराज्येप्सामहावह्निर्वर्धते स्माधिकाधिकम् । इत्यत्र रूपकालङ्ारः प्रयुक्तः । ग्रामस्य शून्यत्वं 'धान्यक्षेत्राणि शून्यानि निःशब्दं कथयामासुः कृषिवलपलायनं कथयामासुरनेन विरोधाभासालङ्कारेणोक्तम् । ग्रामेशस्य पत्नी अशानिविद्धेव निपतिता महीतले (2.199) अत्रोपमा । प्रसङ्गवर्णने स्वभावोक्त्यलङ्कारस्य प्रयोगान् पश्यामः। ग्रामस्य शून्यत्वमत्रा वर्णितम्–

शून्ये चतुष्पथे वापि विथ्यां वा सुविदूरतः ।
न पुमान् न च नारी वा भवति स्माक्षिगोचरं।।
चण्डालकुक्कुरा ये च व्यलम्बन्तान्नकाङ्क्षिणः ।

पल्लिकायां पुरा तस्या नादृश्यन्ताद्य तेऽपि वा ।।
चकूजश्चटका ये च कूपाभ्यर्णे पुरा किल ।
डिड्डिरे ते बहिर्ग्रामात् सत्याग्रहपथानुगाः ।।2.35–37

क्षमादेव्याः शब्दप्रभुत्वमनन्यसाधारणम् । कुत्रचिन्नूतनशब्दानां प्रयोगोऽपि दृश्यतेकथासु । यथा 1) अवस्कन्द : (रेड), त्रपुदीपः (कन्दिल)3.81 धूमवर्तिका (बिडी) 2.73, भूकरशब्दस्य प्रयोगः बहुत्र वर्तते । भाणप्रसेविका (बॅग) 1.44

हृद्याः केचनप्रयोगाः यथा रेवा स्वभर्तृविषये वदति कथाशेषभर्ता (1.53)

कथासु बहुत्र सरलभाषया संभाषणेन कथासूत्रमग्रे नीयते । बहुनि संभाषणान्यत्र वर्णितानि यथा रेवाग्रामणीसंवादः, ग्रामेश–पत्नीसंवादः ,वीरभा–वनितासमूहसंवादश्चेति । कथाकथने निवेदनशैली सर्वत्र प्रयुक्ता। समकालीनां सामाजिकीं स्थितिं वर्णयन्त्याःस्वातन्त्र्यसङ्ग्रामस्य चित्रं यथावदालिखन्त्याः कथाः निश्चयेन संस्कृतसाहित्यं भूषयन्ति।

***

कथापञ्चकम्

कथापञ्चकमिती कथासङ्ग्रहेऽनुष्टुभछन्दबद्धाः पञ्च कथाः सन्ति। कथासङ्ग्रह एकोनविशतिशतकोत्तरत्रयस्त्रिंशत्तमे वर्षे (1933) रचितः प्रकाशितश्च। अस्य कथासङ्गस्य वैशिष्टयं क्षमादेव्या सङ्ग्रहस्य पुरोभागे उक्तमास्ति। एताः पञ्चकथाः तया पूर्वमाङ्ग्लभाषया लिखिताः। तासु तिस्त्रः कथा आङ्ग्लपत्रिाकायां प्रकाशिता। एताः कथाः तया संस्कृतेनानूदिताः। संस्कृतानुवादस्य प्रयोजनं तयोक्तम्,'द्विविधमस्य संस्कृतानुवादस्य प्रयोजनम् तत्राद्यं संस्कृतस्य प्रचारः। संस्कृतस्य शब्दकोषः विस्तृतः संस्कृतेन भवाभिव्यक्तिश्चान्यभाषापेक्षया सुलभा। अपरं महत्त्वपूर्णं प्रयोजनम्–आङ्ग्ललघुकथापद्धत्या संस्कृतेन कथा लेखनमिति। अल्पपात्रप्रसङ्गैर्बद्धोत्कण्ठावर्धकाः अद्भुतेन समाप्ताः लघुकथाः। आधुनिकलघुकथायाः एतानि वैशिष्टयानि। एतेनाधुनिककथातन्त्रोण बद्धाः एताः कथा। आधुनिककथातन्त्रेण संस्कृतकथारचनां कुर्वती क्षमादेवी प्रथमा कथालेखिका। एतस्य कथासङ्ग्रहस्य महत्त्वपूर्णं वैशिष्टयमेतद्। कथालेखनात्पूर्वं तया सत्याग्रहगीतोति महाकाव्यमनुष्टुभ्छन्दसा रचितमासीत्। अतस्तस्मिन् छन्दसि प्रभुत्वामासीत् क्षमादेव्याः अत एतेनैव छन्दसारचितौ द्वावपि कथासङ्ग्रहौ। अस्य कथासङ्ग्रहस्य प्रेरणा कन्यया प्राप्ता अतः तस्यैसमर्पितोऽयं कथासङ्ग्रहः क्षमादेव्याः।

।।श्रीः।।
बालिकोद्वाहसङ्कटम्।

बभूव पार्वती नाम कुलीना गतभर्तृका।
दास्यकर्म प्रकुर्वाणा देवरस्य निकेतने ।।1।।
मृते भर्तरि सा नूनं भविष्यत्येव किङ्करी।
इत्यभाषि पुरा लोकैर्धुल्लिकापुरवासिभिः।।2।।
यतः प्रभृति संप्राप्ता भर्तृबन्धुजनालयम्।
ततः कर्मकरीभूय स्थिता सा दीनभावतः ।।3।।
एवं वर्षेषु गच्छत्सु हीयमानशुभाकृति :।
प्रनष्टहृदयोत्साहा निराशा च बभूव सा ।।4 ।।

अतिबाल्यदशायां सा गुरुभिः पर्यणाय्यत।
शारदीयविधानात्प्राग् बाल्योद्वाहनिरोधकात्।। 5।।
अनुष्ठिते विवाहे च पितरौ पञ्चतां गतौ।
सुतामेकाकिनीं मुक्त्वा बालपत्यनुषङ्गिणीम् ।।6।।
अचिराद् बालभर्तापि पार्वत्याः पितरौ दिवम् ।
अन्वगादविदन्नेव विवाहोत्तरगौरवम् ।। 7।।
अथ किं पितृवात्सल्यं जानीयाद्बालिकैव सा ।
किं स्मरेद्वा स्वभर्तारमचिरातीतबाल्यकम् ।।8।।
काले प्रौढं वय : प्राप्ता बन्धुभिः सा विरूपिता।
कलयद्भिः कुलस्त्रीणां यौवनं विपदावहम् ।।9।।
केशलुञ्चनकाले तामीक्षित्वा साश्रुगद्गदाम्।
केशपाशो वितन्तूनां नाशकारीति तेऽब्रुवन्।।10।।
केशपाशविहीनापि न लावण्याद्ययुज्यत।
को वा निसर्गसौन्दर्यं यौवनं च विलोपयेत ।।11।।
श्वेतवासाः सुशीर्षा सा सुकुमारा च मोहिनी ।
येशुक्रिस्तस्य मातेव विरेजे मधुराकृतिः ।।12।।
ऊनविंशतिवर्षापि प्रयस्यन्ती दिवानिशम्।
आहरन्ती जलं कूपाद् धावन्ती वस्त्रसञ्चयम् ।।13।।
रक्षन्ती गोमहिष्यादीन् पचन्ती पाकमन्दिरे ।
परार्थे परिशश्राम मूर्तिः क्लेशमयीव सा ।।14।।
दासीत्वशृङ्खलां गुर्वीं दधत्याः प्रतिवासरम्।
क्षणमात्रमभूत्तस्या विश्रान्तिर्घटपूरणे ।।15।।
जलं कूपात्समुद्धृत्य वहन्ती शिरसा घटम् ।
श्रामं श्रामं निजावासं प्रत्यगान्मन्दभागिनी ।।16।।
अनिशं कर्मकुर्वत्या वत्सलो देवरात्मजः।
अव्याजमधुरालापी बभूवैकावलम्बनम् ।।17।।
विनोदयितुमात्मानं क्रीडन्ती शिशुना तु सा ।
निषिध्यते स्म नैर्घृण्याद्बान्धवैः पत्युरात्मनः।।18।।
भोजनं परिवेष्याथ क्षालयित्वा च भाजनम्।
अन्तःपुरस्य कोणे सा निषीदति तमोमये ।।19।।
अन्नशेषमतिश्रान्ता भोक्तुमुत्साहवर्जिता ।

तूष्णीमास्ते विषीदन्ती कर्कशैर्बन्धुशापितैः ।।20।।
अन्नस्यार्धं शुने दत्ते चरते गोष्ठसंनिधौ ।
स चोपतिष्ठते नित्यमाहाराय तदन्तिके ।।21।।
ततो मध्यनिशायां सा शनकैरुपसर्पति ।
कोणमेकं बहिर्गेहे तिमिरं जालकच्चरम्।।22।।
प्रत्यस्थिवेदनां गुर्वीं सहमाना तपस्विनी।
निराशया परिग्रस्ता निद्रातुं नैव शक्यति ।।23।।
अथ श्रमेण सुप्तापि प्रबुद्धा सहसा भवेत् ।
क्रुद्धान् स्वप्नेऽपि पश्यन्ती बन्धूनाक्रोशनिष्ठुरान् ।।24।
जाग्रती च तदन्वास्ते शृण्वती वायुसूत्कृतिम्।
गवां बालधिशब्दं च निकटस्थितगोष्ठकात् ।।25।।
दैवरं चिन्तयन्ती सा प्रहासानन्दकारकम्।
आत्मानं सान्त्वयन्ती च निद्राति कथमप्यहो।।26।।
सूर्योदये गवां दीना हम्बया सा प्रबोधिता।
दोहनाय घटीहस्ता गोष्ठकं याति सत्वरम्।।27।।
एवं वर्षेषु गच्छत्सु युवा कश्चिदगाहत।
तस्या हृदयमेकान्तं सूर्यांशुरिव गह्वरम्।।28।।
एकाकिन्यास्तदीयं च चेतसा स्वप्नभूपतिः।
मृग्यन्नान्तरसौन्दर्यं लौकिकानामगोचरम् ।।29।।
मलिनेऽपि स्थले तस्मिन् स प्रवासी व्यलम्बत ।
प्रियां साक्षाद्दिवा पश्यन् रात्रौ तु स्वप्नदृष्टितः ।।30।।
चिराय वक्तुकामोऽपि नोपैतुं धैर्यमाप सः।
यावद्दैवविपाकेन कालः स्वयमुपानमत् ।।31।।
तथा हि सा गता कूपमेकाकिन्येव जातुचित्।
निवर्तितुं गृहं शीर्घमुत्सकाऽभूद्विलम्बिनी।।32।।
तदा सार्वजनीनस्य समीपे कूपकस्य सा ।
दृष्टा दृष्टिपथेनैव यूनो हृदयमाविशत्।।33।।
अनेकवनितामध्यादेका सैव चकर्ष तम्।
विधवापि मनोहर्त्री सौलक्षण्यविशेषतः ।।34।।
तस्या अपूर्वलावण्यमाननाब्जं विलोकयन्।
चिन्तामुद्रितनेत्रे च युवा तस्थौ विमोहितः।।35।।
उग्रैः कटाक्षपातैस्तामपश्यन् योषितः सदा।

सूचयन्त्यः परं द्वेषं विधवेति च लाघवम्।।36।।
सर्वमेततत्परीक्ष्यासौ विस्मितोऽभूद्युवा भृशम्।
विधवानां हिं दीनत्वं ज्ञातपूर्वं न साधुना ।।37।।
दुरवस्था लघुग्रामे वितन्तुतरुणीजनैः।
या नित्यमनुभूयन्ते नालं वर्णयितुं हि ताः ।।38।।
तथा हि धुल्लिकापल्यामन्धा अज्ञानधूलिभिः।
धर्माधर्मौ न चापश्यन् कृपणास्तन्निवासिनः।।39।।
तदीया च मनोवृत्तिः परं सङ्कुचिताऽभवत्।
तस्मिन्मलीमसे ग्रामे वीथिकासंहतिर्यथा ।।40।।
कूपादुदकमुद्धृत्य घटं धृत्वा च संभृतम्।
जवात्प्रतिष्ठमानायाः पार्वत्याः पदमस्खलत्।।41।।
पदे च स्खलिते सापि पपात सहसा भुवि।
पङ्किलायां घटश्चापि भ्रंशित्वां रिक्ततामगात् ।।42।।
पतितां वल्लभां दृष्ट्वा साहायं कर्तुमुत्सुकः ।
स तूर्णमभिदुद्राव पार्वत्याः सविधं युवां ।।43।।
शनैरुत्त्थाप्य तां प्रह्वस्तदनुज्ञामयाचत।
घटेन स्वयमुद्धर्तुं पानीयं कूपतः पुनः।।44।।
मार्दवं वचसस्तस्य लोकोत्तरमलक्ष्यत।
आजन्मतस्तयान्येभ्यो न श्रुतं हि वचः प्रियम् ।।45।।
तेन व्यतिकरेणैषा विशेषेण चमत्कृता।
अचिन्तयदिदं कूटं प्रयुक्तं किमु बान्धवैः।।46।।
अर्धमार्गं घटं नेतुं याचमानं निवार्य तम्।
मा तावदहमवेदं नेष्यामीति जगाद सा ।।47।।
स्वनैसर्गिकबुद्ध्यैव युवा तच्चित्तमग्रहीत्।
तस्या हि दीनसँल्**ला**पस्तत्कथां समसूचयत्।।48।।
ततः प्रभृत्युभावेतौ मिलतः स्म दिने दिने।
गतास्वन्यासु नारीषु विविक्ते कूपसंनिधौ ।।49।।
क्लेशांस्तज्जीवयात्राया बन्धूनां च नृशंसताम्।
तर्कयन्नचिरात्सोऽपि दुःखितोऽभूद्युवा भृशम् ।।50।।
सानुकम्पोऽथ पार्वत्यां यथा क्षतमृगीं प्रति।
चुक्रोध पीडकेभ्योऽसौ लुब्धकेभ्य इवोत्कटम्।।51।।
मृदूक्तिरनुकम्पा च सौजन्यं चात्मगौरवम्।

सरलश्च तदाचारस्तस्यां विश्वासमादधुः ।।52।।
स जातु पार्वतीमाह सजीवा गृहीणी प्रिया।
अदाहि मे पुरा दैवादहो दुःखं चिराय मे ।।53।।
तदाकर्ण्य च सा शोकमुद्गतैरश्रुबिन्दुभिः।
व्यञ्जयन्ती बभूवास्य भूयसा प्रेमभाजनम् ।।54।।
अचिरादेव सौहार्दं तथा वृद्धिमगात्तयोः
क्षणं च मिलितौ दृष्टया यथानन्दमयौ स्थितौ।।55।।
पराजितमृगीवासौ तस्मिन् भक्तिपराभवत् ।
अपश्यत्स च तां नित्यमादरेण गरीयसा।।56।।
बभूवान्यादृशीवासौ सुखानुगतमानसा।
प्रफुल्लवदने तस्या दृश्यते स्म महत्सुखम्।।57।।
पुरा तदानने लक्ष्यं यद्दैन्यं चिरदुःखजम्।
तदद्य विलयं यातं रूपं चाभूत्समुज्ज्वलम्।।58।।
रूपान्तरमिवापन्नं मुखं वीक्ष्यापि बान्धवाः।
पूर्ववृत्तमनादृत्य कारणं न व्यचिन्तयन्।।59।।
तस्य देवीव भाति स्म विकृतापि मनागसौ।
सुकेशी यदि भूयः स्यात्तदा निरुपमा भवेत् ।।60।।
इति ध्यायन् कदाचित्स प्रयियासुस्तया सह ।
स्थलान्तरं जगादैनां गुप्तं निजमनोगतम्।।61।।
तन्निशम्य सुहृद्वाक्यं सहसाभूच्चमत्कृता ।
अकम्पत च सा ऋज्वी रोमाञ्चितकलेवरा।।62।।
अथ चिन्ताकुलां दृष्टिमवार्यक्लेशदर्शिनीम्।
तस्या विलोक्य तां प्राह सान्त्वयन्मधुरोक्तिभिः।।63।।
इतो गन्तव्यमावाभ्यां ननु नागरिकं परम्।
मा भैषीः परिणेष्यामि धर्मतस्त्वां प्रियेऽचिरात्।।64।।
कम्पमाना च साऽपश्यद्भाविनीं सुखदीपिकाम्।
प्रज्वलन्तीं मनोदृष्ट्या ज्वालामिव महावने ।।65।।
तमः क्लेशमयं सर्वं सहसाऽलीयत क्षणात्।
क्षणान्तरे तु बन्धूनां स्मृतिर्भयमजीजनत्।।66।।
मैवं मैवं न शक्यं तत्परतन्त्रास्मि बन्धुभिः ।
इति नम्रमुखी प्राह बाष्पाद्गदिताक्षरा ।।67।।
अलं भयेन ते भीरु प्रच्छन्नं ननु गम्यते ।

न गतिर्ज्ञास्यते लोकैरित्याह स करं स्पृशन्।।68।।
सबाष्पनयना सापि स्थितानाथा स्मितानना ।
गाढानुरागमव्यक्तं सूचयन्ती कटाक्षतः।।69।।
कम्पमानाधरां भीरुं दृष्ट्वा तदनुमोदनम्।
प्राप्तं मयेति निश्चित्य प्रहृष्टोऽभूद्युवा च सः।।70।।
अचिरादपसर्पन्तीं सम्भ्रमानन्दतुन्दिलाम्।
नेत्राभ्यामनिमेषाभ्यां पिबन्निव युवा स्थित :।।71।।
यथापुरमथान्येद्युः सायं तौ मिलितावुभौ।
अलक्षितौ प्रतस्थाते जवात्पुण्यपुरीं प्रति ।।72।।
नगरीमथ सम्प्राप्य स्थापयित्वा क्वचित्प्रियाम्।
अन्वेषितुं युवा यातः पुरे कञ्चित्पुरोधसम्।।73।।
ज्ञात्वा नामानि विप्राणां दारकर्मोपजीविनाम् ।
अटन्नपि दिनं कृत्स्नं नैव लेभे पुरोहितम्।।74।।

अथ युवा विप्रानुवाच

विधवां तरुणीमेकां वोढुमिच्छामि धर्मत :।
अतो वः प्रार्थये विप्राः कार्यतां दारकर्म नौ।।75।।
ईदृशेन विवाहेन धर्मलोपो भविष्यति ।
न हि तं कारयिष्यामो गम्यतामिति तेऽब्रुवन्।।76।।
तावुद्वाहयितुं केचित् प्रतिपन्ना द्विजातयः।
सवर्णभिन्नतां ज्ञात्वा प्रत्याचख्युस्तदर्थनाम् ।।77।।
ब्राह्मणावपि भिन्नौ स्थः सुतरां वर्गतो युवाम्।
संयोगो वामधर्म्यः स्यादित्याहुः किल ते द्विजाः।।78।।
अतर्कितान्तरायोऽसौ लौकिकज्ञानवर्जितः।
ययौ विषण्णसंभ्रान्तः पर्यन्ते न्यायवादिनम् ।।79।।
लेखपत्रेण साध्योऽयं विवाहो युवयोः सखे।
निगूह्य निजहिन्दुत्वमिति सोऽपि न्यवेदयत्।।80।।
प्रियां हि वोढुकामोऽहं धर्मान्तरमपि श्रये।
स एव सुलभोपाय इति चाह युवाऽऽस्थया।।81।।
मनोराज्यसुखं ध्यायन्नाशया हृष्टमानसः।
जगाम सत्वरं यत्र सोत्सुका प्रेयसी स्थिता।।82।।
विवाहः क्षणमात्रेण भविष्यति किलावयोः।
पुरोऽधिकारिणो नाम लिखित्वेति जगाद ताम्।।83।।

विवाहो न कदाप्येव श्रुतपूर्वस्तयेदृशः।
तद्विस्मिता च सम्भ्रान्ता पप्रच्छ प्रियमात्मनः।।84।।
विधवार्थं विवाहोऽयं विहितः किं विशेषतः।
वद वल्लभ तन्मह्यं प्रार्थये परिविह्वला ।।85।।
कल्पितो धर्मसिद्ध्यर्थं संयोगस्य सवर्णयोः।
विधिरेष विधानज्ञैरित्यवोचत स प्रियाम्।।86।।
कस्तत्र ननु लेख्योऽर्थ इति पप्रच्छ कातरा ।
प्रेक्षमाणा युवानं तं कम्पमाना च संभ्रमात् ।।87।।
निगूह्य तत्र हिन्दुत्वं न तत्कष्टं मनागपि।
कार्यं हि तद्विधानोक्तमित्यस्पष्टमुवाच सः।।88।।
नावां भ्रष्टौ भविष्यावो मा बिभीहि प्रिये ततः।
रक्ष्यते हि द्विजातित्वमिति कान्तां समादधे।।89।।
धुल्लिग्रामैकवासित्वाददृष्टविषयान्तरा।
उवाच कम्पमाना सा सम्भ्रमस्खलिताक्षरम्।।90।।
प्रतिभाति विवाहोऽयं वार्धुषेर्लेख्यपत्रवत्।
स्वजातीयैर्बहिष्कारादि्बभेमि खलु वल्लभ ।।91।।
ननु प्रिये त्वमाबाल्यात्सर्वलोकैस्तिरस्कृता ।
अलीकमेव तैर्मूर्खैः कृतमित्यवदत्प्रियाम्।।92।।
प्रायश्चित्तेन पूतः सन् स्वजात्या योज्यते द्विजः।
नो चेद्बहिष्कृतस्तिष्ठेद्यावज्जीवं तिरस्कृतः ।।93।।
इति नः पूर्वजैर्वृद्धैर्व्यवहारविचक्षणैः।
आबाल्यादनुशिष्टाः स्मो बहिष्कारादि्बभेम्यतः।।94।।
गच्छेयमपि लोकान्ते भवत्सहचरी यदि।
कथं रक्षेयमात्मानं बहिष्कारात्तु जातितः।।95।।
अलमात्मानमुद्वेज्य कातर्यं भीरुमुच्यताम्।
इति तां सान्त्वयामास चिन्तावात्याभिराहताम्।।96।।
सबाष्पा दीनदीना च प्रेक्षमाणा स्ववल्लभम्।
सा ततः सशिरःकम्पं विललाप सद्गदम्।।97।।
प्राप्तामितसुखायाश्च प्रतिकूलो विधिर्मम।
नोत्सहे संमतिं दातुं मित्र मे क्षम्यतामिति।।98।।
ततस्तामनुनेतुं स प्रायतिष्ट युवा मुहुः।
प्रोत्साहितापि सा भूयः साशङ्कैव पुनःस्थिता।।99।।

वस प्रिये मया साकं धर्मपत्नीव मानिता ।
सर्वदा त्वाभिरक्षेयमित्ययाचत वल्लभाम् ।।100।।
क्षणमात्रमतिष्ठत्सा सचिन्ता च निरुत्तरा।
दोलायते स्म तच्चित्तं द्वयोर्मध्ये विमर्शयोः।।101।।
अन्योन्यप्रेमसर्वस्वौ भविष्यावो निरन्तरम् ।
वेदिष्यति न कोप्यावां यदेकान्ते वसाम्यहम् ।।102।।
ऋते कर्मकरभ्यो मे जनान् क्षेत्राद्बहिर्मम।
न पश्यामि कदापीति व्याकुलां तां समादधात्।।103।।
दीर्घं निश्वस्य दुःखार्ता कम्पयन्ती शिरः पुनः।
निरुत्तरा चिरं तस्थौ दैवोपहतचेष्टिता।।104।।
वल्लभं प्रेक्षमाणाथ चलदोष्ठपुटाभवत् ।
यत्किञ्चिद्वक्तुकामेव तत्तु कण्ठे व्यलीयत ।।105।।
अथ सा दुःखमात्राय संगमोऽयं भविष्यति।
इति स्वभावतो ज्ञात्वा न्यग्रहीत्स्वमनः प्रियात्।।106।।
नाहमिच्छामि नेतुं त्वामात्मना सह दुर्गातिम्।
मत्कृते न त्वया त्याज्यः स्वार्थ इत्यब्रवीच्च सा ।।107।।
व्यक्तीकृतं द्वयं तस्मै वचसा दृढनिश्चयः।
स्मितेन कृत्रिमेणापि स्वदुःखस्य च चण्डता।।108।।
अन्नोदकमुपाहर्तुं निर्जगाम युवा ततः ।
आनीय च द्वयं शीघ्रं प्रियाया निदधे पुरः।।109।।
अल्पमात्रमसेवेताहारं चिन्तयाकुलौ।
प्रकृत्यैव मितालापा सा पुनर्मौनमाश्रयत्।।110।।
अनुमोदिष्यते योगं प्रियेत्याशंसया स्थितः।
नान्तरा निर्बबन्धैनामालापेन युवा क्षणम्।।111।।
सा तु लक्ष्यीकरोति स्म चेतसा धुल्लिपल्लिकाम्।
आत्मनः किङ्करीभावं बन्धूनां च नृशंसताम्।।112।।
एवमेव ममालम्बो देवरस्य कुमारकः।
सैष बाल्यमतिक्रम्य सादरो मयि वर्त्स्यति।।113।।
अद्यापि मयि बालोऽयमास्ते परमवत्सलः।
क्रमात्प्रौढं वयः प्राप्तो भूयः प्रीतिं करिष्यति।।114।।
इत्यात्मनैव चात्मानं सान्त्वयन्ती मनोरथैः।
सर्वदुःखानि सोढुं सा चकार दृढनिश्चयम्।।115।।

अथ यूना निजग्रामं प्रियां नेतुं कृतोऽन्तिमः।
प्रयत्नः परमोदारः सोऽपि जातो निरर्थकः।।116।।
मैवं मैवमिति प्राह सबाष्पा सा कृताञ्जलिः।
अपृष्ट्वैव च तत्स्थानं निर्जगाम प्रणम्य तम्।।117।।
दिनात्यये परेद्युश्च प्राप सा धुल्लिपल्लिकाम्।
परिल्कान्ता क्षुधार्ता च विमनाश्च वियोगतः।।118।।
देवरस्य गृहं यान्ती व्यतिचक्राम साऽध्वनि।
कूपं यत्राचिरायन्त काश्चिन्नार्योऽतिजल्पिकाः।।119।।
आलोक्य पार्वतीं यान्तीं प्रवासमलिनाम्बराम्।
उच्चैराक्रान्दमानास्ता ग्राम्यजल्पैरपाहसन्।।120।।
नारीरुपेक्ष्य निर्लज्जाः सत्वरं सा यदाऽव्रजत्।
जहसुस्तास्तदात्युच्चैरुद्वेजयितुमेव ताम्।।121।।
प्रतिकूलप्रवातेन प्रहता मन्दभागिनी ।
अधोमुखी प्रदोषे सा प्राप देवरमन्दिरम्।।122।।
गृहस्य प्राङ्गणं लिप्तं तमसेव बभौ तदा ।
निश्शब्दं विजनं चासीत्तद्ययौ साऽपराङ्णम्।।123।।
गोष्ठद्वारमपावृत्य पश्यन्तीमथ गोव्रजः।
तृणश,य्यासु विश्रान्तः साभिज्ञं तामलोकयत्।।124।।

शुनकः स्वैरचारी यः प्राप्नोति स्मान्वहं गृहम्।
उपागच्छत्परायातां लेढुमस्याः करं कृशम्।।125।।
शीर्षे हस्तपरामर्शैर्लालयन्तीं विलोकयन्।
शुनकः सदयो मौनी संल्लापमकरोदिव ।।126।।
नयने तस्य पश्यन्त्याः सबाष्पे प्रेमसम्प्लुते।
स्वात्मानुकम्पया तस्या हृदयं नु व्यलीयत।।127।।
अथ सा शुनकं भक्तमुवाच स्वानुयायिनम्
अन्नं दास्यामि तिष्ठेति स च श्रुत्वा तथा स्थितः ।।128।।
वेदिसोपानमारुढाऽपश्यदर्धप्रकाशितम्।
महानसनिविष्टेन लघुदीपेन तद्गृहम्।।129।।
पदशब्दं निशम्याऽऽगाद्बहिः शीघ्रं प्रधावितः।
हर्षनिर्भरमुग्धास्यः प्लवन् देवरपुत्रकः।।130।।
यावत्स बालको धावन्नातिचक्राम देहलीम्।
रुरुधेऽस्य गतिस्तावत्कर्कशध्वनिनान्तरात्।।131।।

स्निग्धपाणिः कुमारोऽयं मुखसंलग्नसिक्थकः।
प्रेमामृताप्लुतैर्जल्पैराह्वयन् पार्वतीं स्थितः।।132।।
प्रासारयत्करौ यावत्सबाष्पा साऽर्भकं प्रति।
तावत्तस्याऽऽययौ माता क्रोधवक्रीकृतानना ।।133।।
आगतासि किमत्र त्वं कुलं दूषयितुं पुनः।
इति चोक्रुश्यमाना सा पार्वती निरभरर्त्सयत्।।134।।
अलीकेनापवादेन जातामर्षापि पार्वती ।
वज्राहतेव संस्तव्धा विवर्णा च बभूव सा ।।135।।
तीव्रयातनया मृत्योराविष्टेव क्षणं स्थिता।
ततो नतमुखी पश्चात्पदद्वयमपासरत्।।136।।
तावच्च बालकः प्रोच्चैः पार्वतीं पुनराह्वयत्।
स्तब्धा च सा क्षणं बाले बद्धदृष्टिरवस्थिता।।137।।
देहि मातुलि मे भोज्यमिति म्लिष्टमुवाच सः।
करौ प्रसार्य सस्नेहं पार्वतीं प्रति बालक।।138।।
उपसर्पति तद्बाले पुनराशाङ्कुरो हृदि।
प्ररूढः सहसा तस्या भाविकल्याणसूचकः।।139।।
यावन्न बालकोऽसर्पत्सोत्सुकः पदमेककम्।
तावत्कङ्कणभाराढ्यः पाणिरेको रुरोध तम्।।140।।
मा स्म गच्छान्तिकं तस्या अस्पृश्या सा हि बालक ।
इति चुक्रोश मातास्य कर्षन्ती दारकं बलात्।।141।।
निराशया स्थितः खिन्नो दर्शं दर्शं स विस्मितः।
अस्पृश्या सा कथं जाता भवेदिति विचिन्तयन्।।142।।
शोकावेगेन संस्तब्धा क्षणमस्थात्तपस्विनी।
आनाथ्थभावनोद्विग्ना निष्कासितशुनी यथा।।143।।
दुःखभारेण सीदन्ती कम्पमानकलेवरा।
संधारयितुमात्मानमिवासीत्स्वस्तिकस्तनी।।144।।
अवारोहत्ततो दीना वेदिसोपानातः शनैः।
अङ्गणाच्च विनिष्क्रम्य तमिस्त्रयामगाहत।।145।।
शुनको यश्चिरायैनामवतस्थेऽनुपालयन्।
क्षुधार्तोऽपि स्वयं भक्तः सोऽन्वयासीदकिञ्चनाम्।।146।।

पुष्पिका ——"द्वेषेऽपि भ्राजते प्रेमा "इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां कथापञ्चके बालिकोद्वाहसङ्कटं नाम कथा समाप्ता।

***

कथासारांशः—पार्वती नाम काचिग्दतभर्तृकासीत्। बालविवाहनिरोधकशारदीयविधानात्प्राक् (शारदाॲक्ट) पार्वत्याः विवाहः केनचिद्बालवरेण सह जातः।विवाहादनन्तरं तस्याः पितरौ दिवङ्गतौ। पार्वत्याः भर्तापि अचिरेणैव कालेन मृतः। प्रौढवयसि प्राप्ते न सा पितृवात्सल्यमस्मरन्न वा भर्तारम्। देवरस्य गृहे तस्याः केशलुञ्चनं कृतम्। केशपाशविहीनापि प्रकृत्यैव सौन्दर्यवती सा चित्ताकर्षकैवासीत्। आदिनं कूपाज्जलमाहरन्ती वस्त्रसञ्चयं धावन्ती गोव्रजं रक्षन्ती महानसे पचन्ती सा रात्रौ गोष्ठसमीपे गृहस्य तमोमयकोणे निद्राति स्म। स्वप्नेऽपि क्रुद्धान् दृष्ट्वा सुप्तापि सहसा प्रबुध्यते स्म। देवरस्य पुत्र एव तस्याः एकमेवास्ति मनोरञ्जनस्थानम्।

एवं गच्छसु कालेषु यौवनमापन्नायाः तस्याः हृदये कश्चिद्युवा प्राविशत्। कूपाज्जलमाहरन्तीं पार्वतीमपश्यत् सः। तस्याः सौन्दयेणाकृष्टः सः प्रवासी तास्मिन्नेव ग्रामे न्यवसत्। दैवादेकदावसरः प्राप्तः तया सह वार्तालापं कर्तुम्। जलपूर्णघटं धृत्वा वेगेन गन्तुकामायाः पार्वत्याः पदमस्खलत्। पतिता सा भुवि घटोऽपि भ्रष्टः। तां साहाय्यं कर्तृमुत्सुकः सः पार्वत्याः सविधं गतः। तस्य मृदुवचनानि श्रुत्वा मार्दवञ्च दृष्ट्वा पार्वती चकिताभवत्। यतो हि तया इदृङ्मधुर इतःपूर्वं न कदापि श्रुतमासीत्। शनैः शनैः सा तस्मिन् भक्तिपराभवत्। तेन युवकेन सह पुण्यपुरं गता। 'अहं त्वां परिणेष्यामि धर्मत इत्युक्त्वा तां सान्त्वयामास युवकः। तां क्वचिदवस्थाप्य सः विवाहार्थं पुरोहितमन्वेष्टुं गतः। परं न कोऽपि सिद्ध आसीद् विधवाविवाहार्थम्। निजहिन्दुत्वं निगूहय शक्यते विवाहः इति ज्ञात्वा सः पुनः पार्वत्याः समीपमागत्य विवाहोपायमुक्तवान्। अश्रुतपूर्वविधिना विवाहेन बहिष्कृताः भविष्याव इत्यनेन भयेन सा निराकृतवती। तस्य स्थानमपृष्ट्वा सा ततः निर्गत्य स्वग्रामं प्राप्ता। परं

तत्रापि स्थानं नासीत् तस्याः कृते। आगतासि किमत्रत्वं कुलं दूषयितुं पुनरीति देवरपत्नी निरभर्त्सयत्ताम्। गृहमागतां तां द्रष्टुमागतं देवरपुत्रं तस्य माता उक्तवती 'मा स्म गच्छान्तिकं तस्या अस्पृश्या सा हि बालक।' एतानि दुर्वचनानि श्रुत्वा कथञ्चिदात्मानं संधार्य दीनदीना सा ततः निर्गता।

गिरिजायाः प्रतिज्ञा

उवास गिरिजा नाम वृद्धा काचित्कुलाङ्गना।
कस्मिंश्चिदुटजे पूर्वं गिरिकन्दरसंश्रये ।।1।।
लीलनामकपल्ल्यन्ते पुण्यपुर्याः समीपतः।
कन्दराग्रे कुटीरं तत् सन्निविष्टमभूद्वने।।2।।
कदाचिच्छिशिरे काले विलम्बितदिवाकरे।
प्रत्युषस्तिमिरे मग्ना व्यक्ताव्यक्ता दरी बभौ।।3।।
न यावत्तिमिरच्छाया गता निरवशेषतः।
अदर्शि तावदुद्द्योतः शनैर्दूराद्विसृत्वरः ।।4।।
ततः शनैरुदैज्ज्योतिर्मण्डलं घनमध्यतः।
नीहारपटलच्छन्नां हरितां दीपयद्दरम्।।5।।
बोधितापि महत्येव प्रत्यूषे पक्षिकूजितैः।
चिराय शयनीयस्था नयने नोदमीलयत् ।।6।।
सूर्यांशुरतिसूक्ष्मोऽपि प्रविशन् भित्तिरन्ध्रतः।
अलमासीदपाकर्तुं शय्यागृहगतं तमः।।7।।
अपास्य काम्बलं वासः सामिवारितजृम्भिका।
मुक्त्वा च शयनं शीघ्रं गवाक्षद्वारमभ्यगात्।।8।।
क्षणद्वयमतिष्ठत्सा मन्दमारुतसेविनी।
प्रेक्षमाणोदयं भानोः प्रत्याशापूर्णमानसा।।9।।
वैधव्यस्य महाक्लेशान् प्राप्ता यौवन एव सा।
पश्चात्पुत्रवधार्ता च प्रतीकारपराभवत्।।10।।
द्वेषेण कथ्यमाना सा प्रतिज्ञामकरोद्दृढाम्।
यत्सिद्धिमभिकाङ्क्षन्ती ध्रियते स्माब्दविंशतिम्।।11।।
स द्वेषो वत्सरैरेभिर्वृद्धिमेत्य महोत्कटः।
नवं नवमकार्षीच्च जीर्यन्त्या अपि जीवितम्।।12।।
प्रतिज्ञासिद्धिमीप्सन्त्या वैरनिर्यातनं प्रति।

शोकावेगमयी तस्या आसीत्सह्या हि दुःस्थितिः ।।13।।
मध्यं वयो व्यतीतापि चटुलाङ्गी पटीससी।
अतिशेते स्म चापल्यं तरुण्या अपि साऽनिशम्।।14।।
उन्नता स्त्यानदीर्घा च नताङ्गी वेतसोपमा।
कृशहस्तापि कार्येषु कृतहस्ता बभुव सा ।।15।।
नासीत्तन्मुखमुद्रायां विशेषेण विचित्रकम्।
किन्तु सङ्कुचिते आस्तामक्षिणी तीक्ष्णदर्शिनी ।।16।।
सूचयामासतुः स्पष्टं नेत्रे कारुण्यवर्षिणी।
कथामेकान्तवासस्य प्रतिज्ञायाश्च दारुणाम्।।17।।
ईषत्तु विवृते तस्या निलिल्ये दन्तुरे मुखे ।
छाया नैसर्गिकप्रीतेरव्याजोपकृतेस्तथा ।।18।।
सामान्यतस्त्वसूच्यन्त तदीयमुखलक्षणात्।
कार्येषु शुद्धसङ्कल्पः सत्यं चात्मविनिग्रहः।।19।।
सुस्वप्नदर्शिनी जातु प्रबुद्धा मुदितान्तरा।
कोकिलेव प्रगायन्ती दिनचर्याश्चकार सा ।।20।।
आहरन्ती जलं कूपात् सिञ्चन्ती प्राङ्गणद्रुमान्।
कक्षानुन्मूलयन्ती च वृक्षवाट्यां पराङ्गणे।।21।।
पचन्ती मितमाहारं नातिमृष्टं महानसे।
गायन्ती दोलिकागीतिं मधुरामन्तरान्तरा।।22।।
विविक्तवासनिर्वेदं क्लेशानां च परम्पराम्।
अशेषमेव विस्मृत्य परिहृष्टा व्यवाहारत्।।23।।
आकुमारवियोगात्सा स्थिता निर्विण्णमानसा।
सुमृष्टान्नं परित्यज्य प्रियं पुत्रस्य यत्पुरा।।24।।
समाप्तभोजना साथ कार्यशेषोद्यताऽभवत्।
घटस्थाल्यादि पात्राणि मार्जयन्ती गुहाद्बहिः।।25।।
गोमयेनोपलिम्पन्ती भूतलं पूर्वशोधितम्।
उद्धरन्ती जलं कूपान्निशायां पाकसिद्धये।।26।।
निर्वृत्तगृहकार्या सा परिश्रान्ता विशेषतः।
निद्रासुखमभीप्सन्ती शयनीयमसेवत।।27।।
शयिता ह्रस्वपर्यङ्के सा मनस्युदलेखयत्।
स्वजीवितस्य चित्राणि दुःखदस्यानुपूर्वशः।।28।।
उद्भवं निजपुत्रस्य बाल्यावस्थां च तादृशीम्।

अल्पावधिं च कौमारं निधनं च तथाविधम्।।29।।
यावद्ध्यायति पुत्रस्य प्रेतकार्यं गृहागतम्।
तावद्दुःखव्रणं तस्या हृदये नवतामगात्।।30।।
नानाविचित्रसङ्कल्पैरभवज्जटिंल मनः।
स्मरणं चातिवृत्तानामगमच्च सुतीव्रताम्।।31।।
शयितार्धघटीमात्रं शुश्राव सहसा समम्।
शृङ्खलाया झणत्कारं पादाघातस्य च ध्वनिम्।।32।।
कुटरिस्य बहिर्द्वारमथोद्घाट्य बलाद् विशन्।
कश्चिद्बन्दी परिश्रान्तो निश्वसन्नपतद्भुवि ।।33।।
यावदाश्चर्यविष्टब्धा गिरिजोत्थाय पश्यति ।
तावदागन्तुकः क्रन्दन् भीतभीतो जगाद ताम्।।34।।
अम्ब गोपय मां क्वापि संवृते शरणागतम्।
इति ब्रवन्नुपार्सच्छृङ्खलाभारपीडितः।।35।।
कुत्र त्वां भद्र गूहेयमिदमल्पं हि मे गृहम्।
इति साऽभिमुखीभूय सकम्पा तमवोचत।।36।।
मैवं हा न विलम्बस्व मातरायान्ति ते क्षणात्।
इत्युवाच स्खलद्वाचा कोष्ठागारं निरूपयन्।।37।।
केऽन्वायान्तीति पृष्टोऽसौ तां जगाद स सम्भ्रमात्।
क्रूरास्ते बन्दिपाला मे प्राणाः संशयिता अहो।।38।।
बद्धदृष्ट्याभिपश्यन्तीं साशङ्कामिव तां विदन्।
वराकश्चकितः प्राह दीनभावेन सत्वरम्।।39।।
दशवर्षाणि कारायां मया क्लेशा महत्तराः।
असह्यन्त दिवारात्रमधमैः सह बन्दिभिः।।40।।
संप्राप्यावसरं प्रातरात्मानपवाह्य च।
सशृङ्खलं प्रधावन्तं रक्षिणो मामनुद्रुताः।।41।।
बन्दिनो वचनं श्रुत्वा दयाविष्टा बभूव सा।
चिन्तयन्ती क्षणं तस्थौ भूतलन्यस्तलोचना।।42।।
अम्ब स्थापय मां गूढं न क्षिपेः क्षणमप्यहो।
गोष्ठे वा पाकशालायामुपरिक्रोडकेऽपि वा।।43।।
इत्युवाच वराकोऽयमङ्गुल्या तत्प्रदर्शयन्।
क्रोडकं यद्वितानस्थं सञ्चितेन्धनसंश्रयम्।।44।।
चिन्तयन्ती स्थिता यावत्कम्पमानशिराः क्षणम्।

तावदश्रावि निर्भेदी दूरात्कलकलध्वनिः ।।45।।
रक्ष मामम्ब याचे त्वां न गृह्येय यथा परैः।
इति सानुनयं बन्दी प्राह भीतः कृताञ्जलिः।।46।।
गिरिजाथ ददर्शोर्ध्वं सहसा विलसन्मुखी।
गवाक्षाभिमुखं यान्ती संज्ञया च तमाह्वत्।।47।।
पश्चिमाङ्णविस्तारः शय्यागारगवाक्षतः।
दृश्यते स्म सुविस्पष्टमग्रभागादगोचरः।।48।।
लङ्घयस्व गवाक्षात्त्वमेषास्मि द्रुतमागता।
इत्युक्त्वा सा बहिर्द्वारमभ्यगच्छत्सुसत्वरम्।।49।।
भीतभीतो वराकोऽसौ वातायनमुपस्थितः।
स्वपादौ च समाकर्षन्नस्खलत् पश्चिमाङ्गणे।।50।।
कम्पमानो बहिर्भित्तिमवलम्ब्य स्थितो युवा।
आतिथेयीं निरुच्छ्वासमात्मनः प्रतिपालयन्।।51।।
वृद्धा प्रतीक्षमाणं तमचिरात्समुपागमत्।
कूपके तिष्ठ गूढेऽस्मिन्निति चैनमबोधयत्।।52।।
बन्दी क्षणमिवातिष्ठत्साकूतमवलोकयन्।
तदीयोक्तेरभिप्रायमजानन्निव कृत्स्नशः।।53।।
अथैनं गिरिजावादीदिह त्वं कुशली भवेः।
कूपभित्तिगते क्रोडे सुविशाले निगूहितः।।54।।
अथापि चिरयन्तं सा विलोक्य पुनरब्रवीत्।
पुनः क्षेप्स्यामि ते रज्जुं गतेषु तव शत्रुषु।।55।।
इत्याश्रुत्य घटीयन्त्रे वृद्धा रज्जुमयोजयत्।
तामवातारयच्चान्तर्यथाग्रं जलमस्पृशत्।।56।।
तावच्च शुश्रुवे दूरात्क्रन्दनस्य प्रतिध्वनिः।
यमाकर्णयतोऽङ्गनि सीदन्ति स्मेव बन्दिनः।।57।।
अथासीनः प्रहिप्रान्ते घटीयन्त्रस्य पार्श्वतः।
गृहीत्वा बलवद्रज्जुमात्मानं स न्यपातयत्।।58।।
क्षणादेव युवा प्रापत्कूपिकाभित्तिकोटरम्।
निगूह्य तत्र चात्मानमवतस्थे सुरक्षितः।।59।।
क्षणं प्रतीक्षमाणा सा शरणागतसुस्थितिम्।
प्रतीता च प्रहेर्वेगादुच्चकर्ष वराटकम्।।60।।
सपद्येव ततो वृद्धा शय्यामेत्य स्थिता क्षणम्।

सावधाना च निःशब्दा दत्तकर्णा बहिर्ध्वनौ।।61।।
कञ्चित्कालं प्रशान्तोऽभूच्छ्रूयमाणः पुरा ध्वनिः।
सर्वं निःशब्दगम्भीरमभवच्च समन्ततः।।62।।
मार्गान्तरेण किं यातास्ते तस्यानुप्रधावकाः।
इति ध्यायति यावत्सा पुनरश्रूयत ध्वनिः।।63।।
पदघट्टनशब्दश्च ततोऽश्रावि गृहाद्बहिः।
ग्रामाधिपश्च तामुच्चैर्नामतः समबोधयत्।।64।।
विश्यतामिति सा द्वारं यावत्तूर्णमपावृणोत्।
ग्रामेशस्तावदायातः पञ्चभिः सह रक्षिभिः।।65।।
मृग्यते किं नु युष्माभिरितिपृष्टस्तयाब्रवीत्।
ग्रामणीः किं भवत्यैको पुमान् दृष्टः सशृङ्खलः।।66।।
विस्मयं दर्शयन्तीं तां परिपश्यन्नुवाच सः।
निःशङ्कमिह कुत्रापि तिष्ठत्येव स गूहितः।।67।।
नन्वस्ति किमिह स्थानं गृहेऽस्मिन् गूहितुं नरम्।
इत्यपृच्छत्कठोरं सा ततश्चावेगतोऽब्रवीत्।।68।।
न विश्वसन्ति भद्राश्चेत्सर्वतो मार्गयन्त्विति।
क्षमामर्थयमानस्तां ग्रामणीरथ सोऽब्रवीत्।।69।।
अविश्वास्या न भद्रे त्वं परतन्त्रास्तु ते वयम्।
करिष्यामः स्वकर्तव्यं प्रभोराज्ञानुसारतः।।70।।
इत्युक्त्वाभिजगामासौ भित्तिकोटरसम्पुटम्।
मुष्ट्या च तमपाकृष्य तद्द्वारामुदघाटयत्।।71।।
क्षणाच्च ददृशे तत्र क्षेत्रारामार्थसञ्चयः।
गृहवस्तुचयश्चान्तः पेयभोज्याम्बरादिकः।।72।।
तावच्च पुरुषाः पञ्च प्रचलन्त इतस्ततः।
अन्तरन्वेषयामासुः प्रतिकोणं प्रयत्नतः।।73।।
अथास्यै दर्शयन्नेकामङ्गुल्या रीतिपेटिकाम्।
पप्रच्छ ग्रामणीरस्यां ब्रूहि किं तिष्ठतीति नः।।74।।
मदीया पेटिका सेयं भद्र वंशक्रमागता।
वस्तूनि मम पुत्रस्य विद्यन्ते हि तन्दतरे ।।75।।
इत्यवादीदनिच्छन्ती पेटिकोद्घाटनं स्वयम्।
आकुमारवधात्सा हि स्थापिता तालबन्धिता।।76।।
अन्तःस्थितानि वस्तूनि पवित्राणि विभाव्य सा ।

पेटिकायाः पिधानं तन्न कदाप्युदघाटयत्।।77।।
यदि नोद्घाटयते पेटी तदा जायेत संशयः।
इत्यथो विमृशन्ती तामनुक्ताप्युदघाटयत्।।78।।
तस्यामपावृतायां च क्षणादुद्विग्नमानसा।
पुत्रशोकाकुला भूत्वाऽकम्पतापादमस्तकम्।।79।।
निरुध्य हृदयावेगमुद्धरन्ती पदे पदे।
वस्तूनि प्रियपुत्रस्य न्यश्वसीत्सा सद्गम्।।80।।
अलं भद्रे प्रयासेन प्रतीतोऽस्मि त्वयि ध्रुवम्।
इति ग्रामाधिपोऽवादीद्दुःखितां परिसान्त्वयन्।।81।।
रक्षिभिः कृतसाहाय्या पञ्चभिः करुणालुभिः।
तूष्णीमेव पुनः सर्वं पेटके सा न्यवेशयत्।।82।।
कारायाः कथमात्मानं वराकोऽयममोचयत्।
इति मुख्यमपृच्छत्सा बद्ध्वा तालेन पेटिकाम्।।83।।
द्विवारं प्रतिसप्ताहं वासरन्ध्राद्बहिर्युवा।
नियुज्यते स्म कार्यार्थं रक्षिकोष्ठस्य संनिधौ।।84।।
युवकेनाधिकारोऽयं प्राप्तः सौशील्यकारणात्।
इदानीं तु पुनर्बद्धो न भूयस्तमवाप्स्यति।।85।।
उपलभ्य परिश्रान्तं प्रसुप्तं द्वारपालकम्।
गृहीतावसरो बन्दी कारायाः स पलायितः।।86।।
सर्वथा तं ग्रहीष्याम इति वादिनि नायके।
बन्दिनं सान्वकम्पिष्टवचनैः करुणामयैः।।87।।
न तस्य दयसे भद्रे तत्कर्म यदि वेत्स्यसि।
स ते पुत्रस्य हन्तेति ग्रामणीस्तामवेदयत्।।88।।
निशम्य वचनं वृद्धा तदेतत्पतनोन्मुखी।
क्षणादशनिविद्धेव तस्थावालम्ब्य पेटिकाम्।।89।।
परमोद्वेगसोत्कम्पा शून्यविष्फारितेक्षणा ।
भीषणभ्रुकुटीबन्धा कम्पमानकराङ्घ्रिका।।90।।
चिरात्प्रतीक्षितं कालं सहसा समुपस्थितम्।
मनसाऽऽकलयन्ती च प्रतीकारविनिश्चिता।।91।।
यदि साङ्गुलिनिर्देशं सूचयेयं तदङ्गणम्।
तदाहं कृतकृत्या स्यामिति मेने क्षणं हि सा।।92।।
क्षणान्तरे तु सा दध्यौ न हीदं यन्मयेप्सितम्।

आश्रितस्य समुद्भेदादिष्टार्थो न भवेदिति।।93।।
अथ कालोचितं वाक्यं गिरिजा प्राह रक्षिणः।
आगतो यदि जाल्मः स्यादर्पयेयं हि तं ध्रुवम्।।94।।
ग्रामण्यो गिरिजावाक्ये शङ्का नासीन्मनागपि।
प्रतीकारप्रतिज्ञा हि तदीया सर्वतः श्रुता।।95।।
अभिगच्छन्नथद्वारमुवाच पुरुषान्निजान्।
समाप्तमिह नः कार्यं गमिष्यामोऽथ सत्वरम्।।96।।
नो चेदन्वेषणं रात्रौ भविष्यति सुदुष्करम्।
इत्युक्त्वा च नमस्कृत्य वृद्धां स निरगात्ततः।।97।।
रक्षिणोऽन्येऽनुजग्मुस्तं भिन्दन्तः कर्कशस्वनैः।
पादघट्टनशब्दैश्च प्रदोषस्य प्रशान्तताम्।।98।।
क्षणमेकं स्थिता वृद्धा निःशब्दा निश्चलापि च ।
रोषेण द्विगुणस्पष्टाः कुर्वती मुखरेखिकाः।।99।।
रक्षिणां तुमुलारावो मन्दमन्दोऽभवच्छनैः।
भेरीनाद इवात्याराद् यावद्विलयमागतः।।100।।
ध्वनिं निरवधानैव शृण्वती सा विदूरतः।
आत्मानं पर्यवस्थाप्य जगाम प्राङ्गणं पुनः।।101।।
कूपिकामुपसर्पन्ती मुष्टिमाबध्य निश्चयात्।
सञ्जातहृदयोत्कम्पा शुष्ककण्ठी विषादतः।।102।।
आवेगनिग्रहायासाज्जातसर्वाङ्गवेपथुः।
आर्ता कासप्रकोपेन दुर्निवारेण साऽभवत्।।103।।
श्रुत्वाथ कासमानां तां युवा पप्रच्छ कूपतः।
अपि त्वमागता मातस्तथेत्युक्तं तयापि च ।।104।।
अपि याता नरा मातरित्यपृच्छद्युवा पुनः।
तथेत्युक्तेऽब्रवीद्धर्षाद्दयाब्धे भद्रमस्तु ते।।105।।
कूपान्तरस्थं ततः साऽऽहमास्तौषीर्हतपुत्रकाम्।
मम पुत्रस्य यो हन्ता स नूनं दण्डमर्हति।।106।।
श्रुत्वा तद्वचनं बन्दी वज्राहत इवाभवत्।
अस्या एव हतः पुत्रो मयेति सहसा स्मरन्।।107।।
स्तब्धोऽभूज्जलगण्डेन मरणं भावि चिन्तयन्।
अर्धोच्चारितशब्दाश्च तत्कण्ठं समपीडयन्।।108।।
यावदन्तं यतिष्येहमात्मानमभिरक्षितुम्।

इति निश्चित्य तूष्णीको मुहूर्तमभवद्युवा।।109।।
अन्तः क्षेप्स्यामि ते रज्जुमिति किं न प्रतिश्रुतम्।
इत्यपृच्छद्युवा वृद्धां वचनैः स्खलिताक्षरैः।।110।।
निरुत्तरा यदा सास्थात्तदा भूयो युवाब्रवीत्।
ननु भद्रे परोधर्मः कृतवाग्दानरक्षणम्।।111।।
प्रणोदितस्ततस्तस्या मौनवृत्त्या जगाद सः।
अनाथायाश्रयं दत्वा रक्षित्वा रक्षिणां गणात्।।112।।
परोपकारशीला त्वं कथमद्य जहासि माम्।
कल्याणि मा कुरुष्वैवमिति दैन्यादयाचत।।113।।
त्वमेव पुत्रहन्तेति नाविदं मन्दभागिनी।
अतस्ते संश्रयो दत्तः पापस्येति जगाद सा ।।114।।
मया नूनं हतः पुत्रो न तु बुद्धिकृतो वधः।
शपे मम जनन्या ते वास्तवीं मे कथां शृणु।।115।।
अथैकदावयोर्मध्ये क्षेत्रे कार्यप्रसक्तयोः।
चापलादुत्थितं द्वन्द्वमतिभूमिं च तद्गतम्।।116।।
प्राणसंशयमारुह्य तदानीं द्वावपि स्थितौ।
दैवयोगान्न तु द्वेषादात्मजस्ते हतो बत ।।117।।
तस्थौ सा भ्रुकुटिं बध्द्वा सङ्कोचितविलोचना।
शोचनीयां कथां श्रुत्वा वराकस्यास्य दोषिणः।।118।।
ध्यायन्त्याः प्रियपुत्रस्य मरणं तत्तथाविधम्।
पर्यभ्रमन्मनस्तस्या भूतवृत्तान्तगाहकम् ।।119।।
तस्थौ दृष्टिपथे तस्या अविस्मर्यः स वासरः।
आनीतः प्रियपुत्रस्य शवो यस्मिन् वयस्यकैः।।120।।
स्वयमेवाश्रयो दत्तः पुत्रहन्त्रे मयाऽज्ञया।
बद्धा चास्मि स्ववाचाहं किं नु कुर्यां बताधुना ।।121।।
इति चिन्तयमाना सा विकल्पशतविह्वला।
आपादमस्तकं वृद्धा क्षणद्वयमकम्पत।।122।।
स वराको मुहूर्तान्ते प्रार्थयामास तां पुनः।
क्षिप्यतां सत्वरं रज्जुरत्रास्मि स्थातुमक्षमः।।123।।
इत्येवं कथयन्नेव दन्तान् कटकटापयन्।
कम्पमानश्च शैत्येन बद्धवाग्विरराम सः।।124।।
स्मृतीनामयुतैस्तस्या मनोऽभूद्यावदाकुलम्।।

कूपस्याभ्यन्तरात्तावत्पुनरश्रूयत ध्वनिः ।।125।।
माता मे नितरां वृद्धा दीना पङ्गूश्च निर्धना।
अहो हर्षः कियानस्या द्रष्टुं मां पुनरागतम्।।126।।
वेत्सि पुत्रवती भूत्वा पुत्रशोकस्य वेदनाम्।
तदार्तायां मदम्बायां दयां कुरु दयानिधे।।127।।
वचने श्रुतमात्रेऽस्मिन् तन्मुखं वलिभीषणम्।
सौम्यतां प्राप चिरादननुपलक्षिताम्।।128।।
मातृनैसर्गिकप्रेमसम्पूर्णहृदया क्षणम्।
व्यस्मरद्भूतवृत्तान्तं प्रतिज्ञामपि चात्मनः।।129।।
चिन्तयामास तन्मातुर्वृद्धाया दुरवस्थितिम्।
पुत्रदर्शनहर्षं च सहसा भाविंन चिरात्।।130।।
चोदितेवाथ दैवेन घटीयन्त्रे करं न्यधात्।
संभ्रमेण च सा गुर्वी कूपे रज्जुमपातयत्।।131।।
जलास्फालध्वनिर्मन्दः शुश्रुवे च क्षणाद्बहिः।
शृङ्खलायाश्चकूपान्ते झणत्कारः प्रतिध्वनन्।।132।।
अचिरान्निर्गतो बन्दी तत्पादपतितोऽभवत्।
न चायं न च सा वृद्धा मुहूर्तं समभाषत।।133।।
निशागमात्पुरा याहीत्यादिष्टो वृद्धया युवा।
मौनी तच्चरणौ स्पृष्ट्वा नत्वा च प्रस्थितः कृती।।134।।
तस्थौ विलोकयन्ती तमादृष्टिपथवर्तिनम्।
अथ दीर्घं विनिश्वस्य कुटीरमगच्छनैः।।135।।
तावच्चास्तमिते सूर्ये छाया तदनुगामिनी।
स्थिता प्राङ्गणकोणेषु विकृताकारधारिणी।।136।।
विशन्ती शयनागारं विषण्णा गिरिजा भृशम्।
सर्वाङ्गेष्वपि निःसत्त्वा शोचनीयदशां गता।।137।।
सहसा स्वप्रतिज्ञायाः स्मृतिराविश्य तन्मनः।
अनिर्वाच्यसमावेगां जनयामास वेदनाम्।।138।।
क्षणात्सिद्धिमुपैष्यन्त्यां प्रतिज्ञायामहो मया।
मूढया यापितः संधिश्चिराय प्रतिपालितः।।139।।
इति चिन्तयमानायाः समुल्लासः क्षयं गतः।
यथा तस्मिन् क्षणे संध्याप्रकाशस्तिमिरागमात्।।140।।
शयनीयमुपासर्पच्छनैः सा शोकविह्वलाः।

नष्टकान्तिर्निरुत्साहा वृद्धीभूता विशेषतः ।।141।।
शिथिलीभुतसर्वाङ्गी जीवितव्यनिरादरा।
निस्तेजाः स्नेहशून्या च निर्वाणप्रायदीपवत्।।142।।
मस्तकं ताडयन्ती सा कुर्वाणार्तरवं मुहुः।
विवशा चावसीदन्ती शयने स्वमपातयत्।।143।।

पुष्पिका.—"क्लिष्टस्यापि सुजातस्य सौजन्यं नापयास्यति।"
इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां कथापञ्चके गिरिजायाः प्रतिज्ञा नाम कथा द्वितीया समाप्ता।

-----------------------------******-----------------------

कथासारांशः

यौवने एव वैधव्यं प्राप्ता गिरिजा नाम वृद्धा पुण्यपुरस्य समीपे लीलनामकपल्ल्यन्ते न्यवसत्। पुत्रवधवार्तां श्रुत्वा द्वेषेण तस्य वधकर्तारं समाप्य प्रतिशोधपूर्तिं करोमीति दृढां प्रतिज्ञामकरोत्। द्वेषोऽयं गच्छसु वर्षेष्वपि वृद्धिमायात्। प्रतिदिनं पुत्रस्य बाल्यं कौमारं निधनञ्च स्मरन्ती सा उन्निद्रनेत्राभ्यां रात्रिं नयति स्म।

एकदा कश्चिच्छृङ्खलाबद्धः बन्दी गिरिजायाः कुटीरस्य द्वारं बलादुघाटय अन्तः प्रविष्टःशरणागतं मां गोपय कुत्राचिदिति कारागृहस्य रक्षकेभ्यः भीतः सोऽब्रवीत्। दशवर्षाणि कारायां भयङ्करानसहयाञ्च क्लेशानहमसहमिति तस्य वचनं श्रुत्वा गिरिजा दयाविष्टाभवत्। कुटिरे तु तं गोपयितुं स्थानं नासीत्। अतः गृहस्य पश्चिमाङगणे स्थितस्य कूपे रज्वाधारेण तं बन्दिनमवतार्य भित्तिगते क्रोडे सा निगूहीतवती। रक्षकाणां गमनादनन्तरं पुनारज्जुं प्रक्षिप्य बहिरागच्छेति तयोक्तम्।

कारायाः रक्षिणः ग्रामप्रमुखेण सह तत्रागत्य बन्दिनं अन्विष्य बन्दिनमनुपलभ्यच गमनसमये,'स ते पुत्रस्य हन्तेति' वदन्ति। तच्छ्रुत्वा गिरिजा वज्राघातेन विद्धेव तत्रैव तिष्ठति। तेषां गमनादुर्ध्वं सा जानामि त्वां मम पुत्रस्य हन्तारमिति तमवदत्। न द्वेषादपितु दैवयोगाद्धतस्तव पुत्रः इति सशपथमुक्वा सः स्वमातुरवस्थां कथयति। सा वृद्धा दीना पङ्गूश्च माता मां दृष्ट्वानन्दिता भवेत्। तस्यैतत्त्वचनं श्रुत्वा सा मातृहृदया स्वपुत्रवधवृत्तं घोराञ्च प्रतिज्ञां व्यस्मरत्। कूपे रज्जूं पातयित्वा तं बहिरानयत् सा। अत क्षमादेवी कथान्ते सुभाषितेन तात्पर्यं कथयति—'क्लिष्टस्यापि सुजातस्य सौजन्यं नापयास्यति।

हरिसिंहः

अस्ति सौराष्ट्रदेशान्तः कमलापुरपार्श्वतः।
कश्चिद्ग्रामोऽनतिख्यातः शैलपादे प्रतिष्ठितः।।1।।
बभूवुर्वीथयस्तस्मिन् वक्रपांसुलसङ्कटाः।
मृद्गृहाणि च जीर्णानि परितो भूमिरुषरा।।2।।
निवासिनः क्षुधाक्षामा वसन्तः कच्चरावनौ।
दृश्यन्ते स्म निरानन्दा नित्यं च भयशङ्किनः ।।3।।
स्थितास्ते विगतोत्साहाः सर्वे पौरुष्यवर्जिताः।
दुःशासकयुगे बद्धास्तद्भारान्नतकन्धराः।।4।।
अस्या ग्रामटिकायास्तु नातिदूरे कृतास्पदः।
उवास मानसिंहाख्यो नृपतिः क्रूरशासनः।।5।।
अस्याग्रे निखिलो लोकश्चकम्पे नतजानुकः।
सिंहावलोकनात्त्रस्यन् मृगयूथो यथावने।।6।।
तस्योन्मत्तविलासेषु सर्वदा दत्तदृष्टयः।
आसन् सत्पुरुषाः केचिद्दीनलोकानुकम्पिनः।।7।।
तेषामेकतरस्त्वासीद्युवा कश्चिद्दयापरः।
उन्नतो हरिसिंहाख्यो मनस्वी प्रतिभान्वितः।।8।।
एकदा शैशिरे काले बभूव किल सङ्कुलः।
ग्रामस्यास्य महावीथिर्नरनारीजनार्भकैः।।9।।
उत्सवार्थं गमिष्यन्तं द्रष्टुकामैर्नराधिपम्।
इतरैश्चात्मदुःखानि निवेदयितुमुत्सुकैः।।10।।
क्षुधार्ता वलिना वृद्धास्त्वरन्ते स्म समुत्सुकाः।
अर्धनग्नाः परेऽतिष्ठन् गृहकुड्यावलम्बिनः।।11।।
बालका रोगिणः केचिदुपवीथ्यामशेरत।
शालिधान्यकणान् काश्चिदुञ्छन्ति स्म च बालिकाः।।12।।
वराको बालकः कश्चित्कुब्जाङ्गश्च बृहच्छिराः।
आसीनो गृहदेहल्यां क्रन्दति स्म क्षुधार्दितः।।13।।
कृपालुर्हरिसिंहोऽपि समेत्य मिलितैर्जनैः।
रुदन्तमर्भकं धृत्वा तदश्रूणि प्रमार्जयन्।।14।।
समीपस्थापणात्क्रीतं दत्वा तस्मै च मोदकम्।
प्रहृष्टजननीहस्ते भूयोऽप्येनं समार्पयत्।।15।।
अथ कंचिदुपागम्य मार्गस्थं पिप्पलद्रुमम्।

हनुमन्मन्दिरासन्नं तन्मूले जोषमास्त सः ।।16।।
ग्राम्याणां दीनमालापं राजानुग्रहकाङ्क्षिणाम्।
श्रावं श्रावं युवा तेषामभूत्कारुण्यसंप्लुतः ।।17।।
दिनस्य सकृदाहारमपेक्षेऽहं न चाधिकम्।
इत्येको वलिमान् वृद्धो रुरोद करुणस्वरम्।।18।।
यवागूग्रासतृप्तास्मि वस्त्रखण्डं तु नास्ति मे।
इत्याह स्थविरा काचिच्छीतसंजातवेपथुः।।19।।
अपि नाम क्षुधार्ताय शिशवे दुग्धमाप्नुयाम्।
विनष्टषडपत्यास्मि स्तन्याभावादहो विधे।।20।।
शुष्कस्तनी कथं सख्यः पोषयेयं स्तनंधयम्।
इति व्यलपदेका स्त्री ताडयन्ती निजोरसि।।21।।
नृपो ददात्वनाथाय वस्तुं मे क्वचिदास्पदम्।
इत्यरोदीन्महाकुष्ठी कश्चिद्घोरविरूपितः।।22।।
उपेत्य हरिसिंहस्तमभाषत दयाकुलः।
आगच्छ मे गृहं भद्र माता दास्यति संश्रयम्।।23।।
एवमाश्वास्यमानोऽपि रोगी न प्रत्ययं गतः।
मस्तकं कम्पयित्वा च प्रवृत्तो रोदितुं पुनः।।24।।
सहसा रथनिर्घोषो यावत्कर्णपथं गतः।
व्यरंसीत्क्रन्दनं तावद्दीनानां ग्रामवासिनाम्।।25।।
अथ राज्ञो रथे तस्मिन्नागते डम्बरान्विते।
जनौघस्तमुपाधावत्कोलाहलविजृम्भितः।।26।।
संमुखस्थनिजामात्यो नृपती रथमास्थितः।
तं चानुजग्मतुर्योधौ हयारुढौ सुसज्जितौ।।27।।
नृपतेर्मानसिंहस्य शरीरं स्थूलमांसलम्।
सुपीवरौ कपोलौ च भोगोत्सेकमदर्शयन्।।28।।
नेत्रे च बहिराध्माते लोहिते दर्पदर्शिनी।
कृष्णश्चौष्ठपुटः स्थुलः सूचयन्ति स्म दुष्टताम्।।29।।
देहि नोऽन्नं क्षुधार्ताः स्मो वस्त्राणि च महीपते।
असह्यःशीतवातोऽयमित्ययाचन्त ते जनाः।।30।।
निष्ठुरः स नृपो नीचः संभ्रमेण विलोकयन्।
निराश्रयवराकांस्तान्न बभाषे मनागपि।।31।।
तत्कालं कर्णनिर्भेदी शुश्रुवे क्रन्दनध्वनिः।

मन्दायितगती राज्ञः स्यन्दनश्च हठात्स्थितः।।32।।
आलोक्य बालकं कञ्चिद्रथस्याधः प्रपीडितम्।
हरिसिंहोऽभिदुद्राव सहसा रक्षणेच्छया।।33।।
अवसृत्य रथस्याधः समुद्धृत्य च बालकम्।
जनन्या निकटं तस्य त्रस्तायास्तूर्णमागमत्।।34।।
अथावतस्थिरे तूष्णीं ग्रामीणा दुःखपीडिताः।
राजानुग्रहमीप्सन्तः परमोत्कण्ठया क्षणम्।।35।।
सान्द्रीभूय जनौघोऽथ प्रार्थनामुखरोऽभवत्।
कठोरं तु मनो राज्ञो निर्विकारमवस्थितम्।।36।।
अपसार्य जनं क्षुब्धं सत्वरं हस्तसंज्ञया।
आदिशत्परुषं राजा वाहयति स्वसाराथिम्।।37।।
कशाघातः सशूत्कारः शुश्रुवे सहसा ततः।
धौरितेन ययुश्चाश्वा भीरुहृद्भेदकारिणः।।३८।।
व्यघटन्त जनाः शीघ्रं विलपन्तो निराशया।
शपन्तो निजदुर्दैवं दुरात्मानं च शासकम्।।39।।
हा धिक् कीदृशमन्याय्यं क्रियते पापिनामुना।
इति शोचन्नपश्यत्तान् हरिसिंहः स्खलद्गतीन्।।40।।
शीतेन कम्पमानाङ्गीमेकामालोक्य योषितम्।
अपनीय शिरोवस्त्रं ददौ तस्यै स सादरम्।।41।।
श्रेयस्तनोतु देवस्ते चिरं जीव दयानिधे।
इत्याह सा परं हृष्टा वपुराच्छाद्य वाससा।।42।।
ध्यायं ध्यायं क्षुधार्तानां ग्राम्याणां क्लेशसञ्चयम्।
रुजार्तानां च मार्गान्ते कञ्चित्कालं स्थितो युवा।।43।।
प्रचक्राम ततः खिन्नमानसः करुणाकुलः।
मानसिंहं प्रति क्रुद्धो दीनलोकनिपीडकम्।।44।।
अथ चास्तं गते सूर्ये प्राप पर्वतगह्वरम्।
यत्र प्रतीक्षिणस्तस्थुरुत्सुकाः सुहृदस्त्रयः।।45।।
प्रदोषस्यान्धकारेऽथ घनीभवति सर्वतः।
सूर्यांशुरतिसूक्ष्मोऽपि वारितोऽभूद्गुहान्तरात्।।46।।
तमोमयस्य कोणस्य भित्तिरन्ध्रस्य चान्तरे।
अन्विष्यन्निर्गमद्वारमेको बभ्राम बम्भरः।।47।।

अन्यतश्चञ्चलो दीपो मन्दकान्तिरजीजनत्।
छायारूपाणि चित्राणि खर्वभित्तिषु सर्वतः।।48।।
सुरङ्गस्य मुखे चापि विशेषाद्भुतरूपिणः।
आयतस्य च पल्ल्यन्तमनन्यविदितस्य च ।।49।।
फलकं वर्तुलाकारमेकमासीद्गुहान्तरे।
यत्संनिधावुपाविक्षद्धरिसिंहः सुहृद्वृतः।।50।।

चत्वारोऽपि महोत्साहाः कर्तव्येषु समुत्सुकाः।
आसन् प्रसभकर्तारो नृपच्छलविरोधनः।।51।।
हरिसिंहेन सार्धं ते जज्ञुः कालपरिस्थितिम्।
अधर्म्यां शोचनीयां च तादृशायाश्च कारणम्।।52।।
राजवंश्यप्रतिष्ठा तैर्मनागपि न मानिता।
गतानुगतिकत्वं च गुरूणां न समादृतम्।।53।।
प्रत्यहं संमिलन्ते स्म कन्दरेऽस्मिंस्तमोमये।
पठितुं पुस्तकान्येते प्रतिषिद्धानि पूर्वजैः।।54।।
समाप्ते पठने चक्रुर्जिज्ञासां च परस्परम्।
यावदर्थः समग्रोऽपि गृहीतोऽभूदसंशयम्।।55।।
राजदर्शनसंरंभादुपावृत्तमशीर्षकम्।
विलोक्य हिरसिंहं ते बभूवुरतिविस्मिताः।।56।।
तेष्वेको रूपसिंहाख्यः पटीयान् कुलपुत्रकः।
सभ्रान्त इव पप्रच्छ निरुष्णीषोऽसि किं सखे।।57।।
कस्यैचिदबलायै तच्छीर्षवस्त्रं सखे निजम्।
शीतेन कम्पमानायै पल्लिकायामदामहम्।।58।।
इत्युक्त्वा वर्णयामास लोकवृत्तमशेषतः।
दृष्टश्रुतानुभूतानि चेष्टितानि च भूपतेः।।59।।
हा धिक् पशुरसौ क्रूरो ध्वंसतां निजपातकाम्।
निश्चितं तद्यथा रात्रौ करिष्यामस्तथाऽचिरात्।।60।।
इत्युक्ते पुनरप्राक्षीत्तृतीयः संशयी सखा।
कुरूपी कुब्जपीनाङ्गः किमेषा सत्यवागिति।।61।।
ननु निश्चितपूर्वं तदस्माकमिह मेलनम्
कृत्यमद्यैव तत्कार्यमन्यदा तन्न सेत्स्यति।।62।।
इत्यूर्जितानुभावाढ्यं हरिसिंहोऽब्रवीद्वचः।
वारयन् पुनरालापं सुहृदां संशयात्मकम्।।63।।

तदमोघप्रहाराय वर्तते किमु साधनम्।
पर्याप्तमिति पप्रच्छ रूपसिंहः ससम्भ्रमम्।।64।।
न जाने गुलिकाक्षेपमात्मरक्षार्थमप्यहम्।
इत्यभाषत कुब्जाङ्गो दृढाङ्गोऽप्यविशारदः।।65।।
तत्कर्तुमधिकारो मे कुशलोऽस्मि प्रयोगतः।
इत्युच्चैरूपसिंहोऽथ प्रसभं प्रत्यभाषत।।66।।
इति वादिनमाचष्ट हरिसिंहस्सगौरवम्।
वरं रात्रिरुपायातु करिष्यामोऽथ निर्णयम्।।67।।
सम्यगादौ तु युष्माभिर्विमर्शः क्रियतां स्वतः।
मद्वाक्यमेव नात्यन्तं प्रमाणत्वेन गृह्यताम्।।68।।

प्रेरितो हि निसर्गेण कार्येऽहं निश्चयं गतः।
इति धीरः स्वमित्राणि हरिसिंह उपदिशत्।।69।।
मैवं भाषस्व हे साधो अमोघस्ते हि निर्णयः।
आर्जवं तव जानीम इत्यवोचन् वयस्यकाः।।70।।
किमयं निर्णयस्तर्हि त्रयाणामपि संमतः।
इति पप्रच्छ मित्राणि हरिसिंहः प्रमाणतः।।71।।
तथेति प्रतिपन्नेषु हरिसिंहोऽब्रवीत्पुनः।
जाने हिंसान्वितं कर्म निषिद्धं धर्मशास्त्रतः।।72।।
नूनमेतन्मम द्वेष्यं कालस्तु तदपक्षेते।
इत्युक्ते हरिसिंहेन रूपः प्रत्याह तं सखा।।73।।
वधोऽयं मानसिंहस्य नृशंसस्य ध्रुवं भवेत्।
अनाथदीनसाहस्रप्रजानां परमं हितम्।।74।।
यत्तु कर्म शुभोदर्कं कार्यं तन्निर्विकल्पतः।
इत्युवाच युवा तेषां कनिष्ठो यः कृशाङ्गकः।।75।।
मृते तस्मिन् सुदैवेन न काप्यनुभविष्यति।
वैधव्यस्य महाशोकमनूढस्येति चापरः।।76।।
न चास्य विद्यतेऽपत्यमनुकर्तुं नृशंसताम्
धिग्जाल्ममिति रोषेण रूपसिंहोऽब्रवीद्वचः।।77।।
अथ किं नाम संवृत्तं धनिकस्याप्रदायिनः।
राज्ञा मार्गितवित्तस्येत्यपृच्छाद्दारकोऽसलः।।78।।
सर्वस्वापहृतिस्तस्य यावज्जीवं च बन्धनम्।
इत्युक्ते रूपकः प्राह धिक् तं नीचमिति क्रुधा।।79।।

जनको रूपसिंहस्य राजवैद्यः पुरा किल।
शिरोर्ति मानसिंहस्य न शशाक व्यपोहितुम्।।80।।
अतिक्रुद्धस्य राज्ञोऽथ दण्डितोऽभूद्दुराज्ञया।
शरीराच्चर्म निष्कृष्य मन्दभाग्यो भिषग्वरः।।81।।
स्मरणात्स्वपितुर्मृत्यो रूपसिंहस्य मानसम्।
क्वथ्यते स्म दिवारात्रं प्रज्वलत्क्रोधवह्निना।।82।।
अथ तुष्णीमतिष्ठंस्ते क्षणमात्रं कुमारकाः।
भ्रमरं यावदुत्थाय हरिसिंहो व्यमोचयत्।।83।।
भित्तिरन्ध्रमथोपेत्य परिमाणं निरूप्य सः।
आग्नेयास्त्राय पर्याप्तमिदं हन्तेत्यवोचत।।84।।
ततः पीठमुपागत्य हरिसिंहोऽब्रवीत्पुनः।
मध्यरात्रे पथानेन मानसिंहः प्रयास्यति।।85।।
आगन्तव्यमतोऽस्माभिरिह गुप्तं सुसज्जितैः।
नृपस्यागमनात्पूर्व घटिकाद्वयमन्तरा।।86।।
अप्यैकमत्यमापन्ना इति पृष्टा वयस्यकाः।
तथेति समकण्ठेन प्रावोचन्नविकल्पतः।।87।।
गृहीता यदि दुर्दैवात्कार्यान्ते नृपरक्षिभिः।
किमारोढुं वधस्तम्भं सज्जाः स्थेत्यभिधीयताम्।।88।।
इत्युक्ते हरिसिंहेन दोलायितहृदः सखीन्।
तूष्णीमवस्थितान्दृष्ट्वा कर्तव्यं स्पष्टमाह सः।।89।।
ननु कृत्यं समाप्यैव सुरंगस्य पथा बहिः।
गन्तव्यं दूरमस्माभिः प्रागुदन्तप्रसारतः।।90।।
तच्छ्रुत्वा निर्विवादेन न्यवृतन् स्वगृहाणि ते।
प्रवासोचितवस्त्रादिवस्तूनामानिनीषया।।91।।
न्यवसत्पल्लिकोपान्ते हरिसिंहः सहाम्बया।
चिराय पितृहीनः सन्नात्मनः क्षेत्रसंनिधौ।।92।।
अन्नवस्त्रदिसंपत्त्या यद्यप्यास्तां सुखोषितौ।
तथापि न तयोरासीत् कथालापो निरर्गलः।।93।।
न कथापि पुरस्तस्य बभाषे सा मनागपि।
अधिकृत्य स्वभर्तारं मृतं प्राक् पुत्रजन्मतः।।94।।
लभसे त्वं कुतो मातर्जीवनाय धनादिकम्।
इति सोऽपि कदाप्येनां न चापृच्छत्कुमारकः।।95।।

प्रष्टुकामोऽपि वृत्तान्तं जनकस्यात्मनो युवा।
मौनमेवाश्रयद्धीमान् जननीक्लेशशङ्कया ।।96।।
तदीयजननी ह्यासीद्राजवंश्यकुलोद्भवा्
निजवंशाङ्कुरीभूता दैवेनैकावशेषिता।।97।।
किमाश्चर्यमतः सा चेत्प्रशंसेत नृपान्वयम्।
निन्द्यमप्यथ वा दोषं ममतान्धो न पश्यति।।98।।
प्रशंसां तत्कृतां श्रुत्वा विस्मितोऽपि कुमारकः।
नृपस्य च्छलमुद्दिश्य नैव किञ्चिदभाषत।।99।।
सुतस्य वर्धमानस्य पश्यन्ती मितभाषिताम्।
अतिपाठनिमित्तां तां मन्यतेऽस्म तदम्बिका ।।100।।
अधिते साधु मे पुत्रस्तच्च श्रेयो विधास्यति।
तस्य प्राप्ताधिकारस्येत्युवाच प्रतिवेशिनः।।101।।
कीदृक् पदं स लब्धेति जिज्ञासुरपि तज्जनः।
न तामायासयामास प्रश्नैर्वृद्धां मनागपि।।102।।
हरिसिंहो गृहं प्राप्य दृष्ट्वा चैनां बहिर्गताम्।
प्रहारगुलिकान्वेषी परमाश्वासमाप्तवान्।।103।।
ग्रामण्ये गुलिकाः काश्चित्पुरा दत्ता मदम्बया।
इति स्मरन् गवेषाय सोपानं चारुरोह सः।।104।।
दृष्ट्वाकोष्ठे निजाम्बाया महतीं रीतिपेटिकाम्।
अत्र हि स्याद्यदन्वेष्यामीति तत्सविधं ययौ।।105।।
आदाय कुञ्चिकामस्या लोहकीलावलम्बिनीम्।
हरिसिंहो विना क्लेशं पिधानमुदघाटयत्।।106।।
एकैकशोऽपनीतेषु सम्भारेषु दर्दर्श सः।
क्वचित्करण्डके न्यस्तं त्रापुषे गुलिकाचयम्।।107।।
ततः काश्चिदुपादाय द्रुतं कोशे निगूह्य च।
वस्तुशेषं पुनः पेटयां निधातुमुपचक्रमे।।108।।
अस्पृशत्स युवा यावद्वसनग्रन्थिमेकतः।
तावच्चन्दनमञ्जूषा तस्याभूद्दृष्टिगोचरः।।109।।
सम्पुटे विवृते तस्मिन्नदृश्यत तदन्तरे।
जीर्णा प्रतिकृतिः काचिद्भूरिविस्मयकारिणी।।110।।
अहो चित्रमिदं नुनमाकृत्या सदृशं मम।
आजन्मतस्तु नो चित्रे न्यस्तोऽस्मि तदिदं कुतः।।111।।

इति ध्यायन् युवा यावब्ददृष्टिर्निरीक्षिते।
तावदस्याः परे भागे नृपतेर्नाम दृष्टवान्।।112।।
उद्भ्रान्तेन यदा तूर्णं मञ्जूषाऽधोमुखीकृता।
तदा करतले तस्य न्यपतल्लेखसञ्चसः।।113।।
लेखास्ते लिखिता ह्यासन्मानसिंहेन यौवने।
जनन्यै हरिसिंहस्य ततः प्राग् बहुवर्षतः।।114।।
पठन्नेकं विवर्णोऽभूत्प्रेमपत्रं कुमारकः।
महाशीतज्वरेणेव जातकम्पो बभूव च।।115।।
लेखे समर्पितालोको मुहुर्तमिव निश्चलः।
इतिकर्तव्यतामूढः शून्यदृष्टिरवस्थितः।।116।।
विवशोऽभूत्तथा मोहाद्यथा मातुरुपस्थितिः।
न तेन लक्षिता यावत्संमुखे सा स्थिताभवत्।।117।।
किं नु मार्गसि कोष्ठेऽस्मिन्निति पृष्टः स निष्ठुरम्।
चित्रमेतत्कथं प्राप्तमित्यपृच्छत्सगद्गम्।।118।।
पठितं हि त्वया पत्रं वेत्स्येव निखिलं स्वतः।
इति प्रतिब्रुवाणायां सक्तदृष्टिस्तथा स्थितः।।119।।
यथासौ क्रोधताम्राक्षस्तदुद्देशविभावनात्।
परुषं वक्तुकामोऽपि न भाषितुमपारयत्।।120।।
क्षणं निःशब्दगम्भीरमासीत्ससर्वं ततः परम्।
वृद्धा चालक्षयत्सूनोर्मुखे निश्चयमुद्रिकाम्।।121।।
कुतस्त्वं चिन्तयाऽक्रान्त इति पृष्टोऽथ सोऽब्रवीत्।
अम्ब कस्मादियत्कालं पितुर्वृत्तं न मेऽब्रवीः।।122।।
यदी पृच्छसि भर्तारं शृणु वत्स ब्रवीमि ते।
न सम्यग् विदितोऽयं मे विवाहादचिरान्मृतः।।123।।
मृते पितरि जातः किमहं ब्रूहीति वादिनम्।
मनाग् विलम्ब्य सावादीन्ननु जीवति ते पिता।।124।।
अहो धिगिति विभ्रान्तो लज्जयोपहतान्तरः।
जातमन्यु सचुक्रोश निन्दन् दुर्दैवमात्मनः।।125।।
अन्यादृशमिवालोक्य तन्मुखं सा भयाकुला।
स्कन्धे स्वहस्तमाधाय पुत्रमन्वनयत्ततः।।126।।
कथयिष्यामि मद्वृत्तं न मां वत्स तिरस्कुरु।
यथा पाणिग्रहात्पूर्वं कश्चिन्मां चकमे युवा।।127।।

स एव मानासिंहोऽयं च मां देवमन्दिरे।
अपश्यदथ नौ वृत्तो गान्धर्वोद्वाहसंगमः।।128।।
ततो मां वोढुकामोऽपि राजवंश्यकुलोद्भवाम्।
मानसिंहो वयोवृद्धैर्मत्संगात्प्रत्यरूध्यत।।129।।
ततस्त्वज्जन्मतः पूर्वमूढ्वा कश्चित्कृषीवलः।
गर्भिणीं मां निजावासं निनाय परमादरात्।।130।।
तत्र विश्वासिना तेन सुखमासमशङ्किता।
अथ तन्मरणादूर्ध्व जातोऽसि शुभलक्षण।।131।।
हा धिग्वरं मृतो गर्भे न जातः पुनरीदृशः।
इत्यशोचद्युवा भूयो दुःखोपहतचेतनः।।132।।
समाश्वसिहि पुत्र त्वां राजस्वमुपतिष्ठति।
इत्यसौ सान्त्व्यमानोऽपि नोत्तरं प्रत्यपद्यत।।133।।
अथ भोजनवेलायामपि मौनमुपाश्रितः।
मुखे पर्याकुलीभावं नैव कंञ्चिददर्शयत्।।134।।
सुतो मे हन्त संतुष्टः शुभोदर्कविभावनात्।
इत्यमन्यत वृद्धापि स्ववंशोदयगर्धिनी।।135।।
हरिकीर्तनमुद्दिश्य मन्दिरं प्रतिवेशिनः।
यास्यामि किं मया सार्धमेष्यसीति जगाद सा ।।136।।
मुहूर्तमिव तां पश्यन् हरिसिंहोऽब्रवीत्ततः।
व्यापृतोऽस्मि स्वपाठेऽम्ब त्वमेका गन्तुमर्हसि।।137।।
अतिक्रान्तेऽथ यामार्धे युवा निर्गत्य मन्दिरात्।
प्रहारगुलिकोपेतः प्रतस्थे गिरिकन्दरम्।।138।।
प्रागेव मिलितास्तत्र वयस्यास्तं बभाषिरे।
असंनद्धः प्रवासाय चिरेणासि किमागतः।।139।।
किं नु पाथेयतः कार्यमिति यावज्जगाद सः।
बभूवुर्वचने तस्य सखायस्ते ससंशयाः।। 140।।
अथान्यच्चिन्तितं किञ्चिदिति पृष्टः सहायिभिः।
न खल्वलं विकल्प्येति व्याजहार सुनिश्चितम्।। 141।।
अथाध्यानपरा अन्ये यावत्तूष्णीमवस्थिताः।
हरिसिंहो बहिर्लक्ष्यः पश्यति स्म गवाक्षतः।। 142।।
अलङ्कृतापि ताराभिर्निशाऽदृष्यत भीषणा।
मृत्योश्चित्रपटी नीला छादयन्तीव विष्टपम्।। 143।।

अभितः कन्दरं हृष्टास्तरुच्छायापिशाचिकाः।
निशापर्यटनं कर्तुमुद्यता इव रेजिरे।। 144।।
सहसाथ परावृत्य हरिसिंहोऽब्रवीत्सखीन्।
पलायध्वमितः शीघ्रं सुरङ्गस्य पथा बहिः।। 145।।
पलायनस्य को हेतुरपि त्रस्तोऽसि नु स्वयम्।
इति रूपेण पृष्टोऽसौ प्रत्युवाच ससम्भ्रमम्।। 146।।
एवं न खलु वाच्यं तत् सर्वेषां च सुखय नः।
निखिलं साधयिष्येऽहमिति मे प्रत्ययो दृढः।। 147।।
सावेगं रूपकः प्राह नृपरक्तपिपासितः।
मम खल्वधिकारोऽयं तद्वधश्चिरमीप्सितः।। 148।।
वैरबुद्ध्यैव कार्येऽस्मिन्न प्रवर्तितुमर्हसि।
इत्यसौ हरिसिंहेन बोधितः पुनरब्रवीत्।। 149।।
किमस्मान्निश्चितात्कार्यान्निवारयितुमिच्छसि।
इति पृच्छन्तमाहुस्तमन्ये सानुनयं वचः।। 150।।
मा तावदन्तरा रोद्धुं हरिसिंहं त्वमर्हसि।
विवक्षितमशेषं स ब्रवीतु क्रमशः सखे।। 151।।
अपवाहयितुं कस्मादयमिच्छति नो हठात्।
इति न ज्ञायते किन्तु जिघांसामि स्वयं नृपम्।। 152।।
अतो नाहं गमिष्यामि वधो यावन्न साध्यते।
नृपतेरस्य दुष्टस्य किं वादेन वृथाधुना।। 153।।
इत्युक्ते रूपसिंहने पीवराङ्गो युवाब्रवीत्।
अमोघो हरिसिंहस्य निर्णयः किल सर्वदा।। 154।।
अथ साग्रहमाचख्यौ ग्रहिलो रूपकः पुनः।
हरिसिंहः स्वयं यातु न्यस्तभारो मयीति सः।। 155।।
मदीयास्त्रेण नैव त्वं प्रहर्तुं मित्र शक्नुयाः।
इत्युक्ते हरिसिंहेन रूपः प्रोवाच कोपनः।। 156।।
किमस्मान्मधुरैर्वाक्यैः प्रतारयितुमिच्छसि।
ननु ते तत्प्रतीकारं करिष्येऽहं यथार्हतः।। 157।।
अथान्यौ सुहृदौ क्रुद्धौ सोपालम्भमवोचताम्।
कथमार्यं च धिग् रूप हरिसिहं विशङ्कसे।। 158।।
परिवर्धितमन्युस्तं रूपसिंहोऽब्रवीत्पुनः।
गूढचारोऽसि रे राज्ञो हरिसिंहेति निष्ठुरम्।। 159।।

ततोऽब्रवीद्युवा पीनः खलूक्त्वा खलजल्पितम्।
इतस्तमेव निर्याहि न दूष्योऽयं पुनस्त्वया ।। 160।।
अपेतव्यमितोऽस्माभिर्यथैवायं प्रशास्ति नः।
स एव नायकोऽस्माकं न पुनस्त्वं प्रजल्पकः।। 161।।
इत्यादिष्टोऽप्यसौ मित्रैर्हरिसिंहमतर्जयत्।
उपदेक्ष्यामि ते बुद्धिं भीरुकश्चेद्भवेरिति।। 162।।
रूपसिंहस्तदा प्रेक्ष्य हरिसिंहं निरुत्तरम्।
पप्रच्छ मत्प्रतिज्ञातं श्रुतमेतन्ननु त्वया।। 163।।
एवमस्तु परं शीघ्रं युष्माभिर्गम्यतामितः।
अनेनैवाध्वना राजा न चिरात्पुरमेष्यति।। 164।।
पूर्वमेवागमात्तस्य विदूरमपसर्पत।
इत्युक्त्वा हरिसिंहोऽदाद्रूपाय त्रपुदीपकम्।। 165।।
अथ त्रयोऽपि तूष्णीं ते गृहीत्वा निजभाण्डकम्।
अन्धकारे सुरङ्गस्य क्षणाज्जग्मुरदृश्यताम्।। 166।।
निशायां क्षीयमाणायां हरिसिंहोऽथ कन्दरे।
पीड्यामानो विकल्पौघैरेकाकी विह्वलः स्थितः।। 167।।
ध्यायन् यौवनकालिनां दशां मातुरयन्त्रिताम् ।
दर्शनं मानसिंहस्य प्रथमं देववमन्दिरे ।। 168।।
अनुरागं तयोर्मध्ये वर्धमानं दिने दिने ।
परिणामं च तत्प्रेम्णो ह्रेपणं च यशोहरम् ।। 169।।
अथाकलय्य तद्वृत्तमात्मनो जन्मदूषकम् ।
लज्जारोशजुगुप्साभिः परं पर्याकुलोऽभवत् ।। 170।।
दीनान् दुनोति यो धूर्तः स एव बतमे पिता ।
इति शोचन्नविश्रान्तमात्मानमजुगुप्सत ।। 171।।
पितृहत्या महत्पापमिति घोषयतो गुरोः ।
धर्मोक्तिः श्रोत्रयोरन्तः प्रतिध्वनिमिवाकरोत् ।।172।।
ललाटमभवत्तस्य स्वेदबिन्दुभिरन्वितम् ।
प्रतिपत्तिविमूढस्य चिन्तामथितचेतसः।। 173।।
अथाचिराद्विदूरेण रथनेमिध्वनौ श्रुते ।
ह्रदयं हरिसिंहस्य विह्वलस्यास्फुरद्भृशम् ।। 174।।
बद्धदृष्टिर्युवा यावदवैक्षत गवाक्षतः।
स्यन्दनस्य ध्वनिस्तावद् भूयो भूयो व्यवर्धत ।। 175।।

अचिरान्मानसिंहस्य स्यन्दनः परिवारितः।
उपरक्षैर्हयारोहैरस्य दृष्टिपथं गतः।।176।।
यदासीच्चित्तमायस्तं सहसाऽभूत्तदुज्जवलम् ।
स चापि विलसन्नेत्रो झटिती प्रोत्थितः स्थितः ।।177।।
प्रहारं कृतवत्येव गुलिकाभिर्गवाक्षतः ।
केनाप्यार्तरवेणाभून्निशायाः शान्तता हता।। 178।।
कन्दराद्बहिराकर्ण्य धडत्कारध्वनिं ततः ।
सैनिकःकोऽपि विध्वस्तःस्यादित्ययमतर्कयत् ।।179।।
उदग्रचरणैर्वाहैर्वित्रस्तैर्मुक्तरश्मिभिः।
पलाय्यत समुद्भ्रान्तै रथमाकृश्य वेगतः ।।180।।
चक्रनेमिध्वनिर्दूरान्मन्दमन्दोऽभवच्छनैः।
प्रतिश्रुदार्तरावस्य श्रूयते स्म पुनश्चिरम् ।। 181।।
चपलःसैनिकः कश्चिच्चटुलाङ्गो हयान्निजात् ।
अवप्लुत्य नतः सख्युरुत्तानस्य शवोपरि ।। 182।।
प्रहारागतिजिज्ञासुरीक्षते स्म प्रयत्नतः।
विलक्षणझणत्कारं रचयन्निजवर्मणः।। 183।।
गुहामभिययौ यावत्सैनिकोऽध्वानमामृशन्।
हरिसिंहो निरूच्छ्वासस्तस्थौ लीनस्तदन्तरे।। 184।।
अश्वारोहस्तु यत्किञ्चिदपश्यन् संशयास्पदम्।
न्यवर्तत दरीपार्श्वाद्वृथाभूतपरिश्रमः।। 185।।
अथ भूयो झणत्कारी मित्रस्यैत्य कलेवरम्।
उद्धृत्य च शवं तस्य प्रचचाल जवात्ततः।। 186।।
सर्वतश्च प्रशान्तेऽपि चिरायान्तः स्थितो युवा।
पश्यति स्म तमःपुञ्जे निःशब्दजडनिश्चलः।। 187।।
शनैःशनैनरथोत्थाय प्रेक्षमाणः समन्ततः।
स निष्क्रम्य गुहागर्भात्तमिस्त्रायामगाहत।। 188।।
श्रामं श्रामं निजावासं प्रतियास्यन् युवाऽध्वनि।
रक्षिणां क्रन्दनं शृण्वन् नृपालवधघोषिणाम्।। 189।।
अचिरादेव संप्राप पल्लिकायाश्चतुष्पथम्।
यतश्चैकतमो मार्गः स्वमातृगृहमभ्यगात्।। 190।।
मन्दिराभिमुखं पश्यन् शून्यदृष्टिः क्षणं स्थितः।
विनिश्चलो युवा तत्र कर्तव्यमभिचिन्तयन्।। 191।।

अथ प्रतीपमध्वानमुपाश्रित्य जगाम सः।
जीवे वैरस्यमापन्नो गुल्मकं ग्रामरक्षिणाम्।। 192।।

पुष्पिका.–लोकसेवाप्रसक्तानां जगदेव कुटुम्बकम्। इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां कथापञ्चके तृतीया हरिसिंहकथा समाप्ता।

------------------------------*****-------------------------

कथासारांशः–सौराष्ट्रान्तर्गतकमलापुरनाम्नि ग्रामे हरिसिंह नाम कश्चिद्युवा मात्रा सह प्रत्यवसत्। हरिसिंहस्य माता परित्यक्तासीत्। ग्रामस्यास्य शासकः मानसिंहः। कथायाः प्रारम्भे ग्रामस्य दुरवस्था क्षमा देव्या वर्णितास्ति। बुभुक्षया पीडिताः वृद्धाः व्याधिग्रस्ताः कुपोषिताः बालकाः दरिद्राः स्त्रि–पुरूषाश्च न्यवसन् ग्रामेऽस्मिन्। हृदयद्रावकं करुणार्द्रञ्च वर्णनमेतद्।

कृपालुः हरिसिंहः तेषां साहाय्यर्थं सततं यततेस्म कुत्राचिद्बालकाय मोदकं दत्वा शीतेन कम्पमानायै शिरोष्णिषं दत्वा च हरिसिंहः सर्वान् परिसान्त्वयितुं प्रयत्नान्विधास्यति। मानसिहं प्रति तस्य मित्रस्य मनस्यतीव क्रोधः आसीत् हरिसिंहःतस्यचत्वारि मित्राणिच सम्मील्य मानसिंहस्य वधयोजनां निर्माय वधाय सज्जा अभवन्। मानसिंहस्य शिरोवेदनामपाकर्तुमागस्य तस्य पितुः शरीराच्चर्म निष्कृत्य मारितः सः वैद्यः दुष्टेन मानसिंहेन। तदर्थ प्रहारगुलिकाः अनेष्टुं सः गृहस्योपरितन प्रकोष्ठे स्थापितां पेटिकामुदघाटयत्। तदा तत्र मानसिंहेन सह स्वमातुरेकं छायाचित्रं दृष्टवान्। मानसिंहेन यौवने जनन्यै लिखिताश्च लेखा अपि तेन दृष्टाः। सम्भ्रातेन किकर्तव्यमूढेन च तेन मातुरागमनमपि न लक्षितम्।

मातृविषयकक्रोधेन दहयमानं तं परिसान्त्व्य मात्रा देवमन्दिरे मम मर्विवाहोऽभवत्। परं स्वकुलवृद्धानां विरोधान्मानेसिंहेन सा हरिसिंहस्य जन्मात्पूर्वमेव परित्यक्ताकेनचित् कृषिवलेन सह परिणीता च। कृषिवलस्य मृत्योरनन्तरं सा पुत्रेणसहात्र न्यवसत्।

वृत्तमेतच्छ्रुत्वापि हरिसिंहः निश्चयान्नचलितः। पितृहत्या महत्पापमिति ज्ञात्वापि प्रजारक्षणार्थं तेन मानसिंहस्य रथस्य ध्वनिं श्रुत्वा गवाक्षतः गुलिकाभिः प्रहारः कृतः। हरिसिंहः लोकसेवाप्रसक्तः कथान्ते पुष्पिकायां सुभाषितेन तात्पर्यं कथयति– लोकसेवाप्रसक्तानां जगदेव कुटुम्बकम्।

दन्तकेयूरम्

पारेतालीवनं पल्ल्यां श्रूयते स्म विदूरतः ।।
मृदङ्गवेणुनिर्घोषी होलिकोत्सवडम्बर : ।। 1 ।।
अवर्धत निनादोऽयं कर्कषैर्मुखवादनैः ।
मधूत्सवप्रहृष्टानामुन्मत्तग्रामवासिनाम् ।। 2 ।।
मत्स्याजीवो गणुर्भार्यां भुक्तासीनो गृहाङ्गणे ।
उवाच श्वो वसिष्येऽहं जीर्णमेवाम्बरं प्रिये ।। 3 ।
शयानं सुतमङ्गुल्या दर्शयन्पुनराह सः ।
न देह्यस्मै नवं वस्त्रं मा स्म तन्मलिनं भवेत् ।। 4 ।।
अथ भार्याऽब्रवीद्राधा का हानिः क्षालयाम्यहम् ।
लाक्षांबुसेचनं कार्यं सर्वथा साम्प्रदायिकम् ।। 5 ।।
अपि त्वं बालकं तर्हि तत्कर्तुमनुमोदसे ।
इति पृष्टाऽब्रवीद्राधा सामिवारितजृम्भिका ।। 6 ।।
अथ किं तस्य हेतोर्हि क्रीतं सेचनशृङ्ग्कम् ।
श्वो जन्मदिवसश्चास्य क्रीडतु स्वैरमर्भकः ।। 7 ।।
सोऽप्याह क्रियतामिष्टं मा पुनर्भूदतिश्रमः ।
हृदयं तव निस्सत्त्वं रक्षणीयं हि यत्नतः ।। 8 ।।
निरुत्तरामथालिङ्ग्य पप्रच्छ कुशलं नु ते ।
सा च मन्दमवादीत्तं तथैवेति स्मितानना ।। 9 ।।
प्रत्यूषे शयनं मुक्त्वा परेद्युर्व्यापृताऽभवत् ।
प्रागेव पत्युरुत्थानाद्राधिका गृहकर्मसु ।। 10 ।।
सिञ्चन्ती चोपलिम्पन्ती चित्रयन्ती गृहाङ्गणम् ।
रंगवल्लीकृताकारैः श्रपयन्ती च भोजनम् ।। 10 ।।
समाप्तगृहकार्याथ पेटिकामुपगम्य सा ।
तूष्णीं पिधानमुद्घाट्य शुभं वसनमाददे ।। 12 ।।
यत्नेन वेष्टयन्ती स्वमात्मानमतिकर्शितम् ।
आपादमामुचद्वस्त्रमजातिसदृशक्रमम् ।। 13 ।
कण्ठे माङ्गलिकं सूत्रं बाहौ दान्तिकमण्डनम्
द्वयमाभरणं मुक्त्वा न सा परमधारयत् ।।14 ।।
वंशक्रमागतं तच्च गणुना बहुमानितम् ।
केयूरं न कदाप्यस्याः कृशं बाहुममुञ्चत ।। 15 ।।
होलिकादिवसात्प्राक्तु राधिका तदपानयत् ।

अधारयच्च तत्स्थाने राजतं मातुरङ्गदम् ।। 16।।
अथैवं मण्डिता राधा निदधे पेटिकोपरि ।
स्वपत्युर्धौतवस्त्राणि धारणाय मधूत्सवे ।। 17।।
ततोऽस्थादुपशालायां व्यापृता सा परीक्षणे ।
कतीनामपि वस्तूनां क्रीतानां प्राग् दिने स्वयम् ।।18।।
प्रागेव भर्तुरुत्थानान्मात्स्यिकस्याविजानतः।
अखिलान्यपि वस्तूनि गोपयामास सैकतः ।। 19।।
मध्याह्नभोजने वृत्ते बालकस्तत्पितापि च ।
रङ्गसेकविहाराय गन्तुमास्तां समूद्यतौ ।। 20।।
तावब्रवीत्तदा राधा विहरेतं यथेच्छया ।
मत्कृते न त्वरा कार्या पुनरागन्तुमालयम् ।। 21।।
जालजीवी तदाकर्ण्य क्षणमात्रमचिन्तयत् ।
किमेका कर्तुकामास्यादिति विस्मितमानसः ।। 22।।
साकूतमथ तां पश्यन् फलकं भित्तिगं गतः।
आदातुं निजमुष्णीशं स्थापितं यत्नतस्तया ।।23।।
शिरसि प्रतिमुच्यैनदपनीय च तत्क्षणात् ।
जवादपरितोषेण निधाय फलके पुनः ।।24।।
नाहं तत्परिधास्यामि परं जीर्णं हि दृश्यते ।
अग्रे रंग्वादिमित्राणां मा गमं परिहास्यताम् ।। 25।।
जानासि त्वमसौ दर्पाद्यथा रंगुर्विकत्थते ।
इत्यालपन्तमाकर्ण्य व्याकुला सा तमैक्षत ।। 26।।
अपि नाम लभेयान्यन्नूतनं शीर्षवेष्टनम् ।
इत्यवादीद्गणुर्भूयो दर्शयंस्तुष्टिशून्यताम् ।।27 ।।
अथैवमधनावस्थामनुशोचन्तमात्मनः ।
राधिका मधुरैर्वाक्यैः सान्त्वयामास वल्लभम् ।। 28।।
अनत्यशोभनं नाथ प्रतिभाति हि शीर्षकम् ।
पूर्वेद्युः क्षालितं सद्यः पुटीकृत्य निवेशितम् ।। 29।।
सर्वथा न चिरादेव भविष्यति मलीमसम् ।
मर्दितं चेदमुष्णीशं मुहुर्लाक्षाम्बुसेचनात् ।। 30।।
प्रायो नूनमवाप्तासि नूतनं भाविवत्सरे ।
इत्यूक्त्वा चक्षुषा बालं वक्तुकामं न्यवारयत् ।। 31।।
अल्पार्जकस्य तत्राशा महती मे न विद्यते ।

इत्युक्त्वा दर्पणं पश्यन्नुष्णीषं शिरसि न्यधात् ।। 32।।
हन्त पश्य कियद्रम्यमधुना दृश्यते प्रिय ।
पुराणमिदमुष्णीशं शुभदं ते हि सर्वदा ।। 33।।
गणुना सशिरःकम्पं प्रत्याख्यातं तु तद्वचः ।
अथामृद्वात्करं मातुर्बालकस्त्वरयन्निव ।। 34।।
तत्कर्णे चाब्रवीन्मन्दमात्मनो यद्विवक्षितम् ।
ततः शृङ्गकमादाय विहर्तुं सखिभिर्ययौ । 35 ।।
प्रतस्थे च ततःसोऽपि मात्स्यिको ग्राममण्डपम् ।
उच्चावचविलासानां कितवानामुपाश्रयम् ।। 36।।
जुहुग्रामे यथान्यत्र मद्यपानं यथेच्छया ।
सेव्यते स्म प्रजाकूटैर्विशेषेण मधूत्सवे ।। 37।।
अथाचिराद्गणुश्चापि मात्स्यिकैर्मिलितोऽभवत् ।
मद्यविक्रयिभिश्चान्यैर्विचेष्टास्पर्धिभिः परम् ।। 38।।
ततःकेचिन्मदोन्मत्ताः कस्यचिद्वृद्धिजीविनः ।
ग्रामीणाः समगच्छन्त रंगुनाम्नो गृहाङ्गणे ।। 39।।
अहमस्मिन् जुहुग्रामे सर्वैरपि पुरस्कृतः ।
धनाढ्योऽहं सुवेषोऽहमिति रंगुरकत्थत ।। 40।।
लिप्तः सुगन्धतैलेन मुद्रावलयमण्डितः।
कथालापं सदा कुर्वुन् स्वाभिमानमदर्शयत् ।। 41।।
मद्यपानेन मत्तोऽयमाख्याति स्मात्मना कृताः ।
गोपीधीवरपत्नीषु नानाशृङ्गारचेष्टिकाः ।। 42।।
कुसीदकममुं दृप्तमद्विक्षन्मात्स्यिको गणुः ।
प्रायेण तस्य संपर्कादात्मानं च न्यवारयत् ।। 43 ।।
तद्दिने तु गणुर्मत्तो निरर्गलमधूत्सवे ।
घूर्णमानोऽगमद्रंगोर्गृहं सहचरैः सह ।। 44।।
अथ प्राप्तेषु मित्रेषु स्वगेहं स कुसीदकः ।
आतस्तार कुथां शीघ्रं गौरवेण गृहाङ्गणे ।। 45।।
आसिच्च मृद्घटात्ताम्रभाजनेषु सुरां ततः ।
पातुमामन्त्रयामास सुहृदो हस्तसंज्ञया ।। 46।।
पीतहृष्टोपविष्टेषु मण्डलीभूय सर्वतः ।
निजानुभवमाचख्यौ शृङ्गाररससंभृतम् ।। 47 ।।
गर्वेण जल्पतो रंगोर्गूढवैरप्रहर्षिणः ।

मुखं बभूव सोल्लासं भविष्यद्विजयादिव ।। 48।।
कुचेष्टितं निरीक्ष्यास्य जातामर्षोऽभवद्गणुः ।
प्रत्युत्तरं च सावज्ञस्तन्मतं विब्रुवन् ददौ ।। 49 ।।
पिधेहि भो दुराचार दुर्मुखं ते निरर्गलम् ।
अलं विकत्थनैरेभिर्मृषावादैश्च जल्पितैः ।। 50।।
इत्युक्ते मिलितास्त्वन्ये प्रहासं चक्रिरे नराः ।
कुस्मितश्च ततो रंगुः पुनराह विकत्थनः ।। 51।।
मदुक्तौ किं न विश्वासस्तर्हि रे बध्यतां पणः ।
पणितेन न मे कार्यमित्युक्तो रंगुरब्रवीत् ।। 52।।
सावज्ञमन्दहासेन ब्रूहि दीव्यसि किं न वा ।। 53।।
आलोक्य क्षणमेवासौ कटिबन्धगतं पणम् ।
स्वहस्तेन परामृष्य गणुरात्मन्यचिन्तयत् ।। 54 ।।
जयं प्राप्स्यामि चेद् द्यूते क्रेष्याम्यहमुपायनम् ।
प्रियार्थमिति संचिन्त्य तथेति गणुरब्रवीत् ।। 55 ।।
दाशस्यानुमतिं दृष्ट्वा मिलिता इतरे जनाः ।
संमतिं दर्शयामासुः स्वयं च सह देवितुम् ।। 56 ।।
अपि जानीथ मित्राणि सप्ताहेऽस्मिन्मयार्जितम्।
अधिकं मासलभ्यांशाद् धनमर्थप्रयोगतः ।। 57 ।।
इति वार्धुषिको रंगु : कत्थमानो मदोद्धतः
नाणकैः संभृतं कोशं सझणत्कारमामृशत्।। 58 ।।
वयस्याः पञ्च तस्यान्ये नैव किंचिद्बभाषिरे।
न सेहे तु गणोरात्मा रंगोरतिविकत्थनम् ।। 59 ।।
तथापि न शशाकैनं विरोद्धुं धनिकं तु सः ।
निर्गुणोऽपि जनः सभ्यैः शङ्क्यते हि धनान्वितः ।। 60 ।।
अस्ति रत्नद्वयं चान्यन्महार्हं तच्च दैवतः।
मदीयं भवितेत्याह रंगुर्गूढार्थगर्भितम् ।। 61 ।।
न चैतत्कुहकं वाक्यं न गणुःसारतोऽग्रहीत्।
सुस्पष्टमस्य भावार्थं मनसैव व्यचिन्तयत् ।। 62।।
वृणीते दुर्जनं लक्ष्मीरिति जल्पन् गणुः स्वयम्।
नाणकान् कटिसन्नद्धानुन्मुमोच शनैः शनैः ।। 63।।
तमन्येष्वनुकुर्वत्सु पृच्छति स्म कुसीदकः।
अपि मामनुजानीथ पणं बन्द्धुं त्रिशस्त्रिशः ।। 64।।

इति साडम्बरं जल्पन्नपश्यदवहेलया।
स्तोकशः स्थापितान् षड्भिर्नाणकानक्षदेवकैः ।। 65 ।।
तथेत्युक्ते नरैः षड्भिरैकमत्येन वार्धुषिः ।
स्वयमादौ प्रचिक्षेप लीलयेव स पाशकान् ।। 66 ।।
अथारम्भे गणुर्दिष्ट्या संप्राप्य विजयश्रियम्।
कुशलो न चिरादेव लेभे रूप्यकविंशतिम् ।। 67 ।।
क्षणमात्रेण संपाद्य मासतोऽप्यतिदुर्लभम्।
अद्भुतेन स्वभाग्येन जालिको विस्मितोऽभवत् ।। 68 ।।
रोमाञ्चितो गणुर्गृह्णन् द्यूतेनावजितं धनम्।
ध्यायति स्म प्रियायै मे सर्वमेतद्भविष्यति ।। 69 ।।
अथ कोशात्समादाय रंगुर्नाणकपूलिकाम्।
मित्रैः सह पुनः पानं सिषेवे कामचारतः ।। 70 ।।
द्यूतेऽथ पुनरारब्धे जित्वा भूयोऽपि मात्स्यिकः।
बभुव परमानन्दविवशो भाग्यलाभतः ।। 71 ।।
दृष्ट्वा गणोर्महाहर्षमब्रवीत्स कुसीदकः।
दीव्यामः सुहृदो भूयः साहसे श्रीर्यतः स्थिता ।। 72 ।।
इत्युक्ते रंगुणाऽप्यन्ये नष्टमर्थं जिगीषवः।
मुहूर्तं चिन्तायामासुः किन्तु नैवानुमेनिरे ।। 73 ।।
गणुश्च निर्जितं द्यूते वित्तं यत्नाद्रिरक्षिषुः।
प्रत्याख्याद्बाहुमुद्यम्य नवं रंगोरभिग्रहम् ।। 74 ।।
कोशस्थं मे धनं नष्टं वस्तु किञ्चित्तु तिष्ठाति।
इति न्यवेदयद्रंगुः खेदादव्यक्तमाललपन् ।। 75 ।।
अथ यावदसौ कोशे हस्तमाधाय मार्गति
तावदन्ये स्म वीक्षन्ते कौतुकात्तद्विचेष्टितम् ।। 76 ।।
उद्दधार ततो रंगुः स्वकोशात्कुहकस्मितः।
एकं विचित्रकेयूरं गजदन्तेन मण्डितम् ।। 77 ।।
अथ हस्तगतं रंगोरवलोक्याङ्गदं गणुः।
सक्तदृष्टिरनालापो विवर्णश्च स्थितोऽभवत् ।। 78 ।।
विक्रयोद्घोषकेणेव रंगुणोद्यम्य दर्शितम्।
तत्र केयूरमालोक्य कश्चिदभ्यागतोऽब्रवीत् ।। 79 ।।
दृष्टिदोषनिरासाय जाने मातामही मम
अधारयत्पुरानेन सदृशं दान्तमङ्गदम् ।। 80 ।।

अथ श्लाघापरो रंगुः साभिमानोऽब्रवीद्वचः।
कयाचिद्ग्रामसुन्दर्या प्रीत्येदं हि ममार्पितम् ।। 81 ।।
बहूनि चान्यवस्तूनि ध्रुवं सा मे प्रदास्यति।
मनाक् प्रतीक्ष्यतां सर्वं ज्ञास्यते न चिरादिति ।। 82 ।।
तदालोक्य गणुः क्रोधादुत्पित्सुरिव वेगतः।
गलनिष्पीडनेनास्य हर्तुमैच्छत्तदङ्गदम् ।। 83 ।।
तथापि संहरन् रोषं जिगीषुर्द्यूत एव सः।
अब्रवीत्परुषं वाक्यमवलिप्तं कुसीद्कम् ।। 84 ।।
अलं दर्पेण ते रंगो केयूरस्य कृते पणम्।
करिष्ये जितसर्वस्वमेहि दीव्याव पाशकैः ।। 85 ।।
अतिसाहसममेवासीद् गणोरेतद्विचेष्टितम्।
अर्थलिप्सुर्न किं कुर्यान्मत्सराद्विशो जनः ।। 86 ।।
अथैवं गणुनाहूतो निसर्गाद्द्यूतलम्पटः।
क्रीडितुं तेन भूयोऽपि प्रतिपेदे कुसीदकः ।। 87 ।।
अथ द्यूतमुपक्रम्य क्षिपन्तौ पाशकानुभौ।
अन्ये विलोकयन्ति स्म नष्टवित्ताः सकौमुकम् ।। 88 ।।
द्युतावजितवित्तार्ध हारयित्वाऽचिराद्गणुः।
कोपारुणितनेत्रोऽपि दीव्यति स्मावधानतः।। 89 ।।
रंगुस्तु नष्टपूर्वं स्वं निर्जित्य निखिलेन सः।
बभूव परमानन्दपरिध्मातश्च गर्वितः।। 90 ।।
अथ यावच्चकारासौ द्यूतलब्धस्य संग्रहम्।
आश्चर्यवचनोद्गारमकरोत्तावदेककः।। 91 ।।

अहो गणोर्वंशे पूर्वं यदासीद्रूप्यकद्वयम्।
तदप्यस्याधुना नष्टं जातश्चायमकिञ्चनः।। 92 ।।
अपि भूयः स्वभाग्यस्य करिष्यसि परीक्षणम्।
ऋणं दास्यामि ते नूनमिति पप्रच्छ वार्धुषिः।।93 ।।
मा तावदलमेतेन द्यूतेनेति स्खलद्वचाः।
गणुर्भूयः पिबन्मद्यं संसिक्तचिबुकोऽब्रवीत्।।94 ।।
ततो घर्घरकण्ठोऽसौ प्रक्षिप्य भुवि भाजनम्।
निर्भाग्यः प्राङ्गणाद्रंगोरपदुद्राव वेगतः।।95 ।।
क्रोशार्धमन्तरैवासीत्कुटीरं मत्स्यजीविनः।
क्रोधान्धस्य तु भाति स्म तदेवातिविदूरगम्।।96 ।।

अथो गृहाङ्गणं प्राप्य द्वारदेशे स्खलत्पदः।
आत्मानमतियत्नेन ररक्ष पतनाद्भुवि।।97।।
शून्यभूतेऽग्रिमे कोष्ठे सन्ध्याया मन्दरश्मयः।
प्रविश्य विलिहन्ति स्म च्छायाः कोणावलम्बिनीः।।98।।
भार्यामाह्वातुकामोऽपि सहसा बद्धवाग्भवत्।
गर्भागारमगात्तूर्णं गणुः परमदुर्मनाः।।99।।
दीपमादीपयन्ती सा बभाषे विस्मिता पतिम्।
अहो क्षिप्तं समायातः कथमेवं भवानिति।।100।।
अपि भग्नोद्यमासि त्वं मत्तो विश्वासघातिनि।
इत्यपृच्छद्गणुः क्रोधात्कम्पमानः सगद्गदम्।।101।।
गन्धं मद्यस्य जिघ्रन्ती पश्यन्ती च गणोर्मुखम्।
पप्रच्छ किं नु संवृत्तमिति राधा स्मितानना।।102।।
क्रोधेन विकृताकारं मुखमस्यावलोक्य सा।
मद्यपानेन मत्तोऽयमिति स्पष्टमतर्कयत्।।103।।
रुद्धवाक्प्रसरः कण्ठे स्खलन् पप्रच्छ तां गणुः।
व्यभिचारे कदारभ्य प्रवृत्तासि कुलान्तके।।104।।
व्याजेन हृदयव्याधेर्भूत्वा मे करुणास्पदम्।
अनुरंगुं प्रसक्तासि सतीव तु विचेष्टसे।। 105।।
आशु विज्ञाय सा राधा पैशाचक्रोधकारणम्।
अस्पष्टां कुर्वती संज्ञां संबभूव पराङ्मुखी।। 106।।
अथ स्थित्वा पुरस्तस्याः प्रचलन्तीं निवारयन्।
जगर्ज गणुरत्युच्चैः किमये मां न भाषसे।। 107।।
न तु सा वचसा प्रादादुत्तरं स्मितमन्तरा।
यत्स्मितं मात्स्यिको मेने तिरस्कारविजृम्भितम्।। 108।।
किं न जल्पसि दुर्वृत्ते इति पृष्टा पुनः पुनः।
वस्त्राञ्चलेन बाहुं सा प्रावृणोद्दक्षिणेतरम्।। 109।।
तदाचेष्टितमालोक्य प्रससर्प गणुर्जवात्।
सहसा चाम्बरं बाहोस्तदीयमुदपाटयत्।। 110।।
अथ बाहौ गृहीत्वा तां दर्शयन् रौप्यमङ्गदम्।
किन्निमित्तमिदं ब्रुहि धृतमित्यब्रवीत्क्रुधा।। 111।।
जनन्याः स्मरणायैव मयेदं धृतमङ्गदम्।
इत्याख्यान्तीं स तामाह क्व नु मे दान्तमङ्गदम्।।112।।

इति तां साग्रहं पृच्छन्नाक्रोशंश्च पुनः पुनः।
करे निष्पीडयामास मग्नमन्दस्वरां मुहुः।। 113।।
किमर्दयसि मां नाथ मुञ्च मां चेष्टितैरलम्।
इत्युवाच परं राधा पीडिता मन्दहासिनी।। 114।।
मत्तस्य लालनार्थे मे मन्दहासं व्यनक्ति सा।
इतीव मन्यते स्मासौ भृशं क्रुद्धोऽपि चेतसि।। 115।।
हृदये तु परासक्ता नूनमेषेति भवना।
तत्तच्चिन्तयमानं तं बाधते स्म निरन्तरम्।। 116।।
राधिकायाश्च वृत्तेन द्विगुणीभूतसंशयः।
अवतस्थे चिरं तूष्णींमावेगाद्दीर्घमुच्छ्वसन्।। 117।।
यथा यथा स सस्मार रंगुणा प्रस्तुतां कथाम्।
तथा तथा हृदि क्रोधवह्निर्जज्वाल वेगतः।। 118।।
मदीयं देहि मे धूर्ते केयूरमिती तां गणुः।
निर्दयं ताडयामास गलहस्तिकया नुदन्।। 119।।
अथातिदीनमाक्रन्द्य प्रस्खलन्ती पपात सा।
सहसैव निरुच्छ्वासा बभूव च तपस्विनी।। 120।।
तदीयः करुणाक्रन्दःशशंसार्तिकरीं कथाम्।
भग्नाशाया विनष्टस्य जीवलोकसुखस्य च।। 121।।
अथ जल्पन् दुरुक्तानि व्यपनीय च शीर्षकम्।
गणुः क्रोधाद् बहिस्तूर्णं निर्जगाम गृहाङ्गणम्।।122।।
नानास्मृतिमहावर्तभ्रमदाकुलमानसः।
अङ्गणेऽतिष्ठदेकाकी चिराय परिचिन्तयन्।। 123।।
अवञ्चयत मामेषा वसन्त्यपि गृहे मम।
इति चिन्तयतस्तस्य पुनः क्रोधोऽभ्यवर्धत।। 124।।
प्रतारितोऽस्मि मूढोऽहं भार्यया नित्यरुग्णया।
इति ध्यायन्गणुस्तीव्रं मनसा पर्यदूयत।। 125।।
अस्तं गते ततः सूर्ये होलिकोत्सवडम्बरः।
मृदङ्गवेणुनिर्घोषैः सह क्षीणोऽभवच्छनैः।। 126।।
अथ निश्शब्दभूतेषु मत्तेषूत्सवकारिषु।
घण्टानादोऽर्चनाशंसी शुश्रुवे देवमन्दिरात्।। 127।।
अचिरात्प्राङ्गणद्वारमुद्घाट्य सहसार्भकः।
लाक्षाम्बुसिक्तसर्वाङ्गो विशति स्म स्मिताननः।। 128।।

आह्वयत्पितरं बालः सानन्दो बालभाषया।
गणुस्तु भ्रुकुटिं बध्द्वा तमपश्यन्निरुत्तरः।। 129।।
बालोऽथ दष्टजिह्वः सन् भयादिव तमब्रवीत्।
श्वः प्रभाते लघूत्थाय तात नेष्यामि जालकम्।। 130।।
अपेह्यनिष्ट रे नीच न मे कार्यं त्वया सह।
इत्युक्ते गणुना बालः परितो दृष्टिमाक्षिपत्।। 131।।
उवाच पितरं तात रहस्यं किमु बुध्यसे।
शृणु वच्मीति तत्कर्णे मन्दं किमपि सोऽब्रवीत्।। 132।।
श्रुत्वापि बालकस्योक्तिं गणुर्निर्वचनः स्थितः।
तच्चितं हि विकल्पौघे मग्नोन्मग्नमभूद्भृशम्।। 133।।
क्षणं निरीक्ष्य बालोऽथ बभाषे पितरं पुनः।
कथयिष्यामि ते किंचिन्न चेद्वक्ष्यसि मातरम्।। 134।।
पुनः शङ्काकुलो भूत्वा तर्जयन् पाणिनार्भकम्।
गणुराह बटो यत्त्वं वेत्सि तद् ब्रूहि सत्वरम्।। 135।।
कुत्राम्बेति पुनः पृष्टः कोष्ठागारमदर्शयत्।
अर्भकश्च द्रुतं गत्वा तदन्तः प्रविवेश सः।। 136।।
अथ पोटलिकाहस्ते दारके प्रत्युपागते।
इतस्तामाशु देहीति गणुः प्रासारयत्करौ।। 137।।
जनकायार्भको दत्वा पोटलीं तामवोचत।
पश्य हे तात पश्यास्यां पोटल्यां किं नु वर्तते।। 138।।
अथ यावग्दणुः शीघ्रं पोटलीं तामपावृणोत्।
तदन्तर्गतमालोक्य चकम्पे तस्य मानसम्।। 139।।
तत्रासीदेकमुष्णीषं नूतनं वस्त्रवेष्टितम्।
यत्प्रेक्ष्य हृदयं तस्य संशयावर्तमाविशत्।।140।।
अथ हस्तं न्यधाद्यावन्मात्स्यिकः पोटलीतले।
तावदस्याङ्गुली पत्रखण्डमेकं परामृशत्।।141।।
तदुद्धृत्य सपद्येव प्रेक्षमाणः समुत्सुकः।
अपावृत्य च लेखार्थमादरेण पपाठ सः।।142।।
भूतार्थस्य परिज्ञानं प्रादुरासीत्तदा हृदि।
क्रोधरुक्षं च सद्योऽस्य प्रसादमगमन्मुखम्।।143।।।
निक्षेपस्वीकृतेः पत्रं तदासीद्रङ्गुणार्पितम्।
पुनः पुनः पठित्वैतद् बभूव गणुराकुलः।।144।।

हन्त मिथ्यापवादेन दूषिताऽनपराधिनी।
प्रिया मे पशुनेवास्यां कृतं चात्याहितं मया।।145।।
हा हतोऽस्मि धिगेनं मां नीचानामधमाधमम्।
इति पश्चाग्दणुस्तप्तः करुणं पर्यदेवयत्।।146।।
प्रियायाः परितोषार्थी कर्तव्यमनुचिन्तयन्।
तस्थौ विलोक्यमानोऽसौ शिशुना बद्धदृष्टिना।।147।।
लब्धयुक्तिरिवास्फोट्य च्छोटिकां सहसा मुदा।
मात्स्यिको निदधे शीर्षे नूतनं शीर्षवेष्टनम्।।148।।
मैवं तातेति बालेन निषिद्धोऽपि त्वरान्वितः।
निवार्य तं गणुः पुत्रं प्रविवेश गृहं पुनः।।149।।
प्रदोषतिमिरेणाथ गर्भागारे हतप्रभे।
भित्तयस्तत्र चित्राभिश्छायाकृतिभिरङ्किताः।।150।।
गृहं निश्शब्दगम्भीरं श्मशानमिव भीषणम्।
दैवमानुषयोर्वृत्त्योर्युद्धरङ्ग इवाबभौ।।151।।

अथ यावग्दणुस्तूष्णीं गर्भागारमुपागमत्।
तावद्ददर्श निश्चेष्टां राधिकां पतितां भुवि।।152।।
सुप्तैषा किल निश्शङ्कमिती संचिन्तयन् गणुः।
तदुपर्यवनम्यास्याः केशपाशं परामृषत्।।153।।
सोत्कण्ठममुना राधा स्पृश्यमानाप्यनेकशः।
आहूतापि प्रियालापैर्न चचाल मनागपि।।154।।
भयोपहतसर्वात्मा भाले तां संस्पृशन् गुणः।
निष्पन्दशीतं तदृष्ट्वा वज्राहत इवाऽभवत्।।155।।
मन्ददीपप्रकाशेऽसौ प्रैक्षतास्या मुखाम्बुजम्।
प्रशान्तमाभिरामं च मीलितं कालनिद्रया।।156।।
पुष्पिका.–मद्यपस्य करे रत्नं न चिरायावतिष्ठते।
इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां कथापञ्चके दन्तकेयूरं नाम कथा चतुर्थी समाप्ता।

-------------------------**************-------------------

कथासारांशः–

गणुर्नाम मत्स्यजीवी मुम्बापुर्यां मात्सिकानां पल्ल्यां वसति स्म। होलिकोत्सवनिमित्तेन सर्वत्र हर्षोल्लासस्य वातावरणंमासीत्। तस्य पत्नी राधिका। तया पुत्रस्य जन्मदिवसस्य कृते नूतनानि वस्त्राणि क्रीतानि। वंशपरम्परयागतं दन्तकेयूरं गणुना राधायै दत्तमासीत्। सा कदापि न तत्केयूरं स्वशरीरादपानयत्। परं होलिकोत्सवात् प्राक्सा तदपवार्य राजतमङ्गदमधारयत्। माध्याह्नभोजनानन्तरं गणुः तस्य पुत्रश्च रङगसेकविहाराय गन्तुमुद्यतौ। मित्राण्युपहसिष्यन्तीति विचोरण गणुः जीर्णं पुरातनञ्चोष्णीषं धारयितुं नैच्छत्। राधिका मधुरवचनैस्तंमसान्त्वयत्। अस्मिन् होलिकोत्सवे यत्र मद्यपानं यथेच्छं सेव्यते तत्र जुहुग्रामगमदगणुः। रङगुर्नामः कश्चित् धनाढयः गर्विष्ठश्च कुसीदक आसीत्। तस्याविकत्थनेन दुराचरणेन निरर्गलजल्पनेनच संत्रस्तः गणु। तेन सह सम्पर्कमपि न्यवायत्। परमद्य होलिकोत्सवनिमित्तेन तस्यैव प्राङ्गणे मित्रैः सह मद्यपानार्थं अक्षक्रीडार्थञ्च गतः। द्यूतक्रीडायां जयं प्राप्स्यामि चेत् मत्प्रियार्थमहमुपायनं क्रेष्यामीति चिन्तायित्वा पणं च बध्वा रङ्गुणासह तेन द्यूतक्रीडारब्धा। धने नष्टे रङगुणा कोषादेकं दन्तकेयूरं निष्कासितम् तद्दृष्ट्वा गणुस्ताम्भितः। पत्न्यै दत्तं गजदन्तेन मण्डितमासीत्केयूरम्। कयाचिद्ग्रामसुन्दर्या प्रेम्णा दत्तमिदमिति रङ्गोर्मुखाच्छ्रुत्वा क्रोधावेशवशः गणुः तद्धर्तुमुद्युक्तः। परं न तत्शक्यमासीत्। द्यूतेनैव जेतव्यमिति विनिश्चित्य पुनस्तेन द्यूतक्रीडारब्धा। नष्टधनेन तेन मद्यपानं कृतम्। मद्योन्मतः सः कथञ्चिद्गृहं प्राप्तः। रङ्गुणासह राधिकाया अनुचितसम्बंधं वितर्क्य मद्योन्मत्तेन क्रोन्धान्धेन च गणुना भृशं ताडिता सा। आसुरताऽनेन सा भूमौ पतिता निरूव्च्छासा बभूव। सायङ्काले सर्वाङ्गरङ्गसिक्तः बालः गृहमागतः। गणुं तस्मै क्रोधेन दूरमपेहि रे नीच इत्यवदत्। रहस्यमेकं वदामीति यदा बालेनोक्तं। बालः तं कोष्ठागारं नीत्वादर्शयदेकां पोट्टलिकाम्। तत्र पत्रखण्डेन सह नूतन उष्णीषमासीत्। पत्रेण तेनज्ञातं यद् तस्योष्णीषक्रयणाय राधिकया केयूरं विक्रीतमिति। पश्चात्तापदग्धगणुर्गर्भागारमगच्छत्। तत्र निश्चेष्टां भूमौ पतितां स्वपत्निमपश्यत्सः। बहुधाहूतापि यदा सा प्रतिस्पदं नाददत्तदा गणुना ज्ञातं यत्सा दिवंगतेति। अत्रैव कथा समाप्यते।

----------------------**************----------------

एकदा बासनग्रामे फाल्गुने शीतमारुतः।
प्रवाति स्मोरुनिश्वासैरार्तवद् ध्वनिमुद्गिरन्।।1।।
उन्मत्तवद्धुनोति स्म द्वाराणि पटलानि च।
ह्रस्वजीर्णकुटीराणां श्रितानां मत्स्यजीविभिः।।2।।

अर्धावृतगवाक्षाणां रन्ध्रेभ्यः श्रूयते स्म च।
आसन्नवारिधेर्वीचीपटलाना प्रतिध्वनिः ।।3।।
तत्कालमुटजे क्वापि तरुणी रेविकाभिधा।
निषण्णाऽभूत्सुपर्णाख्यमात्स्यिकस्य कुटुम्बिनी।।4।।
लोडयन्ती शनैर्दुग्धं दग्धमृण्मयभाजने।
चिरोपयोगतः श्यामां चुल्लिकामधिसंस्थिते।।5।।
ग्रामेऽस्मिन्मात्स्यिका लोकाः पर्यहार्षुः प्रयत्नतः।
प्रातः काले सुपर्णस्य भार्याया मुखदर्शनम्।।6।।
रेवाऽसौ निरपत्यासीदत एवाशुभा मता।
मुखावलोकनं चास्या दुःखदायीत्यभाव्यत।।7।।
अतोऽभवन्निरानन्दा रेविका मन्दभागिनी।
अनादृतैकतः पत्या श्वश्र्वा च क्लेशिताऽन्यतः।।8।।
जननी जालिकस्यास्य जरठा गोपिकाभिधा।
कुञ्चिताङ्गी क्वचित्कोणे शेते स्म तिमिरावृते।।9।।

अथैकदा वधूमुच्चैः क्रोशन्ती साऽब्रवीद्वचः।
किं कर्तुमुद्यतासि त्वं पचामि क्षीरिकामहम्।
सैषा हि रोचते तस्मै सायंकालीनभोजने।।11।।
इति रेवा मृदूवाच धूमाकुलविलोचना।
अजस्रधमनैरग्नेरार्द्रयोगात्प्रशाम्यतः।।12।।
अथ सा कोपनाऽगर्जत्किं ब्रूषे ननु ते शिशोः।
मृतस्य न दशाहोऽपि व्यतीतो निरपत्रपे।।13।।
निजाधरपुटं दष्ट्वा निश्वसन्त्याह रेविका।
पत्यादिष्टा पचाम्येतन्मा वृथा स्म भवेदिति।।14।।
काङ्क्षितं तन्मयैवेति किं न वक्ष्यसि लोलुपे।
नष्टे नष्टे तवापत्ये बुभुक्षा तेऽधिकाधिका।।15।।
इति चुक्रोष वृद्धासौ शपन्ती तां दुरुक्तिभिः।
निर्लिखन्ती नखैश्च स्वं लुलितं केशपाशकम्।।16।।

बहुशः श्रुतपूर्वत्वाद्भर्त्सनानां किलेदृशाम्।
मौनमालम्ब्य तिष्ठन्तीं वृद्धोवाच पुनः स्नुषाम्।।17।।
न जाने कस्य हेतोस्त्वं भर्तव्या मम सूनुना।
वन्ध्या कण्ठनिबद्धेव शिला सन्तापकारिणी।।18।।
इत्युच्चैरभिगर्जन्त्याः श्यामलं वलिनं मुखम्।
बभूव भीषणं गोप्या द्वेषावेगविघूर्णितम्।।19।।
प्रत्युवाचाथ रेवा तां कम्पमाना सगद्गदम्।
वन्ध्येति मां कुतो ब्रूषे सुवानामनुवत्सरम्।।20।।
इति सोत्थाय शंसन्ती गत्वा फलकसंनिधिम्।
स्थालीमुद्धृत्य तत्रस्थां शून्यचित्ता न्यधात्पुनः।।21।।
ननु जाने प्रसूतासि परं भस्मीकृतं त्वया।
निखिलं जातसन्तानं हतस्तन्यविषाग्निना।।22।।
इत्युक्त्वा कासितुं वृद्धा प्रवृत्ताऽभूदतीव सा।
रेवा च स्थापयित्वाग्रे पतद्ग्रहमपासरत्।।23।।
किञ्चिदाश्वस्य भूयोऽपि वृद्धा परुषमब्रवीत्।
गोधनं मेऽस्ति पुत्रस्य सन्तानस्त्वभिकाङ्क्ष्यते।।24।।
दीर्घं निश्वस्य यावत्सा तस्थौ रेवा निरुत्तरा।
जातामर्षाऽब्रवीवृद्धा विद्धि नूनं वदामि ते ।।25।।
अन्विष्यामि तदर्थेऽहं शुभामन्यां वधूमिति।
एतेन चकिता रेवा बभाषे तां सगद्गदम्।।26।।
अपत्येषु विनष्टेषु ब्रूहि दोषोऽम्ब को हि मे ।
ज्ञात्वापि किं दुनोषि त्वं वृथा मां मन्दभागिनीम्।।27।।
अथैनां गोपिकाऽवादीन्निरपत्यस्य जन्म धिक्।
सुपर्णस्याहमिच्छामि सर्वथा पुत्रमौरसम्।।28।।
किमिदं वाञ्छितं पत्युः प्रार्थये ब्रूहि तत्त्वतः।
इत्ययाचत दीना तामुद्भ्रान्तिस्फुरिताधरा।।29।।
निस्संशयं सुपर्णोऽसौ सन्तानमभिकाङ्क्षति।
पुरुषो न हि नारीव व्यनक्ति स्वमनोगतम्।।30।।
ननु जानसि ते पार्श्वाद्यथायं प्रपलायते।
अहं वेद्मि कियद्द्वेष्टि त्वामसौ कुलनाशिनीम्।।31।।
इत्याख्याय प्रवृत्ताभूदवाच्यवचनैः स्नुषाम्।
अभिशप्तुं पुनर्वृद्धा स्फोटयन्ती निजाङ्गुलीः।।32।।

आक्रोशावेशतो भूयः कासोत्कासार्दिताऽभवत्।
सकम्पा जीर्णसर्वाङ्गी क्षणं च विवशा स्थिता।।33।।
तीव्रदुःखेन संतप्ता रेवा शीघ्रमबुध्यत।
श्वश्रूदुर्वचनैः सिद्धमप्रियं दृढनिश्चयम्।।34।।
स्वजन्मनः कथा दीना लिखिताभूत्तदानने।
निष्प्रभं नयनद्वन्द्वं शोकावेगमसूचयत्।।35।।
सर्वोऽपि मुखभावोऽस्याः शंसति स्म निरास्थताम्।
अवाच्यवचनैः श्वश्र्वा जनितां नित्यजल्पितैः।।36।।
वेतसोपमदेहायाः कृशाङ्ग्याः शिथिलाङ्गता।
आत्मनो जीवयात्रायाश्चचक्षे दैवतन्त्रताम्।।37।।
रेवा ह्यादर्शभूतासीद् ग्रामेऽस्मिन्मत्स्यजीविनाम्।
जनान् परिचिकीर्षन्ती कथाश्रवणलालसा।।38।।
नित्यं नैदाघसन्ध्यासु कथा अतिभयङ्करीः।
पिशाचानां च दुर्गाया वृद्धः कश्चिदवर्णयत्।।39।।
चिन्तयन्त्या दिवारात्रं रेवायाः किल चेतसि।
भयश्रद्धे तदाख्यानमतिमात्रमजीजनत्।।40।।
शान्तकासा स्नुषामेनां जरठा साऽशपत्पुनः।
धिगनिष्टे भव ध्वस्ता निरपत्यनिशाचरि।।41।।
अथ वायोःसशूत्कारं गर्जतश्च्छदिरन्ध्रतः।
निर्घोषमधरीकृत्य जृम्भिते भर्त्सनध्वनौ।।42।।
पचन्त्याः सायमाहारं रेविकायाः करस्थिता।
दर्वी कम्पितसर्वाङ्ग्याः सहसा हस्ततोऽभ्रशत्।।43।।
मन्दज्वालेऽथ संजाते वह्नौ रेवावनम्य सा।
अतिमात्रं तमाध्मातुमारेभे चुल्लिकामुखे।।44।।
वह्निमेवं समीकृत्य गवाक्षस्यान्तिकं ययौ।
चलाचलस्य वातेन धूमजालावृतस्य च ।।45।।
बहिर्विलोकमाना सा लक्षयामास मात्स्यिकान्।
मिलिताञ्जलधेस्तीरे कथकस्य समन्ततः।।46।।
मरुद्घोषविरामेषु शृणोति स्म क्वचित्क्वचित्।
रोमाञ्चितवपू रेवा कथ्यमानं कथाद्भुतम्।।47।।
यदा तु न कथाऽश्रावि तदा स्तब्धेव सा स्थिता।
गेपिकाया दुरुक्तानि चिन्तयन्ती पुनः पुनः।।48।।

ततश्चुक्रोश सा वृद्धा बोधयन्ती स्नुषां निजाम्।
नष्टबालापि निर्लज्जे विहर्तुं किमिहोद्यता।।49।।
अकाण्डचकिता रेवा वृद्धायाः कुत्सितोक्तिभिः।
विषशल्यप्रविद्धेव तप्ताप्यवचना स्थिता।।50।।
सहिष्णुता तु रेवाया भूयो भूयः परीक्षिता।
परां कोटिं गताप्यासीन्न पर्याप्ताधुना किल।।51।।
सकम्पा भित्तिमालम्ब्य बाष्पधारां निगृह्णती।
ययौ दीपयितुं दीपं नितरां दुर्मनायिता।।52।।
ज्योतिर्मन्दप्रदीपस्य प्रसरत्सर्वतो गृहे।
भासयामास वृद्धाया वलिनं जीर्णमाननम्।।53।।
शापोक्तिभिरनन्ताभिरजस्रमुखरीकृतम्।
क्षणादथ बहिः शब्दश्रवणाद्विरतस्वनम्।।54।।
परमुच्छ्वसिता भर्तुः प्रत्युत्थानचिकीर्षया।
त्वरमाणागमद्रेवा द्वारदेशं समुत्सुका।।55।।
जालभारं वहन् स्कन्धे सार्द्रपादूधरः करे।
ऋजुह्रस्वशरीरोऽथ सुपर्णः प्राविशद्गृहम्।।56।।
निजवृत्तिपरो नित्यं प्रवीणो मत्स्यबन्धने।
सहिष्णुर्निजभार्यायां जनन्यामतिवत्सलः।।57।।
भूरिसंग्रहसंतुष्टोऽब्रवीद्भार्यां स मात्स्यिकः।
संग्रहोऽद्यतनो भूयान् भविता लाभकारकः।।58।।
उपानहावितो देहि जलार्द्रे शोषयाम्यहम्।
इत्युक्त्वा सा करात्पत्युरगृह्णात्पादुकाद्वयम्।।59।।
निक्षिप्य पार्श्वतो जालं निषण्णो मातुरग्रतः।
सुपर्णः स्विन्नसर्वाङ्गो जननीमभ्यभाषत।।60।।
स्मयमाना तु सा वृद्धा वर्तते स्म निरुत्तरा।
पर्यवस्थापयन्त्यस्य व्यस्तशीर्षकगुच्छकम्।।61।।
अथोवाच परं प्रीतः करं जाले प्रवेशयन्।
अम्ब मत्स्या मयाऽऽनीतास्त्वदर्थे बहुपेशलाः।।62।।
मत्स्यमुष्टिं ततो जालादपनीय सुपर्णकः।
बभाषे रेविकामेतानम्बायै पच सत्वरम्।।63।।
तूष्णीं मत्स्यानगृह्णात्सा करात्पत्युर्यथोदितम्।
क्षालायित्वा च तान् शीघ्रं न्यदधाच्चुल्लिकोपरि।।64।।

स मुहूर्तमथो तस्थौ करं मातुः परामृषन्।
ततस्सत्वरमुत्थाय जालमादात्सुपर्णकः।।65।।
निर्गन्तव्यं पुनः किं वा त्वया भोजनमन्तरा।
इत्यपृच्छत्पतिं रेवा बिभ्रती तस्य पादुके।।66।।
इमे खलु नवा एव विक्रेया मत्स्यकाः प्रिये।
इयाँल्लाभो न मे नित्यमित्युक्त्वा चलति स्म सः।।67।।
तावच्च जननी प्राह तुदन्ती वाक्छरैः स्नुषाम्।
नित्यलाभो भवेत्पुत्र यदि भार्या सुलक्षणा।।68।।
अथ पत्यौ स्थिते तूष्णीं प्रतिपत्तिविमूढवत्।
बभूवोद्विग्नसम्भ्रान्ता रेवा साश्रुविलोचना।।69।।
अथ तूर्णं प्रतिष्ठासुः सुपर्णः समभाषत।
अन्धकारागमात्पूर्वं वरं गच्छामि चेदिति।।70।।
इत्युक्त्वा त्वरमाणोऽसौ निर्जगाम गृहाद्बहिः।
गायन्नान्दोलिकागीतं गीतपूर्वं निजाम्बया।।71।।
अचिराद्गतवत्यस्मिन् मात्स्यिके वृत्तितत्परे।
कङ्कणानां झणत्कारः श्रूयते स्म गृहाद्बहिः।।72।।
दुर्गयाऽऽगतया भाव्यमिति रेवा व्यतर्कयत्।
सा हि तस्याः सखी बाल्यात्प्रातिवेश्या बहुप्रजा।।73।।
कुटीरं प्रविशन्त्येव दुर्गा पप्रच्छ रेविकाम्।
अयि किं नागता श्रोतुं कथामब्धितटे सखि।।74।।
द्वादशाहो व्यतीतोऽद्य बालकस्य मृतस्य ते।
त्वदागमे निषेधः क इति दुर्गावदत्पुनः।।75।।
उद्भावनमनिच्छन्ती श्वश्रूक्रोधस्य सा पुनः।
मौनं धारयितुं सख्यै संज्ञामकृत रेविका।।76।।
रेवां दुर्गाब्रवीत्कर्णे श्वश्रूभयनिपीडिताम्।
वयमद्य शिलीभूता भयानककथाश्रवात्।।77।।
वदन्त्येवं ससंरम्भा भयकम्पाकुलेव सा।
झणत्कङ्कणहस्तेन स्वकपोलं परामृशत्।।78।।
अवनम्याग्रतो रेवा प्रेक्षमाणा सखीं निजाम्।
कथाया वस्तु जिज्ञासुरपृच्छन्नेत्रसंज्ञया।।79।।
कालिकायाः कथां वृद्धो वर्णयामास भीषणाम्।
जीवन्नरबलिस्तस्यास्तोषणायेति चाब्रवीत्।।80।।

अथ तूष्णीं मुहूर्तं ते तिष्ठतः स्माङ्गने उभे।
दुर्गा तावदुपासर्पद्भित्तिदेशं कुतूहलात्।।81।।
उपेत्य फलकं भित्तौ ताम्रभाजनसंभृतम्।
अहो कियन्ति भाण्डानीत्यवोचत्सा सविस्मयम्।।82।।
सुप्रमृष्टानि पात्राणि पश्यन्ती बद्धलोचना।
द्वित्राण्यपि न मे हन्त सन्तीदृंशीत्यवोचत।।83।।
अथ तीव्रस्वरेणासौ वृद्धा चुक्रोष कोणतः।
न क्रीणीषे स्वयं कस्मात्परभाजनलोलुपे।।84।।
कथमीदृषि पात्राणि क्रीणीमहि वयं बत।
प्लवसाधनमस्माकं नास्ति भद्रे यथा हि वः।।85।।
विन्दते यावदेकाहे भाग्यवानात्मजस्तव।
सप्ताहेनापि मे भर्ता न तावल्लभते धनम्।।86।।
इत्यभाषत दुर्गासौ कृपणं मात्स्यिकाङ्गना।
क्षुधार्तबहुलापत्या प्रतिवेशनिवासिनी।।87।।
आढ्याानामपि नो दुर्गे न सुखं विद्यते क्वचित्।
इति प्रोवाच तां रेवा विहीना पुत्रसम्पदा।।88।।
अये मनाक् प्रतीक्षस्व न खलु त्वं जरां गता।
इति दुर्गाभिपश्यन्ती भाण्डं रेवामसान्त्वयत्।।89।।
रेवाथामथ मुञ्चन्त्यां तैलबिन्दून् प्रदीपके।
प्रभा दीपस्य पुष्टस्य वर्धते स्म शनैः शनैः।।90।।
बाह्यातोऽथ कुटीरस्य लघुः पादध्वनिःश्रुतः।
सहसा द्वारमुद्घाट्य प्राविशच्चार्भकद्वयम्।।91।।
बालकौ तौ हि दुर्गाया जीर्णकर्पटधारिणौ।
चषन्तौ वर्तिकाखण्डमम्बामाह्वयतां निजाम्।।92।।
आगमिष्याम्यहं तूर्णं पुरस्ताद्गच्छतं गृहान्।
इत्युच्चैर्दुर्गया प्रोक्तावपि बालौ न चेलतुः।।93।।
तद्दर्शनेन रेवाया उत्पपातेव मानसम्।
बद्धदृष्टिश्च सा बालौ व्यलोकयत सस्पृहम्।।94।।
ज्यायान् बालस्तयोर्मध्ये बभाषे शैशवार्जवात्।
अपूपं देहि नौ मातः परमावां बुभुक्षितौ।।95।।
पिधेहि मुखरं वक्त्रमनयोर्हतबालयोः।
इति चुक्रोष सा वृद्धा निर्दया निजकोणतः।।96।।

देहि नौ पिष्टकं मातरितीनिर्बन्धकारिणौ।
तस्थतुश्चालयन्तौ तौ सनादं द्वारशृङ्खलाम्।।97।।
इमौ नित्यक्षुधार्तौस्तश्चपलौ दुष्टचेष्टितौ।
अद्यैव स्नापितौ चापि संवृत्तौ मलिनौ पुनः।।98।।
अहो कथमिमौ बालौ स्थापयेयं सुनिर्मलौ।
इति दुर्गा विषीदन्ती निरास्थेव जगाद सा।।99।।
निशम्य करुणं वाक्यं रेवा द्वारमुपागमत्।
उपेत्य चार्भकौ दीनौ परं प्रेम्णा परामृशत्।।100।।
पश्य तावदिदं मातः केनाप्यावां निपातितौ।
इति जानुगतं किञ्चिद् दर्शयामासतुर्व्रणम्।।101।।
दारकौ प्रेक्षमाणायाः करुणाप्लुतचक्षुषा।
आतिथ्यस्य चिकीर्षास्य रेवाया हृदयेऽजनि।।102।।
आगच्छतमितस्तावद् दुग्धं दास्यामि वामिती।
वदन्ती बालकौ रेवा पुरः प्रासारयत्करौ।।103।।
श्रुत्वेदं जरठाऽवोचद्राक्षसीयमहो वधूः।
निपात्य या निजापत्यं परापत्यं परीप्सति।।104।।
जरतीं प्रेक्षमाणाऽथ दुर्गा प्रोवाच कोपतः।
रेवे निर्गच्छतामेतौ मा पुनस्तौ प्रवेशय।। 105।।
अपयातमितः शीघ्रं नो चेत्ताडनमाप्स्यथः।
इति निष्कास्य तौ बालौ दुर्गा द्वारेऽर्गलां ददौ।। 106।।
निसर्गमातृवात्सल्यप्रेरिता रेविकाथ तौ।
पुनरानेतुकामापि परतन्त्रा न चाशकत्।। 107।।
अथ प्रत्यागता दुर्गा भित्तिगं फलकं पुनः।
प्रशंसितुं प्रवृत्ताऽभूद् भाजनानि पृथक् पृथक्।। 108।।
अचिरादङ्गणं गत्वा रेवकि व्यापृताऽभवत्।
विचये शुष्कमत्स्यानामास्तृतानां कुथोपरि।। 109।।
साहाय्यं कर्तुकामासौ सखीं दुर्गान्वगाद्बहिः।
आकृष्टा मत्स्यगन्धेन जिघत्सुरभवद्भृशम्।। 110।।
यावद्रेचयितुं रेवा पूर्णं पूर्णं करण्डकम्।
प्रविवेश गृहं तावन्मत्स्यान् दुर्गाऽक्षिपन्मुखे।। 111।।
अथ चास्तमिते भानौ गिरयो दूरवर्तिनः।
लक्ष्यालक्ष्याः शनैर्भूत्वा विशन्ति स्म नभस्तलम्।। 112।।

व्यलम्बन्ताम्बुधेस्तीरे स्त्रियो बन्धुप्रतीक्षया।
काश्चिज्जालानि बध्नन्त्यः पाययन्त्यः शिशून् पराः।। 113।।
करण्डकेऽन्तिमे पूर्णे दुर्गावोचत्सखीं निजाम्।
एहि तावत्कुटीरं मे मा शुचः शुभमाप्स्यसि।। 114।।
दोलायितमना दृष्टिं चारयन्ती गवाक्षतः।
रेवा ददर्श संसुप्तामन्तः श्वश्रूमनाकुला।। 115।।
श्रूयते स्म तदोच्चण्डं वृद्धाया घर्घरायितम्।
मरुतस्येव शूत्कारो वेणुकान्तारमध्यतः।। 116।।
क्षणमेकं विचिन्त्याथ रेवा विश्वासमागता।
द्वारं बद्ध्वा ततः शीघ्रं सह सख्या विनिर्ययौ।। 117।।
उभौ यावदुपायातामचिरेण गृहान्तिकम्।
तावत्सानन्दवाचालौ बालकावभ्यधावताम्।। 118।।
अथ दुर्गाऽऽह पश्यन्ती खादन्तौ तिन्त्रिणीफलम्।
पश्योदरम्भरी एतौ बालौ दुर्ललितौ सखि।। 119।।
अखाद्यमनयोः किञ्चिद्रेविके नहि विद्यते।
इति दुर्गा वदन्ती सा गृहद्वारमपावृणेत्।। 120।।
गेहमासील्लघीयस्तद्रेविकायाः कुटीरतः।
मध्ये यदीयकोष्ठस्य शिशुदोला स्थिताऽभवत्।। 121।।
तस्यां वसनदोलायामशेतैकः स्तनन्धयः।
चालयंश्चरणौ नित्यमाचूषंश्च कराङ्गुलिम्।। 122।।
क्रीडन्ती दारिका चैका पेषण्या भूतले स्थिता।
बिभ्रती च करेऽपूपं मक्षिकावलिसंवृतम्।। 123।।
यावच्चादीपयद्दुर्गा दीपं तावदुपाविशत्।
दारिकापार्श्वतो रेवा चुम्बन्ती तां पुनः पुनः।। 124।।
दृष्टिदोषनिरासाय न किं निक्षिपसेऽञ्जनम्।
अर्भकाणां ललाटे च कपोले चापि लोचने।। 125।।
इति पप्रच्छ रेवा तां स्ववयस्यां कुतूहलात्।
धारयन्ती निजोत्सङ्गे लालयन्ती च बालिकाम्।। 126।।
न करोमीदृगाचारं तथाप्येतेऽर्भकाः स्वयम्।
वर्धन्त इति तां दुर्गा साभिमानमिवाब्रवीत्।। 127।।
आजन्मनोऽर्भकैर्दिष्ट्याा व्याधिनामापि न श्रुतम्।
इति भूयस्तया प्रोक्ते रेवाऽभूद्दुर्मना इव।। 128।।

ईर्ष्यया भृशदग्धा सा नितान्तव्यथिताऽभवत्।
स्मरन्ती स्वार्भकान्नष्टान् यत्नतः पोषितानपि।। 129।।
विविधानुपचारांश्च तत्कृते विहितांस्त्वया।
जागरांश्च दिवारात्रं दैवान्निष्फलतां गतान्।। 130।।
अथ दुर्गाऽब्रवीद्भूयो महार्घत्वेऽपि वस्तुनः।
क्रीणाम्येव यथाशक्यं बालेभ्यो भोज्यसञ्चयम्।। 131।।
बालामेवाभिपश्यन्ती शून्यदृष्ट्या भृशाकुला।
ध्यायन्ती च स्वदुर्दैवं तस्थौ रेवा निरुत्तरा।। 132।।
आणकद्वयमूल्येन कथञ्चित्क्रीयते मया।
बालापत्यकृते दुग्धमिती दुर्गा न्येवदयत्।। 133।।
रेवा बालां समालिङ्ग्य प्राह दास्यामि तेऽन्वहम्।
पात्रपूर्णं नवं दुग्धमस्ति नः पुष्कलं गृहे।। 134।।
यदि ज्ञास्यति सा दैवाद् वृद्धा क्रुद्धा न किं भवेत्।
पृच्छन्त्येवमसौ दुर्गा प्राचलच्चुल्लिकां प्रति।। 135।।
उदयात्त्रिघटीपूर्वं न मे श्वश्रूः प्रबुध्यते।
तावच्चाहं दुहे धेनूरित्यभाषत रेविका।। 136।।
तदौदार्यवशीभूता दुर्गालिङ्ग्याब्रवीत्सखीम्।
बाढं रेवे पयो नेतुमागमिष्यामि ते गृहम्।। 137।।
धिग्ग्रामीणजनान् रेवे ये त्वामाहूरमङ्गलाम्।
अवजानन्ति नित्यं च सुशीलां मन्दबुद्धयः।। 138।।
अमङ्गलेति साम्रेडं जल्पन्ती रेवकि वचः।
मुहूर्तं चिन्तयार्तापि न्यग्रहीच्चित्तमात्मनः।। 139।।
गच्छन्तौ रेवया सार्धं गृहावर्तमानया।
व्यलम्बेतां शिशू सख्या मोदकापणसंनिधौ।। 140।।
बालौ तदेव पश्यन्तौ भक्ष्यजातं बुभुक्षितौ।
दृष्ट्वा सकरुणा रेवा सान्त्वयन्ती जगादतौ।। 141।।
हे बालौ युवयोरर्थे करिष्ये मोदकानहम्।
प्रातश्च तान् प्रहेष्यामि युवयोर्मातृहस्ततः।। 142।।
ह्रेपिताविव तूष्णीं तौ क्षणमास्तां नताननौ।
ततः प्रचेलतुर्यावद्रेवाया गृहमापतुः।। 143।।
द्वारस्य श्रुङ्खलायां सा करं विन्यस्य रेविका।
प्रातरायातु माता वामित्युवाच मृदुस्वरा।। 144।।

अथ रात्रौ व्यतीतायां सुपर्णः प्रेरिताऽम्बया।
पुनर्विवाहमुद्दिश्य रेवया सार्धमालपत्।। 145।।
साश्रुनेत्रा सकम्पा च पतिं पप्रच्छ रेविका।
अपि त्वं मयि न प्रीतो यदन्यां वोढुमिच्छसि।। 146।।
सुपर्णोऽथ स्खलद्वाचा प्राहाम्बा पौत्रमिच्छति।
स्थास्यसि त्वं तु गेहेऽस्मिन् प्रधाना गृहिणी प्रिये।। 147।।
ननु त्वमपि खेलन्तं गृहे बालं दिदृक्षसे।
तेनाप्स्यावः परं सौख्यमिती भार्यामसान्त्वयत्।। 148।।
मृतेरस्मदपत्यानामहमेवास्मि कारणम्।
इति त्वमपि किं नाथ मन्यसे ब्रूहि तत्त्वतः।। 149।।
इति सा कम्पमानाङ्गी सबाष्पा गद्गदाक्षरा।
स्फुरदोष्ठा च पप्रच्छ परावृत्तकृशानना।। 150।।
स चाह तामिदं वक्तुं दैविकं कोऽहि शक्नुयात्।
मनाक् प्रतीक्षणं तस्मादितोऽपि करवावहै।। 151।।
संपीड्योष्ठपुटौ क्रोधात्तदावेगं निगृह्णती।
रेवा पप्रच्छ भर्तारं कदा त्वं वोढुमिच्छसि।। 152।।
यदि नौ भाविसन्तानस्तरिष्यति भयावधिम्।
पुनर्नोद्वाहयिष्येऽहमिति वाचमदात्पतिः।। 153।।
विसृज्याथ तदालापं स तुच्छं विषयं यथा।
कटे निपतितस्तूर्णं निद्रयापहृतोऽभवत्।। 154।।
निशान्तेऽनन्दयल्लोकं प्रशान्तिः सर्वतोमुखी।
दीपाश्च शून्यमार्गेषु क्षीयन्ते स्म शनैः शनैः।। 155।।
पुरुषाकारधारिण्याश्छायाश्चित्रविचित्रकाः।
मरुद्विधूततालानामधोऽनृत्यन्नटा इव।। 156।।
चिन्ताप्रचण्डवातेन क्षिप्यमाणाऽथ रेविका।
गवाक्षस्यान्तिके तस्थौ पश्यन्तीव गृहाद्बहिः।। 157।।
अहो कियन्ति सोढानि सङ्कटानि मया बत
न तुष्यति तथाप्येतद्दैवं धिगिती साऽशुचत्।। 158।।
सहमानैव कष्टानि वृद्धायाच्छलितानि च।
शुभमाशंसमानाऽग्रे दिवसानत्यवाहयत्।। 159।।
नानास्मृतिमहावर्तभ्रमदाकुलमानसा।
श्वश्रूद्वेषजमुद्देश्यं सानुबन्धमचिन्तयत्।। 160।।

उद्वहेद्यदि भूयोऽपि स्त्रियमन्यां सुपर्णकः।
स्थातव्यं हि मया नित्यं दास्येव परतन्त्रया।। 161।।
चिन्तयन्त्यपमानं सा सपत्नीजनहेतुकम्।
आपादमस्तकं रेवा चकम्पे विकृतानना।। 162।।
अपि नाम कदाप्यस्माद् भवेत्कष्टाद्विमोचनम्।
इति साऽऽशंसमानापि निराशाभवदन्ततः।। 163।।
अथ साऽद्भुतमाख्यानं कालिकायाः सुदारुणम्।
नरोपहारतः प्रीतिं तस्याश्च समचिन्तयत्।। 164।।
एवमाध्यानतो भूयो नैराश्यहतचेतसः।
संजज्ञे हृदये तस्याः संकल्पी बत दारुणः।। 165।।
कालिका यदि संप्रीता भवेन्मानवयज्ञतः।
न किं मे भाविसन्तानं कुर्यात्सा चिरजीविनम्।। 166।।
कथन्नु घोरयज्ञेऽस्मिन् बल्यर्थे प्राप्नुयां नरम्।
इति चिन्तयमानायाः सखीपुत्रौ स्मृतीं गतौ।। 167।।
ताभ्यां प्रेषयितुं भक्ष्यं मया प्रागेव संश्रुतम्।
अथ किं दुष्करं हन्त स्वमनोरथसिद्धये।। 168।।
सुलभा सर्वथा सेयं धत्तूररसयोगतः।
इति निश्चयमापन्ना जगामाग्रिमकोष्ठकम्।। 169।।
कम्पमानकरा रेवा दीपयामास चुल्लिकाम्।
विचेतुमथ धत्तूरं प्राङ्गणं निभृतं ययौ।। 170।।
चिराय कुर्वती भक्ष्यं धत्तूररसमिश्रितम्।
परिश्रान्ताऽन्तिमे यामे किलिञ्जे शायिताऽभवत्।। 171।।
नवदुग्धकृते सख्या ध्यायन्ती प्रातरागमम्।
चिन्तावात्याभिराधूता रात्रिशेशमजागरीत्।। 172।।
अथ सूर्योदयात्पूर्वं सुपर्णो निजवृत्तये।
जालयष्टी समादाय निर्जगाम कुटीरतः।। 173।।
सुप्तायामेव वृद्धायां श्वसन्त्यां च सघर्घरम्।
समाप्तदोहना रेवा सख्यै दुग्धं न्यधात्पृथक्।। 174।।
अर्धयामं प्रतीक्ष्याथ सखीं रेवाङ्गणे स्थिता।
तदागमस्य चिह्नं तु नाभवतद्दृष्टिगोचरे।। 175।।
अथ सा घोरसंकल्पैस्तथात्यन्तवशीकृता।
यथा भक्ष्यं च दुग्धं च स्वयमेव निनाय ताम्।। 176।।

तस्याः संप्राप्तमात्रायाः सखीमन्दिरसंनिधिम्।
मर्मभित्करुणाक्रन्दो हठात्कर्णपंथ गतः।। 177।।
नितान्तकम्पमानाङ्गी कथमप्यथ रेविका।
कर्षन्तीव निजात्मनं द्वारभूमिं शनैरगाात्।। 178।।
देहलीं प्राप्तमात्रैव दुर्गामन्तर्ददर्श सा।
क्रन्दन्तीं गाढमालिङ्ग्य वक्षसा ज्येष्ठमर्भकम्।। 179।।
तस्याः पतिश्च जानुभ्यामानतोऽन्यशिशूपरि।
दुर्दैवमात्मनो निन्दन्नतिष्ठद् बाष्पदूषितः।। 180।।
वर्तते स्म च दोलायां सुखसुप्तः स्तनंधयः।
तदग्रजाऽन्यतः स्तब्धा तस्थौ वृत्तमजानती।। 181।।
रूढमूलेव तिष्ठन्ती रेविका बद्धलोचना।
अपृच्छदिव वृत्तान्तं सखीमवचनापि सा।। 182।।
गतो मे बालको रेवे प्रथमः सकलोत्तमः।
मृत्यून्मुखश्च हा हन्त कनीयानपि वर्तते।। 183।।
अहो मे मन्दभागिन्याः पुत्रशोकोऽयमागतः।
को वार्थोऽद्य मम प्राणैर्दुर्गतिं सखि पश्य मे।। 184।।
दुःखार्तामिती शोचन्तीं दुर्गामालोक्य रेविका।
यतमानापि तां वक्तुं सर्वथा न शशाक सा।। 185।।
ग्रस्तावुभौ महामार्या बालकौ मम वत्सलौ।
किं पापं मन्दभागिन्या कृतं निर्घृण हा विधे।। 186।।
इति दुर्गानुशोचन्ती ताडयन्ती स्वमस्तकम्।
अपाटयत्समुद्वेगादात्मनः केशपाशकम्।। 187।।
रेवा तामभिपश्यन्ती शिलीभूतेव संस्थिता।
इतिकर्तव्यतामूढा पापसंकल्पदूषिता।। 188।।
त्वमेव घातुकी नूनं बालयोरनयोरिती।
अन्तरात्मा समुद्भ्रान्तां क्षिपति स्म पुनः पुनः।। 189।।
वर्तमानमपश्यन्ती लुप्तभूतार्थसंस्मृतिः।
आशुनश्यद्विवेका च स्थिता सा दैवविप्लुता।। 190।।
तत्करादवसन्नाच्च न्यपतद्दुग्धभाजनम्।
विकिरत्सर्वतो भूमौ तदन्तस्स्थं नवं पयः।। 191।।
पृष्ठतः साऽवसीदन्ती सहसाक्रन्द्य कर्कशम्।
अतिवेगात्ततो रेवा निश्चकाम गृहाद्बहिः।। 192।।

अथान्धेव समुद्रस्य तीरं सा प्रपलायत।
रुदती च हसन्ती च पर्यायेण मुहुर्मुहुः।। 193।।
प्लवस्थैर्जालिकैर्दूराच्छ्रुतकोलाहलैश्चिरम्।
यत्नेन वीक्षमाणापि नाभिजज्ञे स्वरूपतः।। 194।।
आदिनान्तं बत भ्रान्त्वा निशायां गृहमागमत्।
रूपान्तरमुपायाता योषिदन्येव कापि सा।। 195।।

पुष्पिका–कुलीनापि करोत्येव साहसं परिहिंसिता।।

इति क्षमायाः कृतिषु लोकवृताख्यानमालायां कथापञ्चके असूयिन्याख्याकथा पञ्चमी समाप्ता।।

कथासारांशः–

रेविका नाम काचिन्निरपत्यासीत् मत्स्यजीविनः पत्नी। तस्याः मुखावलोकनमप्यशुभमिति वदन्ति स्म जनाः। सततं तामभिशपन्ती तस्याः श्वश्रूः गृहस्य कोणे शेते स्म। तस्या अपत्यनि न जीवन्तीत्यत्र को दोषः तस्याः। तथापि वृद्धाया अभिशापान् श्रावं श्रावं सा विषण्णाऽभवत्। कथाश्रवणे तस्याः रुच्यासीत्। तत्रापितान्त्रिकस्य भूतपिशाचानामतिभयङ्कराः कथाः श्रोतुमुत्सुका सा कथाश्रवणार्थं गच्छति स्म।

तस्याः दुर्गा नाम सख्यासीत्। अतीवदारिद्रयेण पीडिता सा स्वापत्येभ्यः दुग्धमपि दातुमसमर्था। रेविकायाः पतिः सुपर्णः धनाढयः मात्स्यिकः। अतः निरपत्या रेविका दुर्गायाः पुत्राभ्यां दुग्धादिकं दत्वा परितोषयति स्म। यदा सुपर्णः मातुराज्ञया पुनर्विवाहविषये रेविकया सह समभाषत तदान्यस्त्रिदास्यभावेन साकम्पत। श्वश्रोः वाक्ताडनेन पत्युश्च पुनर्विवाहसङकल्पेन च दुःखिता रेविका दुर्गायाः मुखाच्छ्रुतां नरयज्ञेन कालिप्रसादनस्य कथामस्मरत्। अनुक्षणं तस्याः अक्ष्णोः पुरतः दुर्गायाः पुत्रावगतौ। प्रातः नवं दुग्धं पाययामीति उक्तमासीत्तया। प्रातः तस्मिन् दुग्धे धत्तूररसं संमिश्य दुर्गायाः गृहमगच्छत्सा।

दुर्गायाः करुणाक्रन्दनं श्रुत्वा रेविका विस्मिता स्तम्भिताचाभवत्। दुर्गायाः ज्येष्ठपुत्रस्तु महामार्या मृतः। अनुजश्चापि मरणोन्मुख आसीत्। हस्तस्थं दुग्धपात्रं प्रक्षिप्याहमेवास्याः पुत्रयो घातकर्त्रीति मत्वा रुदती हसन्ती च समुद्रतीरं वेगेनाधावत्। एतेन प्रसङगेण त्तस्योन्मादः सूचितः।

कथासमीक्ष्णम्–

ग्रामज्योतिरिति कथासङ्ग्रहवदत्रापि कथातात्पर्यं वक्तुं सुभाषितानां प्रयोगः क्षमादेव्या कृतः। ग्रामज्योतिरिति कथासङ्ग्रहस्थाः कथाः सुभाषितेन आरभन्ते। अत्र कथान्ते वर्तते सुभाषितम्। यथा बालिकोद्वाहसङ्कटमित्यस्याः कथाया अन्ते वर्तते सुभाषितमिदम् 'द्वेषेऽपि भ्राजते प्रेम'।

द्वितीयकथा गिरिजायाः प्रतिज्ञा। अत्र सुभाषितं वर्तते – क्लिष्टस्यापि सुजातस्य सौन्दर्यं नापयास्यति। गिरिजा एका गतभर्तृका मध्यमवयस्का स्त्री। पुत्रवधदुःखेन शोकविह्वला पुत्रहन्तारं प्रति प्रतिशोधेनानुदिनपरितप्ताऽपि सा तं रक्षति कारागृहरक्षकेभ्यः। गिरिजायाः स्वभाववैशिष्ट्यमेतेन सुभाषितेन सुस्पष्टं जातम्।

तृतीया कथा हरिसिंहः। अत्र सुभाषितमास्ति–'लोकसेवाप्रसक्तानां जगदेव कुटुम्बकम्।' हरिसिंहः सदैव सर्वेषां साहाय्यार्थं सिद्धः। अत्याचारिणः मानसिंहस्य वधोपयं चिन्तयता तेन मित्राणां साहाय्येनैका योजना निर्मिता। सः मानसिंहः तस्य पितेति ज्ञात्वापि लोकरक्षणाय न विरमति निश्चितार्थात्। हरिसिंहस्य विषये यथार्थमिदं सुभाषितम्।

चतुर्थी कथा दन्तकेयूरम्। 'मद्यपस्य करे रत्नं न चिरायावतिष्ठते। अत्र गणुर्नाम कश्चन मद्यपः मात्स्यिकः। तेन वंशरंपगतं दन्तकेयूरं स्वपत्न्यै दत्तमासीत्। होलिकोत्सवनिमित्तेन रङ्गुर्नाम कुसीदस्य गृहं द्यूतक्रीडार्थं मद्यपानार्थञ्चगच्छत्। तस्य हस्ते पल्न्यः दन्तकेयूरं दृष्ट्वा स्वपत्नीं व्याभिचारिणीं मत्वा क्रोधावेशेन मद्यपानेनोमत्तेन तेन भृशं ताडितासा। कथान्ते बालेन कृतरहस्योद्घाटनेन पश्चात्तापदग्धो भवति गणुः। तया तस्य नूतनोष्णीषक्रयणाय विक्रीतमासीत्तद्दन्तकेयूरम्। कालेन कवलिता पत्नी न पुनरायाता। इति दुःखान्तेन साधितः कथाप्रभावः सुभाषितेन अत्यन्तप्रभावशाल्यभवत्।

पञ्चमीकथा असूनयिनी। कुलीनापि करोत्येव साहसं परिहिंसिता। निरपत्या रेविका श्वश्रूकृतवाक्ताडनेन पत्युश्च पुनर्विवाहसङ्कल्पेन व्याकुलीभूय पुत्रप्राप्यत्यर्थं बालहननार्थमुद्युक्ता भवति। अत एव वदति कथालेखिका एतेन सुभाषितेन सततं पीडिता कुलीनापि स्त्री घोरं कर्म कर्तुमुद्यता भवति । सर्वासां कथानामन्ते पुष्पिकायां सुभाषितं वर्तते। इति क्षमायाः कृतिषु लोकवृत्ताख्यानमालायां

कथापञ्चके बालिकोद्‌वाहसङ्कटं नाम प्रथमा कथा समाप्ता। एतेन कथाबीजरुपेण क्षमादेव्या लोकवृत्तं स्वीकृतमिति ज्ञायते।

सामाजिकसमस्यानां चिन्तनं विमर्शश्च दृश्यते कथास्वेतासु। समाजे विधवानां दयनीया स्थिति वर्णिता प्रथमकथायाम्। बालविवाहस्य प्रथासीतदा। अत एव कथारम्भे लेखिकया स्पष्टीकृतमेतद्यद्– 'बाल्योद्‌वाहनिरोधकात् शारदाविधानात्प्राक् पार्वत्याः विवाहः जात इति। समस्यामेतां परिलक्ष्य शारदा नाम मराठीभाषया रचितं नाटकमासीदेकम्। नाटकस्य प्रसिद्धिं समाजे प्रभावञ्च दृष्ट्वा यदा बालविवाहरोधकविधानमागतं तदा तच्छारदाविधानेति नाम्ना प्रसिद्धिंगतम्।

दन्तकेयूरमित्यस्यां कथायां मद्यपानस्यं अतिघोरः परिणामः दर्शितः। तदानींतन होलिकोत्सवस्य स्वरूपमपिज्ञायते अनया कथया। द्यूतक्रीडायाः स्वरूपं मद्यपानोन्मत्तजनानां निरर्गलभाषणम् कुसीदस्य वर्णनं क्रियतेऽस्यां कथायाम्।

असूनयिनीत्येत्तस्यां कथायां निरपत्यस्त्रीणां समाजे कीदृशी स्थितिरासीदिति ज्ञायते। गिरिजायाः प्रतिज्ञा हरिसिंहश्चैते द्वेऽपि स्वतन्त्रातान्दोलनस्य प्रभावेण प्रभाविते कथे। ग्रामज्योतिर्वन्न सर्वाः कथाः स्त्रीप्रधानाः। परं स्त्रीणां सामाजिकी स्थितिरेव सर्वासु कथासु वर्णितेति पश्यामः।

सर्वास्वेव कथासु आधुनिकलघुकथातन्त्रं प्रयुक्तम्। यथाः गिरिजायाः प्रतिज्ञा इत्येतस्यां कथायां त्रिण्येव प्रमुखपात्राणि गिरिजा, कारागृहात्पयितः बन्दी, तमन्वेष्टुमागतः ग्रामप्रमुखश्च। एक एव प्रसङ्गः। शरणार्थमागतस्य बन्दिनः गिरिजाया कृतं गोपनम् तस्य मुक्तिश्च। पुत्रहतकस्य प्रतिशोधार्थं गिरिजाकृतप्रतिज्ञया कथारभते। एकाकिनी गतभर्तृका दारिद्रयपीडिता वृद्धा च गिरिजा कथं कुर्यात्प्रतिज्ञापूर्तिम्? इत्यनेन प्रश्नेनोत्कण्ठा वर्धते। कारागृहात्पलायितं बन्दिनं गृहस्य पार्श्वे स्थितस्य कूपे निगूहनं तस्यान्वेषणार्थं ग्रामप्रमुखेण सह आगतै रक्षकैः कृतान्वेषणं गमनसमये 'एष एव ते पुत्रस्य हन्ता' वाक्यमेतदुत्कण्ठायाः परमोत्कर्षः। गिरिजायाः प्रतिज्ञायाः किम् भवेदिति प्रश्नः उद्‌गच्छति मनसि। अनायासेन भवेत्तस्याः प्रतिज्ञापूर्तिः। परं कथान्तेऽद्‌भुतयोजनमितिनियमानुसारं करुणार्द्रहृदया गिरिजा बन्दिनः

दीनवचनानि श्रुत्वा विस्मरति पुत्रवधस्य दुःखं प्रतिज्ञाञ्च। एवं सर्वासु कथासु प्रयुक्तमिदं तन्त्रम्।

चरित्रचित्रणम् –

पार्वती – वालिकोद्वाहसङ्कटमितस्याः कथायाः नायिका पार्वती बालविधवासीत् । तस्याः स्थितिदर्शकः प्रथमःश्लोकः

बभूव पार्वती नाम कुलीना गतभर्तृका।
दासकर्म प्रकुर्वाणा देवरस्य निकेतने।।1.1

आबाल्यात्तया बन्धुजनानां दुर्वचनानिन्येव श्रुतान्यासन्। अनिशं गृहकार्यव्यापृता सा स्वप्नेऽपि क्रुद्धान् बन्धुजनान् पश्यति स्म। केशपाशहीनाऽपि सा निसर्गदत्तसौन्दर्येण यौवनेन च सर्वेषां चित्तापहारिकासीत्। तस्याः सौन्दर्यस्य वर्णनं कृतं लेखिकया–

श्वेतवासा सुशीषा सा सुकुमारा च मोहिनी।
येशुक्रिस्तस्य मातेव विरेजे मधुराकृतिः।।1.12

तस्याः जीवने कश्चितरुणः प्रविशति। तस्याः संपूर्ण जीवनं परिवर्तितं तेन। तेन सह पलायनस्य धैर्यं कुर्वती पार्वती यदा तयोर्विवाह अशक्य इति जानाति तदा सा बहिष्काराद्बिभेति। बन्धुजनानां भयं तस्याः मनसि सततं वर्तते एव। तस्याः एतादृशी स्थितिरस्मिन् श्लोके आलिखिता।

मैवं मैवं न शक्यं तत्परतन्त्रास्मि बन्धुभिः।
इति नम्रमुखी प्राह बाष्पगद्गदिताक्षरा।।1.67

देवरस्य शिशुरेव मम आनन्दस्यायतनामिति मत्वा गृहं प्रत्यागता सा गृहाद्बहिर्निष्कासिता। एवं दीनदीनायाः पार्वत्याः चरित्राचित्रणं कृत्वा क्षमादेव्या तत्कालीनां विधवानां दीनावस्था वर्णिता।

गिरिजा –

गिरिजा काचिग्दतभर्तृका वृद्धा। पुण्यपुरस्य पल्ल्यन्ते कुटीरे न्यवसत्सा। प्रथमश्लोके एव क्षमादेव्या तस्याः स्थितिर्वणिता।

उवास गिरिजा नाम वृद्धा काचित्कुलाङ्गना।
कस्मिंश्चिदुटजे पूर्वं गिरिकन्दरसंश्रया।।2.1

कथारम्भे एव गिरिजायाः अवस्था, तस्याः निवासस्थानं गृहदशा च वर्णिता। यौवने एव वैधव्यक्लेशा अनुभूताः तया। पुत्रवधेन तस्याः शोकस्य परिसीमा जाता। पुत्रवधदुःखेन सततं व्याकुलिता सा पुत्रहतकस्य प्रतिशोधार्थं दृढामेकां प्रतिज्ञामकरोत्। तस्याः प्रतिज्ञायाः सिध्यर्थं विंशतिवर्षाण्यतीतानि। परं निराशया न ग्रस्ता सा।

प्रतिज्ञासिद्धिमीप्सन्त्या वैरनिर्यातनं प्रति।
शोकावेगमयी तस्या आसीत्सहया हि दुःस्थिती।।2.13
तस्याः सौष्ठवं चापल्यं कार्यञ्च श्लोकद्वयेनोक्तम्।
मध्यं वयो व्यतीतापि चटुलङ्गी पटीयसी।
अतिशेते स्म चापल्यं तरुण्या अपि सानिशम्।।
उन्नता स्त्यानदीर्घा च नताङ्गी वेतसोपमा।
कृशहस्तापि कार्येषु कृतहस्ता बभूव सा।।2.14,15

दन्तुरायाः तस्या मुखं किश्चित्विवृतमासीत्। एकाकिनी सा दुःखातिरेकेणापि न नित्यमुदासीना। कोकिलेव प्रगायन्ती, गायन्ती दोलिकागीतिं मधुरामन्तरान्तरा। अशेषमेव विस्मृत्य परिहृष्टा व्यवाहरत्। (2.23)तस्याः मनस्थितिद्योतकान्येतानि वाक्यनि विशेषणानि च।

एकदा सहसा कोऽपि कारागृहात्पलायितः सशृङ्खलः बन्दी तस्या कुटीरं शरणार्थमागतः। तस्यावस्थां दृष्ट्वा कारालयस्थां स्थितिञ्च श्रुत्वा दयाविष्टा भूत्वा च सा तं गृहपार्श्वस्य कूपस्य कोटरे निगूहति। बन्दिनोऽन्वेषणार्थमागतैः रक्षकैः सह ग्रामणीरप्यासीत्। स गिरिजामवदत्

न तस्य दयसे भद्रे तत्कर्म यदि वेत्स्यति।
स ते पुत्रस्य हन्तेति ग्रामणीस्तामवेदयत्।।2.88

श्रुत्वा तस्यैतद्वचनं गिरिजा अशनिविद्धेव स्थिता। इदानीं तस्याः मनसि प्रारब्धमान्तर्द्वन्द्वम्। एतावन्ति वर्षाणि यस्य प्रतीक्षा कृता स समयरुपस्थितोऽद्य। तस्या इदमान्तर्द्वन्द्वं क्षमादेव्या सुष्ठु चित्रितम्। बन्दिनः मृत्युस्त्वेदानीं निश्चितः।

कुपिकामुपसर्पन्ती मुष्टिमाबध्य निश्चयात्।
सञ्जातहृदयसोत्कम्पा शुष्ककण्ठि विषादतः।।2.102
आवेगनिग्रहायासाज्जातसर्वाङ्गवेपाथुः।
आर्ता कासप्रकोपेन दुर्निवारेण साऽभवत्।।2.103

एतेन वर्णनेन तस्य बन्दिनं प्रति दृढनिश्चयः सूचितः। 'मया तेपुत्रः हतः परं नैषः बुद्धिकृतवधः। केवलं चापल्यादुद्भूते द्वन्द्वे दैवयोगात्स हतः। इति तस्माच्छ्रुत्वा सा किंकर्तव्यमूढा जाता। वृद्धदीनपङ्गूनिर्धनमाताऽस्ति मे गृहे इति यदा तेनोक्तं तदा सर्वं विस्मृत्य तस्य साहाय्यमाचरितम्। तस्य मातुस्स्थितिं श्रुत्वा करुणार्द्रमनसा तया सर्वं भूतवृत्तान्तं स्वक्लेशांश्च विस्मृत्य तस्य साहाय्यमाचरितम्।

गिरीजायारान्तर्द्वन्द्वमित्येवास्याः कथायाः महत्त्वपूर्णं वैशिष्ट्यम्। पुत्रवधेनागतं कठोरत्वं नैसर्गिकी च करुणार्द्रता गिरिजायाः चरित्रचित्रणे सम्यगालिखिता क्षमादेव्या। कथान्तेऽऽगतं सुभाषितमपि तदेव सूचयति क्लिष्टस्यापि सुजातस्य सौजन्यं नापयास्यतीति।

<u>हरिसिंह –</u>

हरिसिंहः सौराष्ट्रदेशान्तः कमलापुरपार्श्वतः कस्यचिदनतिख्यातग्रामस्य निवासी। सर्वत्र दारिद्रयस्य साम्राज्यं दरीदृश्यतेऽस्मिन् ग्रामे। हरिसिंहः दीनानां साहाय्यार्थं तत्परः। तत्र मानसिंहः नाम क्रूरः निर्दयः प्रजापालने रक्षणे चादक्षः राजासीत्। तस्मिन् ग्रामे दीनजनानुकम्पिषु सत्पुरुषेषु हरिसिंहः एकः।

तेषामेकतमस्त्वासीद्युवा कश्चिद्दयापरः।
उन्नतो हरिसिंहाख्या मनस्वी प्रतिभान्वितः।।3.8

हरिसिंहः बुभुक्षया रुदद्बालकस्याश्रूणि प्रमृज्य तमपूपादिकं दत्वा लालयति स्म। शीतेन वेपमानां स्थविरां वस्त्राणि दत्वा, क्षुधार्तशिशवे दुग्धं दातुमसमर्थां स्त्रियं स्वगृहे शरणं दत्वाच सः सर्वान् तोषयितुं प्रयतते स्म। दुष्टराज्ञः रथस्याधः निष्पीडतं बालकं रक्षति हरिसिंह। मानसिंहस्य क्रौर्यं दुर्जनताञ्च दृष्ट्वा हरिसिंहः क्रोधेनातपत्। चतुर्भिर्मित्रैः सह मानसिंहस्य वधस्य योजना तने कृता। तदर्थं प्रहारगुलिका अन्वेष्टुं गतेन तेनैका पेटिका दृष्टा। तस्यां पेटिकायां स्वसदृशं चित्रं दृष्ट्वा विस्मितेन तेन यदा नृपतेर्नाम जनन्यै लिखितानि पत्राणि च दृष्टानि तदा स विवर्णः स्तम्भितश्च जातः। मात्रा कथितं वृत्तमपि तेन श्रुतम्। पितृहत्या कथं कार्येति आन्तर्द्वन्द्वं प्राचलत्तस्य मनसि–

पितृहत्या महत्पापंमिति घोषयतो गुरोः।
धर्मोक्तिः श्रोत्रयोरन्तः प्रतिध्वनिमिवाकरोत।।3.172

वधोऽयं प्रजानां हितायेति निश्चित्य गुलिकाप्रहारेण हतः मानसिंहः। अत एव कथान्ते उक्तम् – 'लोकसेवाप्रसक्तानां जगदेव कुटुम्बकम्।

गणु :–

गणुरेकः मत्स्याजीवी। सः राधिका नामभार्यया पुत्रेण सह पारेतालीवनं पल्ल्यां निवसति स्म। होलिकोत्सवनिमित्तेन द्यूतक्रीडार्थं मद्यपानार्थञ्च ग्राममण्डपं गन्तुमुद्युक्त आसीत्सः। जीर्णमुष्णीषं धृत्वा धनिकेषूपहास्यतां गच्छामीत्याशङ्कया स गन्तुं नोद्युक्तः। परं राधिका

मधुरैर्वचनैस्तंमसान्त्वयत्। वंशपरम्परागतं दन्तकेयूरं तेन पत्न्यै दत्तमासीत्।

गणुः मात्सिकमण्डलेषु द्यूते रममाणानां मद्यपानेनोन्मत्तवज्जल्पतां मनुजानां प्रतिनिधित्वं करोति। दारिद्रये जीवनयापनेन धनलालसा मद्यपानेन निरर्गलमर्वाच्यवचनम् तेन परिवृद्धः कोपः संशयः अविवेकश्चैतेषां भावानां मिश्रणं दृश्यते गणौ।

रङ्गुरिति कश्चित्कुसीदकस्य गृहे प्राचलदेषा द्यूतक्रीडा तस्य हस्ते पत्न्याः दन्तकेयूरं दृष्ट्वा पत्त्याः विषये तन्मुखान्निरर्गलवचनानि श्रुत्वा संशयग्रस्तः मद्योन्मत्तश्च गणुः गृहमागत्य भृशं ताडयति स्वपत्नीं। घोरेण ताडनेन सा भूमौ पतति। मद्यपानेनोन्मतस्य गणोः वर्णनं कृतं क्षमादेव्या –

अथो गृहाङ्गणं प्राप्य द्वारदेशे स्खलत्पदः।
आत्मानमतियत्नेन ररक्ष पतनाद्भुवि।।4.97
क्रोधेन विकृताकारं मुखमस्यावलोक्य सा।
मद्यपानेन मत्तोऽयमिति स्पष्टमतर्कयत्।।4.103

तस्य नूतनोष्णीषक्रयणार्थमेव राधिकया दन्तकेयूरं विक्रीतमासीदिति पुत्रेण रहस्योद्घाटनं यदा कृतं तदा पश्चात्तापदग्धः गणुः करुणं व्यलपत्। राधिकासदृशरत्नं मद्यपस्य तस्य हस्ताच्च्युतम्।

<u>रेविका –</u>

रेविका सुपर्णनामाख्यस्य मात्सिकस्य पत्नी। निरपत्यतायाः दुःखमनुभवन्त्यैषा उदासीना कथञ्चित् मनोधैर्यमररक्षत् । तस्या अपत्यानि न जीवन्तीत्यत्र को दोषः तस्याः। परं श्वश्रूः सततमुपालम्भेन तां पीडयतिस्म। तथापि शान्तस्वभावा सा सर्वमसहत्।

बहुशः श्रुतपूर्वत्वाद्भर्त्सनानां किलेदृशाम्।
मौनमालम्ब्य तिष्ठन्तीं वृद्धोवाच पुनः स्नुषाम्।।5.17

यदा सा पुत्रस्य कृतेऽन्यां शुभां वधूमन्विष्यामीति वदति तदा दीनदीना रेविका तामब्रवीत्

अपत्येषु विनष्टेषु ब्रूहि दोषोऽम्ब को हि मे।
ज्ञात्वापि किं दुनोषि त्वं वृथा मां मन्दभागिनीम्।।5.27

मम पतिरेव ममाधार इति मत्वा सा सर्वं सहते स्म। परं यदा तस्य पतिरपि मात्राज्ञया द्वितीयविवाहार्थं सिद्ध इति ज्ञात्वा सा निराशायाः घारेऽन्धकारे न्यपतत्। एतस्याः निराशाऽस्मिन् श्लोके वार्णिता–

अहो कियन्ति सोढानि सङ्कटानि मया बत।
न तुष्यति तथाप्येतद्दैवं धिगिति साऽशुचत्।।5.158

दुर्गा तस्याः सखी। तस्याः पुत्रेषु स्निहयति रेविका। परं दुःखातिरेकेण किञ्चिदन्धाविश्वासेन तान्त्रिकस्य प्रभावेण च सा मानवयज्ञेन कालिकां संतोषयितुं दुर्गायाः पुत्रयोर्हत्यां कर्तुमपि सिद्धाभवत्। दुग्धे धत्तुररसं संमिश्य तद्दुग्धं दुर्गायाः पुत्राभ्यां दातुं यदासा गता तदा ज्येष्ठपुत्रमालिङ्ग्य उच्चैराक्रन्दन्ती दुर्गा तया दृष्टा। तस्या अपरपुत्रोऽपि मरणासन्न आसीत्। अत्र रेविकायाः मानसिकीं स्थितिं वर्णितारेवा तामभिशपन्ती शिलीभूतेव संस्थिता। इतिकर्तव्यतामूढा पापसङ्कल्पदूषिता।।5.188 त्वमेव घातुकी नूनं बालयोरनयोरिति। अन्तरात्मा समुद्भ्रान्ता क्षिपति स्म पुनःपुनः।।5.189

एवमुन्मत्ता रेविका रूदती हसन्ती च समुद्रतीरमपलायत। निपुत्रिकस्य दुःखमतिभयङ्करवास्तवञ्च रेविकायाः चरित्रचित्रणे दृश्यते।

भाषावैशिष्ट्यानि –

अनुष्टुभ्छन्दसा रचिता एताः कथाः। प्रसादम्या सरलावगम्या विरलसमासा च भाषा। कुत्राचिद्दीर्घ– सामासिकिप्रयोगा अपि दृश्यन्ते। यथा हरिसिंहस्य कथायां हरिसिंहस्य निरुष्णीषशिरसः वर्णनम्– राजदर्शन– संरभादुपावृत्तशीर्षकम्। 3.56 कुत्राचिदीर्घसन्धियुक्तवाक्यमपि दृश्यते यथा– किमस्मान्निश्चित्कार्यान्निवारयितुमिच्छासि (3.150) अन्यत्र सर्वत्र लघुलघु पदानि वाक्यानि च प्रयुक्तानि। यथा कोकिलेव प्रगायन्ती दिनचर्याश्चकारसा। (1.20) मम पुत्रस्य यो हन्ता स नूनं दण्डमर्हति। 2. 106 केयूरं न कदाप्यस्याः कृशं बाहुममुञ्चत। (4.15)

सर्वास्वेव कथास्वलङ्काराः रत्नवत्प्रकीर्णाः। रूपकालङ्कारे क्षमादेव्याः विशेषरुचिर्लक्षिता। पार्वत्याः सौन्दर्यवर्णने प्रयुक्तमिदं पदम् 'अपूर्वलावण्यमाननाब्जम्' (1.35) अस्यामेव कथायां धुलि्लकापुरजनानां कृते प्रयुक्तामिद पदम्–अन्धाः अज्ञानधूलिभिः (1.39) दन्तकेयूरकथायां मद्यपानोन्मत्तपत्युर्क्रोधः पैशाचक्रोध इत्यनेन पदेन तस्य क्रोधस्य बीभत्सस्वरूपं व्यञ्जितम्। असूयिनी कथायां निरपत्यायाः

रेविकायाः चिन्तायाः पराकाष्ठां दर्शयति 'चिन्ताप्रचण्डवातेन क्षिप्यमाणा' पदमिदम्। (5.157) हतस्तन्यविषाग्निना (5.22)

उपमोत्प्रेक्षालङ्कारयोरपि दृश्यन्ते नैकान्युदाहरणानि। यथा ज्वालामिव प्रज्वलन्ती (1.65) वेतसोपमा (5.36) येषुक्रिस्तस्य मातेव (1.12) अत्र केवलं श्वेतवस्त्रसाधर्म्यमेव द्रष्टव्यम्। मातृत्वमत्र नैवोपमीयते। नो चेदयोग्योपमेति वक्तव्यं भवेत्। नेत्राभ्यामनिमेषाभ्यां पिबन्निव युवा स्थितः ।(1.71) अत्रोत्प्रेक्षा।

बह्व्यः कथाः शोकान्तिकाः। बालविधवायाः पुनर्विवाहः भवितुं नार्हति। कथान्तेपार्वती देवरगृहादापि निष्कासितेति दुःखान्त एव। हरिसिंहः स्वपितुरभिज्ञानादनन्तरमिपि तं हन्ति। दन्तकेयूरकथायां कुसीदस्यहस्ते स्वपन्त्याः दन्तकेयूरं दृष्ट्वा शङ्काकुलः मद्यपानेनाविवेकाचारी गणुः हन्ति स्वपत्निम्। दन्तकेयूरविक्रयणस्य कारणं ज्ञात्वा पश्चात्तापदग्धस्य गणोर्दुःखम् वाचकस्य हृदये कारुण्यातिरेकं जनयति। असूयिनीकथायां निरपत्या पुत्रप्राप्त्यर्थं सखीपुत्रयोरत्याहितं चिन्तयन्तीरेविका दुर्गायाः मृतं पुत्रं दृष्ट्वाहमेव पुत्रयोर्हननकर्त्रीति मत्वा उन्मत्ता जाता। एषापि कथा शोकान्तैव। करुणरसपूर्णा एवैताः कथा।

कथाकथने सर्वत्र निवेदनशैली प्रयुक्ता निवेदिका कथालेखिका। संवादात्मकशैल्याः प्रयोगो·पि दृश्यते। न त्रुटयाति कुत्रापि कथासूत्रमेतैर्सवादैः। कथाविकासार्थं रसपरिपोषणणार्थमेतेषां संवादानां प्रयोगः क्षमादेव्या कृतः यथागिरिजायाः प्रतिज्ञेति कथायाः संवादात्मकस्वरूपमेव दृश्यते। कारालयतः पलायितं बन्दिनं गिरिजा वदति–

रक्ष मामम्ब याचे त्वां न गृह्येथ यथा परैः।
इति सानुनयं बन्दी प्राह भीतः कृताञ्जालिः।। 2.46
गिरिजा कूपके तिष्ठ गूढे·स्मिनिति चैनमबोधयत् ।2.52
अथैनं गिरिजावादीदिह त्वं कुशली भवेः।
कूपभित्तिगते क्रोडे सुविशाले निगूहितः। ।54
पुनः क्षेप्स्यामि ते रज्जुं गतेषु तव शत्रुषु। ।55

असूयिनीकथायां रेविका – गोपिकासेवादः। नित्यमभिशपन्ती रेविकायाः श्वश्रूर्वदाति –

– काङ्क्षितं तन्मयैवेति किं वक्षसि लोलुपे।
नष्टे नष्टे तवापत्ये बुभुक्षा ते·धिकाधिका। ।15

न जाने कस्य हेतोस्त्वां भर्तव्या मम सूनुना।
वन्ध्या कण्ठनिबद्धेव शिला सन्तापकारिणी ।।18

रेविकाः – प्रत्युवाच रेवा तां कम्पमानां सगद्गदम्।
वन्ध्येति मां कुतो ब्रूषे सुवानानामनुवत्सरम्।।20

श्वश्रूः – ननु जाने प्रसूतासि परं भस्मीकृतं त्वया।
निखिलं जातसन्तानं हतस्तन्यविषाग्निना।।22
आन्विष्यामि तदर्थे·हं शुभामन्यां वधूमिति।।26

रेविकाः – अपत्येषु विनष्टेषु हि दोषो·म्ब को हि मे।
ज्ञात्वापि किं दुनोषि त्वं वृथा मां मन्दभागिनीम्।।27

संवादेनानेन कथासूत्रमग्रे सराति। कथापात्राणां चरित्राचित्रचित्रणे·प्येतेषां सवांदानां महत्त्वपूर्णावदानमिति।

प्रसङ्गवर्णनं कथापात्राणां मानसिकीं स्थितिं वर्णायितुं क्षमा सक्षमा खलु। हरिसिंहस्य कथायां कृतं ग्रामवर्णनम् (3.1–20) पार्वत्याः सौन्दर्यवर्णनम् (1.11–12, 34,35), दन्तकेयूरकथायां कृतं मात्स्यिकमण्डलस्य द्यूतक्रीडायाः वर्णनम् (4.45–90) पात्राणांमान्तर्द्वन्द्वंमपि तया समर्थतया चित्रितम्। यथा गिरिजायाः स्वपुत्रहतकस्य रक्षणविषयकमान्तर्द्वन्द्वम् (2.89–93, 128–131)

कुत्राचिन्नूतनशब्दांना कल्पनांना प्रयोगा·पि दृश्यते। यथा येशुक्रिस्तस्य मातेवेति, पैशाचक्रोधः इति। त्रपुदीप शब्दस्य प्रयोग ग्रामज्योतिरिति कथासङ्ग्रहे कृतः।
क्षमादेव्या प्रथममेवाधुनिककथाधुनिककथातन्त्रेणरचिता एताः कथाः संस्कृतसाहित्याय महत्त्वपूर्णमवदानम्।
